**वररूवजोव्वणाओ चत्तारि नियंबिणीओ ता इब्भो । पंचत्तं संपत्तो मित्तेहिं तयणु धणयत्तो ॥६३॥**

---

गतरथरत्नं वरचक्रवर्त्तिभवनमिव नरपतिरणमिव । प्रभग्ननागदन्तं सरोगपुरुषमिव विगतसुखम् ॥ ५१ ॥

यावत्प्रविशति साशङ्कः प्रलोकमानश्चतुर्दिशं तत्र । तावत्पश्यति निजदयितां [१]करककसहितां सम्मुखमायान्तीम् ॥५२॥

दत्ताऽऽसनोपविष्टो विहितं पदशोचनं ततस्तया । पृच्छति जननी-जनकयो र्व्यतिकरं तदनु कृतपुण्यः ॥ ५३ ॥

कथितं च तयो र्मरणमश्रुजलाद्रितकपोलफलकया । तया ततः कृतपुण्यः क्रन्दति सञ्जातशोकभरः ॥ ५४ ॥

हा तात ! विषयविषमोहितेन निर्भाग्यशेखरेण मया । मरणेऽपि तव न विहिता शुश्रुषा पापकर्मणा ॥ ५५ ॥

हा मात ! मयाऽऽबालकालपरिपालितेनापि न तव । सम्भाषश्चैव विहितोऽकृतज्ञेन मरणकालेऽपि ॥ ५६ ॥

हा ! एषाऽपि वराकूयुत्तमवंशोद्भवा विनीताऽपि । विवाहय मुक्ता न भाषिता वचनमात्रेण ॥ ५७ ॥

इत्येवं विलपन्करूणस्वरं दैन्यं जन्यमानः । संधीरितः कलत्रेण तदनु स पृच्छत्येवम् ॥ ५८ ॥

किमस्ति किमपि ? ततस्तया दर्शितं तस्य निजकमाभरणम् । अर्थोपार्जनकार्ये कृत्वा तच्चैव निधानम् ॥ ५९ ॥

तत्रैव स्थितो निजमित्रवर्गलज्जया कतिपयदिनानि । यावत्तस्याः सञ्जातो गर्भस्तावत्प्रस्थितः सार्थः ॥ ६० ॥

तया सार्थासन्ने देवकुले सुप्तः स पल्यङ्के । इतश्चासीदिभ्यः सुधनु र्नाम्ना तस्मिन्पुरे ॥ ६१ ॥

दयिता महिमानाम्ना तस्य बहुकूटकपटदुर्ललिता । तस्याः सुतो धनदत्तः पित्रा परिणायितो यावत् ॥ ६२ ॥

वररूपयौवनाश्चत्वारो नितम्बिनीस्तावदिभ्यः । पञ्चत्वं संप्राप्तो मित्रैस्तदनु धनदत्तः ॥ ६३ ॥

---

१. पानपात्र विशेषः

**दविणावज्जणकज्जे सज्जीकाउं कयाणए नीओ । रयणायरपरतीरं विढत्तवित्तो पडिनियत्तो ॥६४॥**

**जा संपत्तो हल्लंतलहरिमाले समुद्दमज्झम्मि । ता गिरितडम्मि फुट्टं वहणं निहणं गओ सो वि ॥६५॥**

**तो एक्केण नरेण कहियं तरिउं तरंगिणीनाहं । महिमाए पुत्तमरणं तो उवयरिउं इमो तीए ॥६६॥**

**विउलेण दविणजाएण पभणिओ भद्द ! नो इमं तुमए । छक्कन्नं कायव्वं ति तयणु तेणावि पडिवन्नं ॥६७॥**

**चिंतेइ इमा आणेमि किं पि सुण्हाणमवरभत्तारं । जायंति जहा पुत्ता घर-लच्छीरक्खणसमत्था ॥६८॥**

**इय चिंतिऊण रयणीए नियइ नयरस्स परिसरे जाव । ता दिट्ठो सुहसुत्तो कयउन्नो तीए देवउले ॥६९॥**

**पल्लंकपसुत्तो च्चिय उक्खित्तो तीए भणियपुरिसेहिं । मुक्को मंदिरमज्झे कमेण जा उट्ठिओ ताव ॥७०॥**

**सोयपरिपूरियंगी कंठम्मि विलग्गिऊण रुयमाणी । जंपइ बालो वि तुमं अवहरिओ जाय ! केणावि ॥७१॥**

**निउणं निरिक्खिओवि य महिवीढे न हु कहिंपि उवलद्धो । नाणेण मुणिय मुणिणा कहिओ तुह आगमो अज्ज ॥७२॥**

**दिट्ठो य मए सुमिणे समागओ नियगिहम्मि कप्पतरू । ता एत्थ पुत्त ! पुन्नेहिं आगओ अज्ज अम्हाण ॥७३॥**

**तं कत्थ गओ विद्धि ? परिभमिओ वा कहिं ? कहसु मज्झ । किं वा तएऽणुभूयं सुहदुक्खं एत्तियं कालं ? ॥७४॥**

**अवरं च मज्झ हिययं वज्जसिलिंकाहिं निम्मियं मन्ने । जं न गयं तुह विरहे धस त्ति सयसिक्करीहोउं ॥७५॥**

**जाय ! तुह विरहदुम्मियमणाएं जं चिंतियं मए किं पि । तं तुह वेरीणं पि हु एउ सरीरम्मि मा कह वि ॥७६॥**

**एत्तियकालं पुत्तय ! नियकुलदेवीहिं रक्खिओ इण्हिं । मह जीविएण जीवसु नहंगणे जाव ससि-सूरा ॥७७॥**

---

द्रविणोपार्जनकार्ये सज्जीकृत्वा क्रयाणकान्नीत: । रत्नाकरपरतीरं अर्जितवित्त: प्रतिनिवृत्त: ॥ ६४ ॥

यावत्संप्राप्तश्चलल्लहरिमाले समुद्रमध्ये । तावद्गिरितटे स्फुटितं वाहनं निधनं गत: सोऽपि ॥ ६५ ॥

तदैकेन नरेण कथितं तीर्त्वा तरंगिणीनाथम् । महिमाया: पुत्रमरणं तत उपचरितुमयं तया ॥ ६६ ॥

विपुलेन द्रविणजातेन प्रभणितो भद्र ! न इदं त्वया । षट्कर्णं कर्तव्यमिति तदनु तेनापि प्रतिपन्नम् ॥ ६७ ॥

चिन्तयतीमाऽऽनयामि किमपि श्नुषाणामपरभर्त्तारम् । जायन्ते यथा पुत्रा: गृहलक्ष्मीरक्षणसमर्था: ॥ ६८ ॥

इति चिन्तयित्वा रजन्यां पश्यति नगरस्य परिसरे यावत् । तावद्दृष्ट: सुखप्रसुप्त: कृतपुण्यस्तया देवकुले ॥ ६९ ॥

पल्यङ्कप्रसुप्तश्चैवोत्क्षिप्तस्तया भणितपुरुषै: । मुक्तो मन्दिरमध्ये क्रमेण यावदुत्थितो तावत् ॥ ७० ॥

शोकपरिपूरिताङ्गी कण्ठे विलग्य रुदन्ती । जल्पति बालोऽपि त्वमपहृतो जात ! केनापि ॥ ७१ ॥

निपुणं निरीक्षितोऽपि च महिपृष्टे न खलु कुत्राप्युपलब्ध: । ज्ञानेन मुणितमुनिना कथितस्तवाऽऽगमोऽद्य ॥ ७२ ॥

दृष्टश्च मया स्वप्ने समागतो निजगृहे कल्पतरु: । तस्मादत्र पुत्र ! पुण्यैरागतोऽद्यास्माकम् ॥ ७३ ॥

त्वं कुत्र गतो वृद्धि ? परिभ्रान्तो वा कुत्र ? कथय मम । किं वा त्वयाऽनुभूतं सुखदु:खमैतावन्तं कालम् ॥ ७४ ॥

अपरं च मम हृदयं वज्रशलाकाभिर्निमितं मन्ये । यन्न गतं तव विरहे धसिति शतशर्करीभूय ॥ ७५ ॥

जात ! तव विरहदुमितमनसा यच्चिन्तितं मया किमपि । तत्तव वैरिणामपि खल्वेतु शरीरे मा कथमपि ॥ ७६ ॥

एतावत्कालं पुत्रक ! निजकुलदेविभी रक्षित इदानीम् । मम जीवितेन जीव नभोङ्गणे यावच्छशिसूर्यौ ॥ ७७ ॥

विविहवररयण-मणि-कणय-रुप्पमुत्ताहलाइधणरिद्धि । उवभुंजसु जाय ! तुमं सम्माणंतो सुहिसमूहं ॥७८॥
अवरं च तुज्झ जेट्ठो भाया देसंतरम्मि वावन्नो । ता नियभाउज्जायाण होसु सामी तुमं वच्छ ॥७९॥
इय एवं तीए मइप्पवंचविम्हियमणो मुणंतो वि । कूडकवडं ति जंपइ जं पभणसि अंब ! तं काहं ॥८०॥
भणियाओ तओ तीए सुण्हाओ ठाविऊण एगंते । पडिवज्जह देवरमवि कंतं एवंविहे कज्जे ॥८१॥
जओ भणियं-
गते मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥८२॥
ता देवरेण पुत्तं उप्पाइत्ता करेह कुलरक्खं । मा वच्चउ तुम्हाणं धणरिद्धी रायभवणम्मि ॥८३॥
कुंतीमहासईए अन्नन्नपईहिं पुत्तउप्पत्ती । सुव्वइ ता मह वयणं पडिवज्जह मा वियप्पेह ॥८४॥
इय एवंविहबहुविहलोइयजुत्तीहिं तीए धुत्तीए । तह कह वि हु भणियाओ ताओ जहा ताहिं पडिवन्नं ॥८५॥
तो ताहिं समं एसो विसयसुहं नेहनिब्भरमणाहिं । भुंजइ मुणिदाणज्जियकिट्ठपुन्नाणुभावेण ॥८६॥
कालक्कमेण जाया पुत्ता चउरो चउण्ह सुण्हाण । गय-चक्क-संख-सारंगलंछिया लच्छिनाह व्व ॥८७॥
अन्नोन्ननेहनिब्भरमणाण परिहासहरियहिययाण । बारस समइक्कंताणि ताण वरिसाणि सोक्खेण ॥८८॥
सुण्हाओ सासुयाए भणियाओ इमं विडं परिच्चयह । जम्हा तुम्हाण पई न होइ तो बिंति इयराओ ॥८९॥
अंब ! इमो तुमए च्चिय विहिओ अम्हाण भवणसामित्ते । ता सुविणे वि हु एयं अम्हे न कयाइ परिहरिमो ॥९०॥

---

विविधवररत्नमणिकनकरुप्यमुक्ताफलादिधनर्द्धिम् । उपभुङ्ग्ध जात ! त्वं सन्मानयन् मित्रसमूहम् ॥ ७८ ॥
अपरं च तव ज्येष्ठो भ्राता देशान्तरे व्यापन्नः । ततो निजभातृजायानां भव स्वामी त्वं वत्स ! ॥ ७९ ॥
इत्येवं तया मतिप्रपञ्चविस्मितमना मुणन्नपि । कूटकपटमिति जल्पति यत्प्रभणस्यम्ब ! तत्करिष्ये ॥ ८० ॥
भणितास्तास्तया श्नुषाः स्थाप्यैकान्ते । प्रतिपद्यध्वम् देवरमपि कान्तमेवंविधे कार्ये ॥ ८१ ॥
यतो भणितम् -
"गते मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ ८२ ॥"
ततो देवरेण पुत्रमुत्पाद्य कुरुत कुलरक्षाम् । मा व्रजतु युष्माकं धनर्द्धी राजभवने ॥ ८३ ॥
कुन्तीमहासत्याऽन्यान्यपतिभिः पुत्रोत्पतिः । श्रूयते ततो मम वचनं प्रतिपद्यध्वं मा विकल्पयत ॥ ८४ ॥
इत्येवंविधबहुविधलौकिकयुक्तिभिस्तया धूर्त्या । तथा कथमपि खलु भणितास्ता यथा ताभिः प्रतिपन्नम् ॥ ८५ ॥
ततस्ताभिःसममेष विषयसुखं स्नेहनिभरमनोभिः । भुनक्ति मुनिदानार्जितप्रकृष्टपुण्यानुभावेन ॥ ८६ ॥
कालक्रमेण जाताः पुत्रश्चत्वारश्चतसृणां स्नुषाणाम् । गज-चक्र-शङ्ख-सारङ्गलाञ्छिता लक्ष्मीनाथ इव ॥ ८७ ॥
अन्योन्यस्नेहनिर्भरमनसां परिहासहृतहृदयानाम् । द्वादशसमतिक्रान्तानि तेषां वर्षाणि सौख्येन ॥ ८८ ॥
स्नुषाश्छ्वश्वा भणिता इमं विटं परित्यजत । यष्माद्युष्माकं पति र्न भवति ततो ब्रुवन्तीतराः ॥ ८९ ॥
अम्ब ! अयं त्वया चैव विहितोऽस्माकं भवनस्वामित्वे । तस्मात्स्वप्नेऽपि खल्वेनं वयं न कदाचित् परिहरामः ॥९०॥

**तो बद्धभीमभिउडीभयंकरा हक्किउं तहा भणइ । भयभीयाओ ताओ जह पडिवज्जंति तव्वयणं ॥९१॥**
**जंपंति य जइ पभणसि ता अंब ! इमस्स किंपि संबलयं । काहामो तो महिमाणुमईए तं कयं ताहिं ॥९२॥**
**रइया य सिंहकेसरयमोयगा तयणु ताण मज्झम्मि । खित्ताणि ताहिं बहुमोल्लयाणि वरविविहरयणाणि ॥९३॥**
**तो मोयगाण थइया भरिया मुक्का य तस्स पल्लंके । महिमाए सो पसुत्तो मुक्को तत्थेव देवउले ॥९४॥**
**भवियव्वयाए सत्थो समागओ जो तया गओ आसि । रयणि त्ति नो पविट्ठो पुरम्मि आवासियो बाहिं ॥९५॥**
**सोऊण आगयं तं भत्तारपउत्तिजाणणनिमित्तं । जा तत्थ गया दइया ता नियइ तयं तहिं सुत्तं ॥९६॥**
**कयसिंगारं दट्ठुं पहिट्ठहियया समुट्ठविय कंतं । घेत्तुं संबलथइयं पल्लंकं चिय गया सगिहं ॥९७॥**
**कयउन्नओ वि पत्तो नियभवणं मुणिय महिमपरमत्थो । आबद्धवेणिदंडं वसंतसेणं तहिं नियइ ॥९८॥**
**सयपागपभिइतेल्लेहिं जाव अब्भंगिओ तओ पुत्तो । पत्तो लेहयसालाओ सविणयं जणयपयपणओ ॥९९॥**
**जंपइ य अंब ! मह देहि भोयणं तो वसंतसेणाए । दट्ठुं असिद्धमन्नं पियथइयामोयगो दिन्नो ॥१००॥**
**तं भक्खंतो पुत्तो संपत्तो जाव लेहसालाए । ता मोयगम्मि दिट्ठो तेण मणी फुरियकिरिणोहो ॥१०१॥**
**तो घुंटओ त्ति काऊण इयरछत्ताण दंसिओ तेण । ते बिंति मणी ता पूइयस्स हट्टे पयच्छामो ॥१०२॥**
**जेण इमो अम्हाणं दिणे दिणे देइ मंडयाऊयं । अप्पंति तओ ते पूइयस्स सो खिवइ जलकुंडे ॥१०३॥**
**तो तम्मणिप्पभावेण कुंडनीरं खणेण पविभत्तं । नायं च पूइएणं जलकंतमणी जहा एसो ॥१०४॥**

---

ततो बद्धभीमभृकुटिभयङ्कराऽऽकार्य तथा भणति । भयभीतास्ता यथा प्रतिपद्यन्ते तद्वचनम् ॥ ९१ ॥
जल्पन्ति च यदि प्रभणसि ततोऽम्ब ! अस्य किमपि शम्बलकम् । करिष्यामस्ततो महिमानुमत्या तत्कृतं ताभि: ॥९२॥
रचिताश्चसिंहकेशरकमोदकास्तदनु तेषां मध्ये । क्षिप्तानि ताभिर्बहुमूल्यानि वरविविधरत्नानि ॥ ९३ ॥
ततो मोदकानां स्थगिका भृता मुक्ता च तस्य पल्यङ्के । महिमया स प्रसुप्तो मुक्तस्तत्रैव देवकुले ॥ ९४ ॥
भवितव्यतया सार्थ: समागतो यस्तदा गत आसीत् । रजनीति न प्रविष्ट: पुर आवासितो बहि: ॥ ९५ ॥
श्रुत्वाऽऽगतं तं भर्तुप्रवृत्तिजानननिमित्तम् । यावत्तत्र गता दयिता तावत्पश्यति तकं तत्र सुप्तम् ॥ ९६ ॥
कृतशृङ्गारं दृष्ट्वा प्रहृष्टहृदया समुत्थाप्य कान्तम् । गृहीत्वा शम्बलस्थगिकं पल्यङ्कं चैव गता स्वगृहम् ॥ ९७ ॥
कृतपुण्यकोऽपि प्राप्तो निजभवनं मुणितमहिमापरमार्थ: । आबद्धवेणीदण्डां वसन्तसेनां तत्र पश्यति ॥ ९८ ॥
शतपाकप्रभृतितैलै र्यावदभ्यङ्गितस्तत: पुत्र: । प्राप्तो लेखकशालाया: सविनयं जनकपदप्रणत: ॥ ९९ ॥
जल्पति चाम्ब ! मम देहि भोजनं ततो वसन्तसेनया । दृष्ट्वाऽसिद्धमन्नं प्रियस्थगिकामोदको दत्त: ॥ १०० ॥
तं भक्षमाण:पुत्र: संप्राप्तो यावल्लेखशालायाम् । तावन्मोदके दृष्टस्तेन मणी स्फुरितकिरणौघ: ॥ १०१ ॥
तदा घुन्टओ इतिकृत्वेतरछात्रान्दर्शितस्तेन । ते ब्रुवन्ति मणी तावत्पुपकिनो हट्टे प्रयच्छाम: ॥ १०२ ॥
येनायमस्मद्भ्यो दिने दिने ददाति मण्डकादिकम् । अर्पयन्ति ततस्ते पुपकिन: स क्षिपति जलकुण्डे ॥ १०३ ॥
ततस्तन्मणिप्रभावेन कुण्डनीरं क्षणेन प्रविभक्तम् । ज्ञातं च पुपकिना जलकान्तमणी यथैष: ॥ १०४ ॥

संगोविय जलकंतं रयणं उचियं च देइ छत्ताण । एत्तो य कहइ कयउन्नयस्स दासी पियंगुलया ॥१०५॥
सामि ! जया परिचत्तो अंबाए तुमं तओ इमं नाउं । महिमंडले गविट्ठो दिट्ठो न वसंतसेणाए ॥१०६॥
वेणीबंधं काऊण तयणु परिहरियसयलसिंगारा । निवसियसियवत्थजुया तुच्छासणविहियतणुवित्ती ॥१०७॥
एत्तियकालं एसा पउत्थवइयावएण तुह विरहे । तुह गेहे चेव ठिया अंसुजलोल्लिकवोलजुया ॥१०८॥
सोऊण तयं कयउन्नयस्स जाओ पुणो वि अणुराओ । उवभुंजइ तो दोहिं वि भज्जाहिं समं विसयसोक्खं ॥१०९॥
अह अन्नया य सेयणयसिंधुरो जाव सलिलपाणत्थं । सरियाए अवयरिओ ता बद्धो तंतुणा तत्थ ॥११०॥
पोक्करियं पुरिसेहिं तं सोउं आउलो महाराओ । विन्नतो अभएणं खिवह तहिं देव ! जलकंतं ॥१११॥
कड्ढिज्जइ जाव मणी भंडाराओ तओ गओ मरइ । तो सिग्घपावणत्थं पुरम्मि घोसाविओ पडहो ॥११२॥
हंहो ! जो जलकंतेण गयवरं तंतुणा मुयावेइ । तस्स निवो नियकन्नं देइ समं अद्धरज्जेण ॥११३॥
तं सोउं कुंदुइओ पक्खिवइ मणी तरंगिणीमज्झे । जायं थलं च सलिलं पलाइओ तंतुजंतू वि ॥११४॥
नीहरिओ य करिंदो संतुट्ठो नियमणे नरिंदो वि । कहिओ य पूइयगओ निवस्स जलकंतवुत्तंतो ॥११५॥
तं निसुणिउं नरिंदो चिंतापब्भारपूरिओ भणइ । अभय ! कहं दायव्वा नियकन्ना नीयजाइस्स ? ॥११६॥
विन्नवइ तओ अभओ नीयस्स न हुंति देव ! रयणाणि । तो पुच्छिज्जउ एसो उप्पत्तिं नीरकंतस्स ? ॥११७॥
रन्ना वि पुच्छिओ सो सच्चं मह कहसु रयणवुत्तंतं । भयकंपिरेण तेण वि जहट्ठियं राइणो कहियं ॥११८॥

---

सङ्गोप्य जलकान्तं रत्नमुचितं च ददाति छात्रेभ्यः । इतश्च कथयति कृतपुण्यकस्य दासी प्रियङ्गुलता ॥ १०५ ॥
स्वामिन् । यदा परित्यक्तोऽम्बया त्वं तत इदं ज्ञात्वा । महिमण्डले गवेषितो दृष्टो न वसन्तसेनया ॥ १०६ ॥
वेणीबन्धं कृत्वा तदनु परिहृतसकलशृङ्गारा । निवसितश्वेतवस्त्रयुगा तुच्छाशनविहिततनुवृत्तिः ॥ १०७ ॥
एतावत्कालमेषा प्रोषितभर्तृकाव्रतेन तव विरहे । तव गृहे चैव स्थिताश्रुजलार्द्रितकपोलयुग्मा ॥ १०८ ॥
श्रुत्वा तकं कृतपुण्यकस्य जातः पुनरप्यनुरागः । उपभुनक्ति ततो द्वाभ्यामपि भार्याभ्यां समं विषयसौख्यम् ॥ १०९ ॥
अथान्यदा च सेचनकसिन्धुरो यावत्सलिलपानार्थम् । सरित्यवतरितस्तावद्बद्धस्तन्तुना तत्र ॥ ११० ॥
पुत्कारितं पुरुषैस्तच्छ्रुत्वाऽऽकुलो महाराजः । विज्ञप्तोऽभयेन क्षिपत तत्र देव ! जलकान्तम् ॥ १११ ॥
कृष्यते यावन्मणी भण्डगारात्ततो गजो म्रियते । ततः शीघ्रप्रापणार्थं पुरे घोषयितः पटहः ॥ ११२ ॥
हंहो ! यो जलकान्तेन गजवरं तन्तुना मोचयति । तस्मै नृपो निजकन्यां ददाति सममर्द्धराज्येन ॥ ११३ ॥
तच्छ्रुत्वा कान्दविकः प्रक्षिपति मणीं तरङ्गिणीमध्ये । जातं स्थलं च सलिलं पलायितस्तन्तुजन्तूरपि ॥ ११४ ॥
निसृतश्च करीन्द्रः सन्तुष्टो निजमनसि नरेन्द्रोऽपि । कथितश्चपुपकिगतो नृपस्य जलकान्तवृत्तान्तः ॥ ११५ ॥
तन्निश्रुत्य नरेन्द्रश्चिन्ताप्राग्भारपूरितो भणति । अभय ! कथं दातव्या निजकन्या नीचजातेः ? ॥ ११६ ॥
विज्ञापयति ततोऽभयो नीचस्य न भवन्ति देव ! रत्नानि । ततः पृच्छयते एष उत्पत्तिं नीरकान्तस्य ? ॥ ११७ ॥
राज्ञाऽपि पृष्टः स सत्यं मम कथय रत्न वृत्तान्तम् । भयकम्पता तेनाऽपि यथास्थितं राज्ञे कथितम् ॥ ११८ ॥

**तो भणइ अभयमंती भवंति रयणाणि रोहणे नूणं । राया वि य कंदुइयं उचियं दाउं विसज्जेइ ॥११९॥**
**तो हक्कारिय कयउन्नयस्स दिन्ना निवेण नियकन्ना । सह रायलच्छिअद्धेण तयणु वीवाहिया तेण ॥१२०॥**
**तीए सह विविहविसए उवभुंजइ रायलच्छिपरियरिओ । अह अन्नदिणे महिमाए वइयरं कहइ अभयस्स ॥१२१।**
**सोऊण तीए मायापवंचमभओ सविम्हओ भणइ । पेच्छ जहा धुत्तीए अम्हे वि जिया सवुद्धीए ॥१२२॥**
**एवंविहमच्चब्भुयकज्जं काऊण वसइ एत्थेव । न वियाणिया मए वि हु अहो ! सुनिउणत्तमेयाए ॥१२३॥**
**ता वीसत्थो होऊण चिट्ठ जाणामि तुज्झ दइयाओ । इय भणिउं कारावइ देवउलं दोहिं दारेहिं ॥१२४॥**
**कयउन्नयपडिरूवा पडिमा जक्खस्स तत्थ कारविया । घोसावियं च नयरं जहा सपुत्ता पुरंधीओ ॥१२५॥**
**पविसिय पुव्वदुवारेण निंतु अवरेण पूइउं जक्खं । होही ताणुवसग्गो न जाउ एयं करिस्संति ॥१२६॥**
**तं सोऊण सवच्छो विलयावग्गो समागओ तत्थ । कयउन्नयदइयाओ वि पत्ताओ तहिं सपुत्ताओ ॥१२७॥**
**ताण तओ चत्तारि वि पुत्ता भणिऊण ताय ! ताय ! त्ति । आरूढा उच्छंगे झड त्ति जक्खस्स पहसंता ॥१२८॥**
**तो तेऽभय-कयउन्ना एगंताओ विणिग्गया झति । तं दट्ठूणं ताओ अवणमियमुहाओ जायाओ ॥१२९॥**
**तो अभएणं महिमा हक्कारिय हक्किया तहा कहवि । जह चलणेसु निवडिया दोण्हं पि हु दीणमुहछाया ॥१३०॥**
**इय सत्तकलत्तेहिं सहियस्स सुहाइं भुंजमाणस्स । रज्जसिरिमणुहवंतस्स तस्स कालो अइक्कमइ ॥१३१॥**
**एत्थंतरम्मि भयवं भुवणगुरू वद्धमाणजिणानाहो । थुव्वंतो सुर-चारणनियरेण तहिं समोसरिओ ॥१३२॥**

---

ततो भणत्यभयमन्त्री भवन्ति रत्नानि रोहणे नूनम् । राजापि च कान्दविकमुचितं दत्वा विसर्जयति ॥ ११९ ॥
तत आकार्य कृतपुण्यस्य दत्ता नृपेण निजकन्या । सह राजलक्ष्म्यर्द्धेन तदनु वीवाहिता तेन ॥ १२० ॥
तया सह विविधविषयानुपभुनक्ति राजलक्ष्मीपरिकरितः । अथान्यदिने महिमाया व्यतिकरं कथयत्यभयस्य ॥१२१ ॥
श्रुत्वा तस्या मायाप्रपञ्चमभयः सविस्मयो भणति । पश्य यथा धुर्त्याऽस्मान्नपि जिता स्वबुद्धया ॥ १२२ ॥
एवंविधमाश्चर्यभूतकार्यं कृत्वा वसत्यत्रैव । न विज्ञाता मयाऽपि खल्वहो ! सुनिपुणत्वमेतस्याः ॥ १२३ ॥
तावद्विश्वस्तो भूत्वा तिष्ठ जानामि तव दयिताः । इति भणित्वा कारयति देवकुलं द्वाभ्यां द्वाराभ्याम् ॥ १२४ ॥
कृतपुण्यकप्रतिरुपा प्रतिमा यक्षस्य तत्र कारयिता । घोषयितं च नगरे यथा सपुत्राः पुरन्ध्र्यः ॥ १२५ ॥
प्रविश्य पूर्वद्वारेण नयन्त्वपरेण पूजयित्वा यक्षम् । भविष्यति तासामुपसर्गो न जात्वेतत्करिष्यन्ति ॥ १२६ ॥
तच्छ्रुत्वा सवत्सो वनितावर्गः समागतस्तत्र । कृतपुण्यकदयिता अपि प्राप्तास्तत्र सपुत्राः ॥ १२७ ॥
तासां ततश्चत्वार अपि पुत्रा भणित्वा तात ! ताततेति । आरुढा उत्सङ्गे झटिति यक्षस्य प्रहसन्तः ॥ १२८ ॥
ततस्तावभय-कृतपुण्यवेकान्ताद्विनिर्गतौ झटिति । तं दृष्ट्वा ता अवनतमुखा जाताः ॥ १२९ ॥
ततोऽभयेन महिमाऽऽकार्य तर्जितास्तथा कथमपि । यथा चरणयो र्निपतिताद्वयोरपिखलु दीनमुखच्छायाः ॥ १३० ॥
इति सप्तकलत्रैः सहितस्य सुखानि भुञ्जतः । राज्यश्रियमनुभवतस्तस्य कालोऽतिक्रामति ॥ १३१ ॥
अत्रान्तरे भगवान्भुवनगुरु वर्धमानजिननाथः । स्तूयमानः सुर-चारणनिकरेण तत्र समवसृतः ॥ १३२ ॥

**तो कयउन्नयराया गंतु उज्जाणपालपुरिसेहिं । वद्धाविओ तओ ताण देइ पीइप्पयाणं सो ॥१३३॥**
**संचलिओ जयवारणमारूढो धरियधवलसिरछत्तो । सामंत-मंतिजुत्तो संपत्तो समवसरणम्मि ॥१३४॥**
**काउं पयाहिणतियं खोणीमंडलमिलंतभालयलो । पणमित्तु जिणं सिररइयअंजली थोउमाढत्तो ॥१३५॥**
**जयकम्ममहावणदहणगहण दवजलण ! माणनिम्महण ? । जय करणंतरंगिणिनाहमहणवरमंदर ! नमो ते ॥१३६॥**
**इय संथुणिऊण जिणं पुणरवि पणमित्तु सामिकमकमलं । नरनाहनियरनिस्सियसहाए गंतु समुवविट्ठो ॥१३७॥**
**तयणंतरं जिणिंदो दसणावलिकिरणधवलियदियन्तो । जलहरगंभीरसरेण देसणं काउमाढत्तो ॥१३८॥**
**हंहो ! संसारमहासमुद्दनिवडंतजंतुजायस्स । जिणधम्मजाणवत्तं मोत्तूण न अत्थि उत्तारो ॥१३९॥**
**धम्मेण असुर-नर-खयर-अमररिद्धीओ हुंति जंतूण । किं बहुणा ? सिवसुहमवि सत्ता पावंति धम्मेण ॥१४०॥**
**इय निसुणिऊण जिणनाहदेसणं पाणिणो भवविरत्ता । कयउन्ननिवई वि य संविग्गो भणइ भयवंतं ॥१४१॥**
**भयवं ! किं मह असरिसरिद्धी भोगा य सुंदरा जाया ? । परमंतरायबहुला कारणमेएसिमाइसह ॥१४२॥**
**तो भयवया समग्गो पुव्वभवो अक्खिओ नरिंदस्स । जाव परमन्नथाले रेहाकरणा विपरिणामो ॥१४३॥**
**तो तेण खीरिदाणेण पाविया उब्भडा तए रिद्धी । रेहाभावखएणं जायं भोयंतरायं पि ॥१४४॥**
**तं सोउं कयउन्नयराया संजायजाइसरणेण । अवलोइय पुव्वभवं जह कहियं जिणवरिंदेण ॥१४५॥**
**जंपइ जहा जिणेसर ! तुमए कहियं तहा मए दिट्ठं । इय जंपिउं नरिंदो पणामपुव्वं पुणो भणइ ॥१४६॥**

---

तदा कृतपुण्यकराजा गत्वोद्यानपालपुरुषैः । वर्धापितस्ततस्तेभ्यो ददाति प्रीतिप्रदानं सः ॥ १३३ ॥
सञ्चलितो जयवारणमारुढो धृतधवलशिरच्छत्रः । सामन्त-मन्त्रियुतः संप्राप्तः समवसरणे ॥ १३४ ॥
कृत्वा प्रदक्षिणात्रिकं क्षोणीमण्डलमिलद्भालतलः । प्रणम्य जिनं शिरोरचिताञ्जलिः स्तोतुमारब्धः ॥ १३५ ॥
जयकर्ममहावनदहनगहनदवज्वलन ! माननिर्मथन ! । जय करणतरङ्गिणिनाथमथनवरमंदर ! नमस्ते ॥ १३६ ॥
इति संस्तुत्य जिनं पुनरपि प्रणम्य स्वामिक्रमकमलम् । नरनाथनिकरनिश्रितसभां गत्वा समुपविष्टः ॥ १३७ ॥
तदनन्तरं जिनेन्द्रो दशनावलिकिरणधवलितदिगन्तः । जलधरगम्भीरस्वरेण देशनां कर्तुमारब्धः ॥ १३८ ॥
हंहो ! संसारमहासमुद्रनिपतज्जन्तुजातस्य । जिनधर्मयानपात्रं मुक्त्वा नास्त्युत्तारः ॥ १३९ ॥
धर्मेणाऽसुर-नर-खेचरामरर्द्धयो भवन्ति जन्तूनाम् । किं बहुना ? शिवसुखमपि सत्वाः प्राप्नुवन्ति धर्मेण ॥ १४० ॥
इति निश्रुत्य जिननाथदेशनां प्राणिनो भवविरक्ताः । कृतपुण्यनरपतिरपि च संविग्नो भणति भगवन्तम् ॥ १४१ ॥
भगवन् ! किं ममासदृशर्द्धि र्भोगाश्च सुन्दरा जाताः ? । परमन्तरायबहुलाः कारणमेतेषामादिशत ॥ १४२ ॥
ततो भगवता समग्रः पूर्वभव आख्यातो नरेन्द्रस्य । यावत्परमान्नस्थाले रेखाकरणाद्विपरिणामः ॥ १४३ ॥
ततस्तेन क्षीरदानेन प्राप्तोद्भटा त्वया ऋद्धिः । रेखाभावक्षयेन जातं भोगान्तरायमपि ॥ १४४ ॥
तच्छ्रुत्वा कृतपुण्यकराजा सञ्जातजातिस्मरणेन । अवलोक्य पूर्वभवं यथाकथितं जिनवरेन्द्रेण ॥ १४५ ॥
जल्पति यथा जिनेश्वर ! त्वया कथितं तथा मया दृष्टम् । इति जल्पित्वा नरेन्द्रः प्रणामपूर्वं पुनर्भणति ॥ १४६ ॥

**नाह ! तुह पायपासे पव्वज्जमहं करेमि भवमहणिं । आउच्छिऊण सेणियनिवाइ तो पभणिओ पहुणा ॥१४७॥**

**भो भो देवाणुप्पिय ! मा पडिबंधं करेज्ज तो राया । पणमित्तु सामिसालं गओ य सो नयरमज्झम्मि ॥१४८॥**

**आपुच्छिऊण सेणियनरेसरं नियसुयाण रज्जसिरिं । सव्वं पि विभइऊणं घोसाविय अभयदाणाइ ॥१४९॥**

**परिपूइउं जिणिंदे सम्माणिय चउविहं समणसंघं । आरुहिउं सिबियाए सकलत्तो पुत्तसंजुत्तो ॥१५०॥**

**सेणियनरेसरेणं अणुगम्मंतो जणेण थुव्वंतो । महया महूसवेणं समागओ समवसरणम्मि ॥१५१॥**

**जिणचरणकमलपणओ सकलत्तो दिक्खिओ जिणिंदेणं । कयपंचमुट्ठिलोओ तो उवणीओ गणहराण ॥१५२॥**

**अज्जाउ चंदणज्जाइ अप्पिया तयणु मुणियसुत्तत्थो । गीयत्थो संजाओ चरिउं अइघोरतव-चरणं ॥१५३॥**

**काऊण कालमासे काले संलेहणाए कयकिच्चो । परिवत्तियनवकारो उववन्नो देवलोगम्मि ॥१५४॥**

**॥ कृतपुण्यकाख्यानकं समाप्तम् ॥६॥**

## इदानीं द्रोणाद्याख्यानकमारभ्यते । तच्चेदम्-

**निस्सेसदेसवसुहाविहूसणे कोसलम्मि देसम्मि । सिरिउरनयरं सिंगारमंदिरं आसि लच्छीए ॥१॥**

**तत्थऽत्थि कलानिलओ निहणियनिस्सेसदोसतमपसरो । तारावइ व्व तारापीडो नामेण नरनाहो ॥२॥**

**तस्सऽत्थि कामरइकेलिकुलहरं कामधरिणिसमरूवा । सयलंतेउरसारा देवी रइसुंदरी पवरा ॥३॥**

**निवसंति तत्थ चत्तारि सेट्ठिपुत्ता विसिट्ठगुणजुत्ता । सुधण-धणवइ-धणीसर-धणया धणरिद्धिपरिकलिया ॥४॥**

---

नाथ ! तव पादपार्श्वे प्रव्रज्यामहं करोमि भवमथनीम् । आपृच्छ्य श्रेणिकनृपादींस्ततः प्रभणितः प्रभुना ॥ १४७ ॥

भो भो देवानुप्रिय ! मा प्रतिबन्धं कूर्यात्ततो राजा । प्रभण्य स्वामिनं गतश्च स नगरमध्ये ॥ १४८ ॥

आपृच्छ्य श्रेणिकनरेश्वरं निजसुतानां राज्यश्रियम् । सर्वामपि विभज्य घोषयितमभयदानादिम् ॥ १४९ ॥

परिपूज्य जिनेन्द्रान् सन्मान्य चतुर्विधं श्रमणसङ्घम् । आरुह्य शिबिकां सकलत्रः पुत्रसंयुक्तः ॥ १५० ॥

श्रेणिकनरेश्वरेणानुगम्यमानो जनेन स्तूयमानः । महता महोत्सवेन समागतः समवसरणे ॥ १५१ ॥

जिनचरणकमलप्रणतः सकलत्रो दिक्षितो जिनेन्द्रेण । कृतपञ्चमुष्टिलुञ्चस्तत उपनीतो गणधराणाम् ॥ १५२ ॥

आर्याश्चन्दनार्याया अर्पितास्तदनु मुणितसूत्रार्थः । गीतार्थः सञ्जातश्चरित्वाऽतिघोरतपश्चरणम् ॥ १५३ ॥

कृत्वा कालमासे कालं संलेखनया कृतकृत्यः । परिवर्तितनवकार उत्पन्नो देवलोके ॥ १५४ ॥

**॥ कृतपुण्यकाख्यानकं समाप्तम् ॥**

### द्रोणाद्याख्यानकम् ।

निःशेषदेशवसुधाविभूषणे कोशले देशे । श्रीपुरनगरं शृङ्गारमन्दिरमासील्लक्ष्म्या ॥ १ ॥

तत्रास्ति कलानिलयो निहतनिःशेषदोषतमःप्रसरः । तारापतिरिव तारापीडो नाम्ना नरनाथः ॥ २ ॥

तस्यास्ति कामरतिकेलिकुलगृहं कामगृहिणिसमरुपा । सकलन्तःपुरसारा देवी रतिसुन्दरी प्रवरा ॥ ३ ॥

निवसन्ति तत्र चत्वारश्छ्रेष्टिपुत्रा विशिष्ठगुणयुक्ताः । सुधन-धनपति-धनेश्वर-धनदा धनर्द्धिपरिकलिताः ॥ ४ ॥

अह अन्नया कयाई अम्मा-पियराणि वंचिउं चलिया । दविणाय रयणदीवे दोणभिहाणेक्ककमयरा ॥५॥
वच्चंताणं ताणं समागया कत्थई वियडअडवी । तो तेहि तत्थ पडिमापडिवन्नो मुणिवरो दिट्ठो ॥६॥
हरिसाऊरियहियएहिं तयणु गुरुभत्तिनिब्भरं भणिओ । संबलयमिणं दोणय ! देहि मुणिंदस्स एयस्स ॥७॥
सो वि मुणिदाणसद्धाभत्तिभरुब्भिन्नभूरिरोमंचो । वियसंतवयणकमलो पडिलाहइ मुणिवरमुयारं ॥८॥
पत्ता य रयणदीवं कमेण सुविढत्तभूरिधणनिवहा । तत्तो य पडिनियत्ता पत्ता नियनयरमचिरेण ॥९॥
विलसंति धणं पालंति परियणं गुरुयणं पि पूयंति । दीणाण दिंति दाणे कुणंति मित्ताण सम्माणं ॥१०॥
ईसिसमायं धणवइ-धणीसरा ववहरंति कालेणं । निययाउसमत्तीए दोणो मरिउं समुप्पन्नो ॥११॥
गयउरनयरे दुप्पसहरायणो सुंदरीए कुच्छीए । तो तीए मुहे दिट्ठो सोमो सुमिणम्मि पविसंतो ॥१२॥
दट्ठूण तयं सुमिणं हरिसवसुब्भिज्जमाणरोमंचा । उट्ठित्तु विगयनिद्दा सुमिणं साहेइ दइयस्स ॥१३॥
राया वि साहइ तओ नियमइमाहप्पमुणियसुविणत्थो । कुरुजणवय[१]नरचंदो होही पुत्तो पिए ! तुज्झ ॥१४॥
एवं होउ त्ति पयंपिऊण संजायगरुयआणंदा । संपज्जंतसमीहियमणोरहा गब्भमुव्वहइ ॥१५॥
अह सा देवी पुत्तं पसत्थसव्वंगलक्खणावयवं । पसवइ पसत्थदियहे नवमासऽद्धट्ठमदिणेहिं ॥१६॥
तं च पसरंतनियतणुकिरणकडप्पप्पयासियदियंतं । दट्ठुं सहरिससंभमखलंतपयगमणसंचारा ॥१७॥

---

अथान्यदाकदाचिदम्मापितरौ वञ्चित्वा चलिता: । द्रविणाय रत्नद्वीपे द्रोणाभिधानैककर्मकरा: ॥ ५ ॥
व्रजतां तेषां समागता कुत्रचिद्विकटाटवी । ततस्तैस्तत्र प्रतिमाप्रतिपन्नो मुनिवरो दृष्ट: ॥ ६ ॥
हर्षापूरितहृदयैस्तदनु गुरुभक्तिनिर्भरं भणित: । शम्बलमिदं द्रोणक ! देहि मुनीन्द्रायैतस्मै ॥ ७ ॥
सोऽपि मुनिदानश्रद्धाभक्तिभरोद्भिन्नभूरिरोमाञ्च: । विकसद्वदनकमल: प्रतिलाभयति मुनिवरमुदारम् ॥ ८ ॥
प्राप्ताश्च रत्नद्वीपं क्रमेण स्वर्जितभूरिधननिवहा: । ततश्च प्रतिनिवृत्ता: प्राप्ता निजनगरमचिरेण ॥ ९ ॥
विलसन्ति धनं पालयन्ति परिजनं गुरुजनमपि पूजयन्ति: । दीनेभ्यो ददति दानं कुर्वन्ति मित्राणां सन्मानम् ॥ १० ॥
ईषत्समायं धनपति-धनेश्वरौ व्यवहरत: कालेन । निजकायु:समाप्त्या द्रोणो मृत्वा समुत्पन्न: ॥ ११ ॥
गजपुरनगरे दुष्प्रधर्षराजान: सुन्दर्या: कुक्षौ । तदा तया मुखे दृष्ट: सोम: स्वप्ने प्रविशन् ॥ १२ ॥
दृष्ट्वा तकं स्वप्नं हर्षवशोद्भिद्यमानरोमाञ्चा । उत्थाय विगतनिद्रा स्वप्नं कथयति दयितस्य ॥ १३ ॥
राजाऽपि कथयति ततो निजमतिमाहात्म्यमुणितस्वप्नार्थ: । कुरुजनपदनरचन्द्रो भविष्यति पुत्र: प्रिये ! तव ॥ १४ ॥
एवं भवत्विति प्रजल्प्य सञ्जातगुरुकानन्दा । सम्पद्यमानसमीहितमनोरथा गर्भमुद्वहति ॥ १५ ॥
अथ सा देवी पुत्रं प्रशस्तसर्वाङ्गलक्षणावयवम् । प्रसूते प्रशस्तदिवसे नवमासार्द्धाष्टमदिनै: ॥ १६ ॥
तं च प्रसरन्निजतनुकिरणकलापप्रकाशितदिगन्तम् । दृष्ट्वा सहर्षसम्भ्रमस्खलत्पदगमनसञ्चारा ॥ १७ ॥

---

१. नहचंदो रं०।

**तुरियगमवसविसंठुलरसणारणझणिरकिंकिणिकलावा । वद्धावइ नरनाहं पियंकरा दासचेडि त्ति ॥१८॥**

**तव्वयणसवणसंजायपहरिसो तीए वियरइ नरिंदो । केऊर-कडय-कुंडल-कंठाहरणायलंकारं ॥१९॥**

**दाऊण कणयजीहं दासत्तं अवणिऊण सप्पणयं । तत्तो वद्धावणयं राया नयरे समाइसइ ॥२०॥**

**तथाहि-**

**किज्जंतविविहरक्खं संपूइज्जंतदेवयसमूहं । कप्पूरमिस्सचंदणरससिंचिज्जंतरच्छोहं ॥२१॥**

**मुच्चंतगोत्तिवग्गं घोसाविज्जंतअभयदाणं च । दिज्जंतमहादाणं सम्माणिज्जंतपउरजणे ॥२२॥**

**पविसंतमाउलगणं पउणीकिज्जंतकणयमयकलसं । उब्भिज्जंतसुतोरणमु[१]द्दाविज्जंतविंटलियं ॥२३॥**

**किज्जंतमंगलसयं परिवाइज्जंततूरसमुदायं । हरिसाऊरियनच्चिररमणीतुट्टंतहारलयं ॥२४॥**

**एवं वद्धावणयं काउं सुपसत्थबारसमदिवसे । तस्स कुरुचंद नामं विहियं सुमिणाणुसारेणं ॥२५॥**

**अणुदियहं गहियकलो वड्ढंतो सह गुणेहिं तो कुमरो । तरुणियणमणभिरामं संपत्तो जोव्वणारंभं ॥२६॥**

**तं कइ[२]विवाहकम्मं वसुंधराभारबंधुरं नाउं । पव्वज्जकज्जसज्जो रज्जे राया निवेसेइ ॥२७॥**

**जाओ य महाराओ पडुपयडपयावपत्तमाहप्पो । दरियारिमत्तमायंगकेसरी केलिकुलभवणं ॥२८॥**

**एत्तो य वसंतपुरे सुधणो मरिउं वसंतदेवो त्ति । सेट्ठिसुओ संजाओ संपत्तो जोव्वणं परमं ॥२९॥**

---

त्वरितगमवशविसंस्थूलरसनारणझणत्किङ्किणिकलापा । वर्धापयति नरनाथं प्रियङ्करा दासचेटीति ॥ १८ ॥

तद्वचनश्रवणसञ्जातप्रहर्षस्तस्यै वितरति नरेन्द्रः । केयूर-कटक-कुण्डल-कण्ठाभरणालङ्कारम् ॥ १९ ॥

दत्त्वा कनकजीह्वा दासत्वमपनीय सप्रणयम् । ततो वर्द्धापनकं राजा नगरे समादिशति ॥ २० ॥

तथाहि -

क्रियमाणविविधरक्षं सम्पूज्यमानदेवकसमूहम् । कर्पूरमिश्रचन्दनसिञ्च्यमानरथ्यौघम् ॥ २१ ॥

मुञ्चद्गोत्रिवर्गं घोष्यमाणाभयदानञ्च । दीयमानमहादानं सन्मान्यमानपौरजनम् ॥ २२ ॥

प्रविशत्मातुलगणं प्रगुणीक्रियमाणकनकमयकलशम् । उद्भिद्यमानसुतोरणमवच्छिद्यमानविंटलिकम् ॥ २३ ॥

क्रियमाणमङ्गलशतं परिवाद्यमानयन्त्रतूर्यसमुदायम् । हर्षापूरितनृत्यद्रमणीत्रुटद्धारलतम् ॥ २४ ॥

एवं वर्द्धापनं कृत्वा सुप्रशस्तद्वादशमदिवसे । तस्य कुरुचन्द्रो नामं विहितं स्वप्नानुसारेण ॥ २५ ॥

अनुदिवसं गृहीतकलो वर्धमानस्ततः सहगुणैस्तदा कुमारः । तरुणिजनमनोऽभिरामं संप्राप्तो यौवनारम्भम् ॥ २६ ॥

तं कृतविवाहकर्माणं वसुन्धराभारबन्धुरं ज्ञात्वा । प्रव्रज्याकार्यसज्जो राज्ये राजा निवेशयति ॥ २७ ॥

जातश्च महाराजः पटुप्रकटप्रतापप्राप्तमाहात्म्यः । दारितारिमत्तमातङ्गकेसरी केलिकुलभवनम् ॥ २८ ॥

इतश्च वसन्तपुरे सुधनो मृत्वा वसन्तदेव इति । श्रेष्ठिसुतः सञ्जातः सम्प्राप्तो यौवनं परमम् ॥ २९ ॥

---

१. द्दालिज्जंत रं० । २. कृतविवाहकर्माणम् ।

**कत्तियपुरम्मि रम्मे धणओ मरिऊण कामपालो त्ति । उप्पन्नो सेट्ठिसुओ कलाकलावेसु अइकुसलो ॥३०॥**

**धणवइजीओ मरिउं मइरानामेण संखनयरम्मि । उप्पन्ना सेट्ठिसुया आरूढा तारतारुन्नं ॥३१॥**

**मरिउं धणीसरो वि हु जाओ य जयंतियाए नयरीए । रूयजुया सेट्ठिसुया मणोहरा केसरा नाम ॥३२॥**

**इओ य-**

**खर-करह-वसह-वाहणसणाहबहुसत्थसंजुओ पत्तो । नयरीए जयंतीए वसंतदेवो वणिज्जेण ॥३३॥**

**एत्थंतरे वसंतो संपत्तो सह अणंगवीरेण । कुव्वंतो भुवणयलं परव्वसं कुसुमबाणेहिं ॥३४॥**

**तथाहि-**

**कामीहिं समं कुव्वंति महुयरा जत्थ सुरभिमहुपाणं । अंदोलएण सद्धिं अंदोलइ पहियजणचित्तं ॥३५॥**

**विरहिणिसासेहिं समं सोवचया मलयमारुया जाया । सह सिंगारजणेणं साहीहिं कओ कुसुमबंधो ॥३६॥**

**सद्धिं पउत्थवइयादुहेहिं दियहा य वड्ढिउं लग्गा । [1]उज्जंभिओ व मयणो सह कुसुमरएण भुवणयले ॥३७॥**

**सह मिहुणसुरयकूइयसरेण कूयंति कोइलकुलाइं । उवलद्धमहुसमागमपियाहिं सह हसइ वणराई ॥३८॥**

**झिज्जंति सह विओइयजणेण रयणीओ अणुदिणं जत्थ । परितावइ भुवणयलं तरणी सह कुसुमबो[2]णेहिं ॥३९॥**

**सह माणिणीण माणेण विरहिणीणं गलंति वलयाइं । पेसइ पियासु सह दूइयाहिं हिययाणि दइयजणो ॥४०॥**

---

कार्तिकपुरे रम्ये धनदो मृत्वा कामपाल इति । उत्पन्नः श्रेष्ठिसुतः कलाकलापेष्वतिकुशलः ॥ ३० ॥

धनपतिजीवो मृत्वा मदिरानाम्ना शङ्खनगरे । उत्पन्ना श्रेष्ठिसुताऽऽरुढा तारतारुण्यम् ॥ ३१ ॥

मृत्वा धनेश्वरोऽपि खलु जातश्च जयन्त्यां नगर्याम् । रुपयुता श्रेष्ठिसुता केसरा नाम ॥ ३२ ॥

इतश्च -

खर-करभ-वृषभ-वाहनसनाथबहुसार्थसंयुक्तः प्राप्तः । नगर्यां जयन्त्यां वसन्तदेवो वाणिज्येन ॥ ३३ ॥

अत्रान्तरे वसन्तः सम्प्राप्तः सहानङ्गवीरेण । कुर्वन् भुवनतलं परवशं कुसुमबाणैः ॥ ३४ ॥

तथाहि -

कामिभिः समं कुर्वन्ति मधुकरा यत्र सुरभिमधुपानम् । आन्दोलनेन सार्द्धमान्दोलयति पथिकजनचितम् ॥ ३५ ॥

विरहिणिश्वासैः समं सोपचया मलयमारुता जाता । सह शृङ्गारजनेन शाखिभिः कृतः कुसुमबन्धः ॥ ३६ ॥

सार्द्धं प्रौषितभर्तृकादुखै दिवसाश्च वर्धितुं लग्नाः । उज्जृम्भितश्चमदनः सह कुसुमरजसा भुवनतले ॥ ३७ ॥

सह मिथुनसुरतकूजितस्वरेण कूजन्ति कोकिलकुलानि । उपलब्धमधुसमागमप्रियाभिः सह हसति वनराजी ॥ ३८ ॥

क्षियन्ति सह वियोगिकजनेन रजन्योऽनुदिनं यत्र । परितापयति भुवनतलं तरणी सह कुसुमबाणैः ॥ ३९ ॥

सह मानिनीनां मानेन विरहिणीनां गलन्ति वलयानि । प्रेषयति प्रियासु सह दूतीकाभि र्हृदयानि दयितजनः ॥ ४० ॥

---

१. उज्जंभिउ व्व रं०। २. बाणेण रं ।

अन्नं च-

सह कुरबएण कामी कामिणिपरिरंभमीहए कोइ । सह केसरेण रमणीमयरागंडूसमह अन्नो ॥४१॥

पियपण्हिपहारेणं अन्नो विहसेइ सह असोएण । तिलएण समं तरुणो तरुणिकडक्खेहिं विहसेइ ॥४२॥

सह विरहएण विरही अन्नो अहिलसइ पंचमुग्गारं । सह चंपएण अन्नो अब्भत्थइ सुरहिवरसलिलं ॥४३॥

कामीहिं समं एगिंदिया वि जायंति जत्थ विसयवसा । तत्थ वसंते संते पंचेंदीणं तु का गणणा ? ॥४४॥

एयारिसे वसंते संपत्ते मयणतेरसीदिवसे । पत्तो वसंतदेवो उज्जाणे रायनंदणए ॥४५॥

दिट्ठा य तत्थ सहिययणपरिवुडा कामकेलिकुलभवणं । विहिविन्नाणपगरिसा नवजोव्वणमणहरा बाला ॥४६॥

तो चिंतउं पयत्तो किं एसा कामएववरघरिणी ? । उज्जाणसिरी अहवा ? उयाहु पायालकन्न ? त्ति ॥४७॥

इय चिंतंतो एसो तीए वि हु दिट्ठिगोयरे पडिओ । पुव्वभवब्भासाओ मिलिया अवरोप्परं दिट्ठी ॥४८॥

आपुच्छिओ पियंकरनामो तप्पुरवरीए वत्थव्वो । उप्पन्नमित्तभावो वसंतदेवेण का एसा ? ॥४९॥

सो भणइ इह पुरीए वत्थव्वयपंचनंदिसेट्ठिस्स । धूया जयंतदेवस्स केसरा नाम लहुबहिणी ॥५०॥

पारद्धो तेण तओ नेहो सद्धिं जयंतदेवेण । भुंजाविओ नियगिहे जयंतदेवो सबहुमाणं ॥५१॥

तेण वि वसंतदेवो निमंतिओ नियगिहम्मि जा नीओ । ता पेच्छइ तं बालं रइं व रहियं अणंगेण ॥५२॥

तीए वि इमो दिट्ठो जयंतदेवस्स पाणिपउमाओ । वरसुरहिकुसुममालं गिण्हंतो कुसुमबाणो व्व ॥५३॥

---

अन्यच्च -

सह कुरबकेन कामी कामिनिपरिरम्भमीहते कोऽपि । सह[१] केसरेण रमणीमदिरागण्डूषमथान्यः ॥ ४१ ॥

प्रियापार्ष्णिप्रहारेणान्यो विहसति सहाशोकेन । तिलकेन समं तरुणस्तरुणिकटाक्षै र्विहसति ॥ ४२ ॥

सह विरहकेन विरह्यन्योऽभिलषति पञ्चमोद्गारम् । सह चम्पकेनान्योऽभ्यर्थति सुरभिवरसलिलम् ॥ ४३ ॥

कामिभिः सममेकेन्द्रिया अपि जायन्ते यत्र विषयवशाः । तत्र वसन्ते सति पञ्चेन्द्रियाणां तु का गणना ? ॥ ४४ ॥

एतादृशे वसन्ते सम्प्राप्ते मदनत्रयोदशीदिवसे । प्राप्तो वसन्तदेव उद्याने राजनन्दनके ॥ ४५ ॥

दृष्टा च तत्र सखीजनपरिवृत्ता कामकेलिकुलभवनम् । विधिविज्ञानप्रकर्षा नवयौवनमनोहरा बाला ॥ ४६ ॥

ततश्चिन्तयितुं प्रवृतः किमेषा कामदेववरगृहिणी ? । उद्यानश्रीरथवा ? उदाहु पातालकन्येति ? ॥ ४७ ॥

इति चिन्तयन्नेष तस्या अपि खलु दृष्टिगोचरे पतितः । पूर्वभवाभ्यासान्मिलिता परस्परं दृष्टिः ? ॥ ४८ ॥

आपृष्टः प्रियङ्करनाम तत्पुरवर्यां वास्तव्यः । उत्पन्नमित्रभावो वसन्तदेवेन कैषा ? ॥ ४९ ॥

स भणतीह पूर्यां वास्तव्यपञ्चनन्दिश्रेष्ठिनः । दुहिता जयन्तदेवस्य केसरा नाम लघुभगिनी ॥ ५० ॥

प्रारब्धस्तेन तत स्नेहः सार्धं जयन्तदेवेन । भोजितो निजगृहे जयन्तदेवः सबहुमानम् ॥ ५१ ॥

तेनापि वसन्तदेवो निमन्त्रितो निजगृहे यावन्नीतः । तावत्पश्यति तां बालां रतिमिव रहितामनङ्गेन ॥ ५२ ॥

तयाप्ययं दृष्टो जयन्तदेवस्य पाणिपद्मात् । वरसुरभिकुसुममालां गृहण्कुसुमबाण इव ॥ ५३ ॥

---

१. कोइ स्त्रीको मदिराका घूंट पीलाता हैं । रमण्यै मदिरायाः गण्डूषम् इत्यर्थः ।

**अवरोप्परं पि दोहि वि जणेहि नियहिययपेसणसणाहा । पट्ठविया नियदिट्ठी दूइ व्व समागमनिमित्तं ॥५४॥**
**अन्नोन्ननयणजुयलावलोयणुप्पन्ननेहसारेण । ते के वि ताण जाया भावा जे ते च्चिय मुणंति ॥५५॥**
**हिययब्भंतरघोलंतनेहभरमंथरेहिं नयणेहिं । ताणऽन्नोन्नपलोयणपराण जायं अणिमिसत्तं ॥५६॥**
**तत्तो पियंकराए धाईधूयाए ताण अन्नोन्नं । नवनेहनिब्भरालसदिट्ठिप्पसरं पलोएउं ॥५७॥**
**भणिया एसा सामिणि ! जुत्तं तुज्झ वि इमस्स सम्माणं । काउं तओ पयंपइ तप्पुरओ केसरा एयं ॥५८॥**
**तं चेव जहाजुत्तं जाणसि भणिए समप्पए सा वि । सह कक्कोलफलेहिं पियंगुतरुमंजरी तस्स ॥५९॥**
**भणियं च तीए गंतुं पट्ठविया मज्झ सामिणीए इमा । सह कक्कोलफलेहिं पियंगुतरुमंजरी तुज्झ ॥६०॥**
**अन्नं च-**
**धिज्जमवलंबिरीए गुरुयणपुरओ तुमम्मि वोलीणे । पडिओ से अच्छिनिमीलणेण परिपीडिओ बाहो ॥६१॥**
**कस्स भरसि त्ति ? भणिए को मे अत्थि ? त्ति जंपमाणीए । [१]उब्बिबिररुइरीए अम्हे वि रुयाविया तीए ॥६२॥**
**रुइरीए रुयावियपरियणाए तुह सुहय ! पेसविज्जंतो । न समप्पइ ओसरसुंभिएहिं लहुओ वि संदेसो ॥६३॥**
**गिण्हित्तु तयं वि समप्पियं तीए मुद्दियारयणं । भणियं नेहेण जहा पियाणुरूवं विहेयव्वं ॥६४॥**
**एवं च पणयपुव्वं पडिवज्जिय पडिगया गिहे तत्तो । साहेइ केसराए तं सोउं सा वि परितुट्ठा ॥६५॥**

---

परस्परमपि द्वाभ्यामपि जनाभ्यां निजहृदयप्रेषणसनाथा । प्रस्थापिता निजदृष्टि र्दूतीव समागमनिमित्तम् ॥ ५४ ॥
अन्योऽन्यनयनयुगलावलोकनोत्पन्नस्नेहसारेण । ते केऽपि तयोर्जाता भावा ये तौ चैव मुणतः ॥ ५५ ॥
हृदयाभ्यन्तरघोलयन्स्नेहभरमन्थरैर्नयनैः । तयोरन्योन्यप्रलोकनपरयोर्जातमनिमेषत्वम् ॥ ५६ ॥
ततः प्रियङ्करया धात्रीदुहित्रा तयोरन्योन्यम् । नवस्नेहनिर्भरालशदृष्टिप्रसरं प्रलोक्य ॥ ५७ ॥
भणितैषा स्वामिनि ! युक्तं तवाप्येतस्य सन्मानम् । कर्तुं ततः प्रजल्पति तत्पुरतः केसरैतत् ॥ ५८ ॥
त्वं चैव यथोक्तं जानासि भणिते समर्पयति साऽपि । सह कङ्कोलफलैः प्रियङ्गुतरुमञ्जरीं तस्य ॥ ५९ ॥
भणितं च तया गत्वा प्रस्थापिता मम स्वामिन्येमा । सह कङ्कोलफलैः प्रियङ्गुतरुमञ्जरीं तव ॥ ६० ॥
अन्यच्च -
धैर्यमवलम्बिन्यां गुरुजनपुरतस्त्वयि गते । पतितस्तस्याक्षिनिमीलनेन परिपीडितो बाष्पः ॥ ६१ ॥
कस्य स्मरसीति भणिते को ममास्ति ? इति जल्पन्त्या । उद्विग्नरुदन्त्या वयमपि रोदितास्तया ॥ ६२ ॥
रुदन्त्या रोदितपरिजनया तव सुभग ! प्रेष्यमाणः । न समर्पयत्यवसरशुल्कै र्लघुकोऽपि सन्देशः ॥ ६३ ॥
गृहीत्वा तकं तेनापि समर्पितं तस्या मुद्रिकारत्नम् । भणितं स्नेहेन यथा प्रियानुरूपं विधातव्यम् ॥ ६४ ॥
एवं च प्रणयपूर्वं प्रतिपद्य प्रतिगता गृहे ततः । कथयति केसरायास्तच्छ्रुत्वा साऽपि परितुष्टा ॥ ६५ ॥

---

१. उब्बिबिर-उद्विग्न०।

**तत्तो वसंतदेवो उव्वूढो केसराए सुविणम्मि । तेण वि सा परिणीया रयणीए अह पभायम्मि ॥६६॥**
**कहिओ पियंकराए नियसुविणो केसराए तुट्ठाए । तम्मि समयम्मि केणइ भणियं एवं इमं होही ॥६७॥**
**तं निसुणिउं पयंपइ पियंकरा निच्छएण तुह होही । भत्ता वसंतदेवो ता वंधसु सउणगंठि त्ति ॥६८॥**
**तत्तो पियंकराए वसंतदेवस्स साहिओ सुमिणो । सो परितुट्ठो चिंतइ संवाई सुमिणगो एसो ॥६९॥**
**सम्माणिया समाणी पियंकरा तेण जंपए एवं । बंधित्तु सउणगंठिं समप्पिओ तीए तुह अप्पा ॥७०॥**
**एवमवरोप्परं पि हु पउत्तिसंपायणेण पइदियहं । अक्कमइ कोइ कालो ता निसुणह तत्थ जं जायं ॥७१॥**
**गंभीरतूरघोसो तेण सुओ पंचनंदिगेहम्मि । सवियक्केणं दासी पट्ठविया तप्पउत्तिकए ॥७२॥**
**नाउं समागया सा साहइ जह अज्ज वरणयं जायं । दिन्ना कन्ना कन्नउजवासिवरदत्तसेट्ठिस्स ॥७३॥**
**जायं वद्धावणयं वज्जिरवरतूरबहिरियदियंतं । गिज्जंतमंगलसरं सिंगारियबालियासत्थं ॥७४॥**
**करकलियअक्खवत्तयपविसिरवरनारिनियररमणीयं । निस्सरिरपवरकुंकमदिन्नमुहालेवरमणियणं ॥७५॥**
**तं सोउं सो पडिओ मुच्छाविहलंधलो धरणिवीढे । सीयलजलेण सित्तो सचेयणो चिंतए एवं ॥७६॥**
**तग्गय ! तयाणुरत्तय ! तस्सुक्कंठलय ! तग्गुणदुहत्त ! । तव्विरहवज्जनिहणिय ! हियय ! तए किहविणोइस्सं ? ॥७७॥**
**अच्छीणि ताव तं पेच्छिराइं रोयंतु अहव फुट्टंतु । हियय ! तए किं विहियं जमवत्थं वहसि मरणसमं ? ॥७८॥**
**हे हियय ! जइ न सक्का तं मोत्तुं ता ममं परिच्चयसु । वारियवामेण तए सद्धिं को मज्झ वावारो ? ॥७९॥**

---

ततो वसन्तदेव उद्वोढःकेसरया स्वप्ने । तेनापि सा परिणीता रजन्यामथ प्रभाते ॥ ६६ ॥
कथितः प्रियङ्कराया निजस्वप्नः केसरया तुष्टया । तस्मिन्समये केनचिद्भणितमेवमिदं भविष्यति ॥ ६७ ॥
तन्निश्रुत्य प्रजल्पति प्रियङ्करा निश्चयेन तव भविष्यति । भर्ता वसन्तदेवस्ततो बधाण शकुनग्रन्थिरिति ॥ ६८ ॥
ततःप्रियङ्करया वसन्तदेवस्य कथितः स्वप्नः । स परितुष्टश्चिन्तयति संवादी स्वप्न एषः ॥ ६९ ॥
सन्मानिता सती प्रियङ्करा तेनजल्पत्येवम् । बद्ध्वा शकुनग्रन्थि सर्मर्पितस्तया तवाऽऽत्मा ॥ ७० ॥
एवमपरापरमपि खलु प्रवृत्तिसंपादनेन प्रतिदिवसम् । आक्रामति कश्चित्कालस्तावन्निश्रृणुत तत्र यज्जातम् ॥ ७१ ॥
गम्भीरतूर्यघोषस्तेन श्रुतः पञ्चनन्दिगृहे । सविकल्पेन दासी प्रस्थापिता तत्प्रवृत्तिकृते ॥ ७२ ॥
ज्ञात्वा समागता सा कथयति यथाऽद्य वरणकं जातम् । दत्ता कन्या कन्यकुब्जवासिवरदत्तश्रेष्ठिनः ॥ ७३ ॥
जातं वर्धापनकं वाद्यद्वरतूर्यबधिरितदिगन्तम् । गीयमानन्मङ्गलस्वरं श्रृङ्गारितबालिकासार्थम् ॥ ७४ ॥
करकलिताक्षपत्रकप्रविशद्वरनारिनिकररमणीयम् । निस्सरत्प्रवरकुङ्कुमदत्तमुखालेपरमणिजनम् ॥ ७५ ॥
तच्छ्रुत्वा स पतितो मूर्च्छाविह्वलान्धलो धरणिपीठे । शीतलजलेन सिक्तः सचेतनश्चिन्तयत्येवम् ॥ ७६ ॥
तद्गत ! तदानुरक्तक ! तस्योत्कण्ठलक ! तद्गुणदुःखार्त्त । तद्विरहवज्रनिहत ! हृदय ! त्वया कथं विनोदयिष्यामि ॥७७॥
अक्षीणि तावत्तां पश्यन्ती रुदन्त्वथवा स्फुटन्तु । हृदय ! त्वया किं विहितं यदवस्थां वहसि मरणसमाम् ? ॥ ७८ ॥
हे हृदय ! यदि न शक्यास्त्वां मोक्तुं तावन्मां परित्यज । वारितव्यामेन त्वया सार्धं को मम व्यापारः ? ॥ ७९ ॥

**हियय ! निहुयं किलम्मसु निच्चं चिय खिज्जवेसु अत्ताणं । परवसजणाणुलग्गिर ! बहुयं खु तए सहेयव्वं ॥८०॥**

**रे हियय ! किं विसूरसि ? किं तम्मसि ? किं खु भग्ग ! कलमलसि ? । दुल्लहलंभम्मि जणे अणुबंधे एरिसं होइ ॥८१॥**

**हा हियय ! निरंतरनेहपेसले माणुसम्मि वोलीणे । कह विसहिसि विरहुप्पन्नदुक्खकरवत्तकप्परणं ? ॥८२॥**

**दुक्खेसु जइ विराओ जइ राओ सोक्खजीवियव्वम्मि । तुह हियय ! हियं भणिमो तम्मि जणे मुयसु पडिबंधं ॥८३॥**

**इय सो वसंतदेवो झूरंतो जाव चिट्ठए तत्थ । एत्थंतरम्मि पत्ता पियंकरा पेसिया तीए ॥८४॥**

**सत्थीकाऊण तयं साहइ सा तीए तस्स संदेसं । खिज्जेयव्वं न तए जायं जं वरणयं मज्झ ॥८५॥**

**जओ-**

**पुव्वाणुरायविसरिसमणुचिट्ठिस्सं न नाह ! मरणे वि । किंतु मह चित्तभावं न य जाणइ गुरुयणो जेण ॥८६॥**

**वज्जित्तु तुमं भत्ता नऽन्नो मह होइ इह भवे नाह ! । जइ एयमन्नहा कह वि होइ पविसेमि ता जलणे ॥८७॥**

**तं सोउं सो हरिसियहियओ एवं पयंपिउं लग्गो । एस गई अम्हाण वि भणिऊणं तं विसज्जेइ ॥८८॥**

**एवं त ताण पइदिणसमागमोवायदिन्नहिययाण । जा जाइ कोई कालो ता पत्ता तत्थ जन्नत्ता ॥८९॥**

**तत्तो वसंतदेवो तव्वीवाहं सुणित्तु दुक्खत्तो । नयराओ नीहरिओ उज्जाणगओ विचिंतेइ ॥९०॥**

**अन्यथैव विचिन्त्यन्ते पुरुषेण मनोरथाः । दैवा( दा ) हितसद्भावाः कार्याणां गतयोऽन्यथा ॥९१॥**

**ता पेच्छ केरिसमिणं संजायं[१] कम्मपरिणइवसेण ? । मह दंसिऊण दइया दइवेणुद्दालिया जेण ॥९२॥**

---

हृदय ! निधुतं क्लामय नित्यमेव खेदयात्मनाम् । परवशजनानुलग्न ! बहुकं खलु त्वया सोढव्यम् ॥ ८० ॥

रे हृदय ! किं विषीदसि ? किं ताम्यसि ? किं खलु भग्न ! कलमलसि ? । दुर्लभलम्भे जनेऽनुवन्ध इदृशं भवति ॥८१॥

हा हृदय ! निरन्तर स्नेहपेशले मानुष्ये गते । कथं विसहसे विरहोत्पन्नदुःखकरपत्रकल्पनम् ? ॥ ८२ ॥

दुःखेषु यदि विरागो यदि रागः सौरव्यजीवितव्ये । तव हृदय ! हितं भणामि तस्मिञ्जने मुञ्च प्रतिबन्धम् ॥ ८३ ॥

इति स वसन्तदेवो विलपद्यावत्तिष्ठति तत्र । अत्रान्तरे प्राप्ता प्रियङ्करा प्रेषिता तया ॥ ८४ ॥

स्वस्थीकृता तकं कथयति सा तस्यास्तस्य सन्देशम् । रुष्टव्यं न त्वया जातं च वरणकं मम ॥ ८५ ॥

यतः -

पूर्वानुरागविसदृशमनुचरिष्यामि न नाथ ! मरणेऽपि । किन्तु मम चित्तभावं न च जानाति गुरुजनो येन ॥ ८६ ॥

वर्जयित्वा त्वां भर्ता नाऽन्यो ममेह भवे नाथ ! । यद्येतदन्यथा कथमपि भविष्यति प्रविशामि तदा ज्वलने ॥ ८७ ॥

तच्छ्रुत्वा स हर्षितहृदय एवं प्रजल्पितुं लग्नः । एषा गतिरस्माकमपि भणित्वा तां विसर्जयति ॥ ८८ ॥

एवं च तयोः प्रतिदिनसमागमोपायदत्तहृदययोः । यावद्याति कश्चित्कालस्तावत्प्राप्ता तत्र [२]जन्ययात्रा ॥ ८९ ॥

ततो वसन्तदेवस्तद्विवाहं श्रुत्वा दुःखार्तः । नगरान्निसृत उद्यानगतो विचिन्तयति ॥ ९० ॥

तावत्पश्य कीदृशमिदं सञ्जातं कर्मपरिणतिवशेन ? । मम दर्शयित्वा दयिता दैवेनाच्छिन्ना येन ॥ ९२ ॥

---

१. संजायइ कम्म० रं० । २. 'जान' इति भाषायाम् ।

**अवरं च पुव्वपडिवन्नभावओ तीए जा न अमणुन्नं । आयन्नेमि सयं चिय ता मह मरणं हवउ सरणं ॥९३॥**
**इय चिंतिऊण उव्बंधिऊण अप्पा असोयसाहाए । जा मुक्को ता भमियं अजसेण समं दिसाचक्कं ॥९४॥**
**लोयणजुयलेण समं निमीलियं तस्स सयलभुवणयलं । रुद्धो गलसरणिपहो सद्धिं सिव-सग्गमग्गेण ॥९५॥**
**एत्थंतरम्मि मा साहसं ति मा साहसं ति भणिरेण । उल्ललिऊणं केणइ छिन्नो छुरियाए तप्पासो ॥९६॥**
**वत्थंचलानिलेणं सत्थीकाउं पयंपए एसो । भद्द ! तए किं विहियं जं जुत्तं विलयवग्गस्स ? ॥९७॥**
**अलमेत्थ मह कहाए सुपुरिस ! सप्पुरिसकयविरायाए । गुरुदुक्खजलणजालाकलावकवलणसरूवाए ॥९८॥**
**भणियं पुणो वि तेणं जइ एवं भद्द ! तह वि मह कहसु । विन्नायतस्सरूवो जेण उवायं विचिंतेमि ॥९९॥**
**कहिओ वसंतदेवेण तस्स उवयाररंजियमणेण । सव्वो वि केसराए वुत्तंतो भणइ तो इयरो ॥१००॥**
**अत्थि उवाओ तुह जेण होइ निच्चं पि दंसणं तीए । मज्झ अहन्नस्स पुणो न उवाओ दंसणं नेय ॥१०१॥**
**न परिच्चयामि पाणे तह वि अहं जेण पावए भद्दं । जीवंतो एत्थ नरो कइया[1] वि जओ इमं भणियं ॥१०२॥**
**सत्या लोकश्रुतिरियं जीवन् भद्राणि पश्यति । वासुदेवसहायोऽपि यो मृतो एव सः ॥१०३॥**
**जंपइ वसंतदेवो दुक्खं तुह केरिसं कह व जायं ? । को य तुमं ? इय भणिए भणइ तओ सो वि निसुणेसु ॥१०४॥**
**कत्तियपुरवत्थव्वो इब्भसुओ कामपालनामो हं । जोव्वणभयउम्मत्तो विणिग्गओ देसियालीए ॥१०५॥**
**पत्तो य संखनयरे तत्थ तया संख( ग्रं. १००० )पालजक्खस्स । जत्तानिरूवणत्थं विणिग्गओ सयलपुरलोओ ॥१०६॥**

अपरं च पूर्वप्रतिपन्नभावतस्तस्या यावन्नामनोज्ञम् । आकर्णयामि स्वयमेव तावन्मम मरणं भवतु शरणम् ॥ ९३ ॥
इति चिन्तयित्वोद्बध्यात्माऽशोकशाखायाम् । यावन्मुक्तस्तावद्भ्रमितमयशसा समं दिक्चक्रम् ॥ ९४ ॥
लोचनयुगलेन समं निमिलितं तस्य सकलभुवनतलम् । रुद्धो गलसरणिपथःसार्द्धं शिव-स्वर्गमार्गेण ॥ ९५ ॥
अत्रान्तरे मा साहसमिति मा साहसमिति भणता । उल्लप्य केनचिच्छिन्नश्छुरिकया तत्पाशः ॥ ९६ ॥
वस्त्राञ्चलानिलेन स्वस्थीकृत्य प्रजल्पत्येषः । भद्र ! त्वया किं विहितं यद्युक्तं वनितावर्गस्य ? ॥ ९७ ॥
अलमत्र मम कथया सुपुरुष ! सुपुरुषकृतविरागया । गुरुदुःखज्वलनज्वालाकलापकवलनस्वरुपया ॥ ९८ ॥
भणित पुनरपि तेन यद्येवं भद्र ! तथापि मम कथय । विज्ञाततत्स्वरुपो येनोपायं विचिन्तयामि ॥ ९९ ॥
कथितो वसन्तदेवेन तस्योपकाररञ्जितमनसा । सर्वोऽपि केसराया वृत्तान्तो भणति तदेतरः ॥ १०० ॥
अस्त्युपायस्तव येन भवति नित्यमपि दर्शनं तस्याः । ममाधन्यस्य पुन र्नोपायो दर्शनं नैव ॥ १०१ ॥
न परित्यजामि प्राणांस्तथाप्यहं येन प्राप्नोति भद्रम् । जीवन्नत्र नरः कदाचिदपि यत इदं भणितम् ॥ १०२ ॥
जल्पति वसन्तदेवो दुःखं तव कीदृशं कथं वा जातम् ? । कश्च त्वम् ? इति भणिते भणति ततःसोऽपि निशृणु ॥१०४॥
कार्तिकपुरवास्तव्य इभ्यसुतः कामपालनामोऽहम् । यौवनमदोन्मत्तो विनिर्गतो [2]देशकाल्या ॥ १०५ ॥
प्राप्तश्च शङ्खनगरे तत्र तदा शङ्खपालयक्षस्य । यात्रानिरुपणार्थं विनिर्गतः सकलपुरलोकः ॥ १०६ ॥

१. कयाइ वि रा० । २. 'देशाटन' इति भाषायाम् ।

**अहयं पि तत्थ पत्तो कीलारसनिब्भरे अह पयट्टे । सहयारतरुतलम्मि दिट्ठा बाला मए एक्का ॥१०७॥**

**जाव निरिक्खेमि तयं ताव य रइसरिसरूय[1]भंतीए । ईसाइ व मयणेणं विद्धो हिययम्मि बाणेहिं ॥१०८॥**

**दट्ठूण मम सा वि हु नवनेहुक्कंठिया सहत्थेण । जा पेसइ तंबोलं हलबोलो ता समुच्छलिओ ॥१०९॥**

**एत्थंतरम्मि तीए पलाइयं सहियणेण सा कह वि । जाव न सक्कइ गंतुं संपत्तो ताव मत्तकरी ॥११०॥**

**गयपयडो वररयणो निरंकुसो पवरपउमकयसोहो । भग्गवरमत्तवारणवावारो पवरआरक्खो ॥१११॥**

**अप्पडियारो भूसासमन्निओ निहयनियडमाहप्पो । एवंविहगुणजुत्तो दुहा वि सव्वत्थ वत्तव्वो ॥११२॥**

**तो सुंडादंडेणं जा किर तं गिण्हए पलवमाणिं । दढमुट्ठिपहारेणं पहओ पट्ठीए ताव मए ॥११३॥**

**तत्तो तं मोत्तूणं वलियो मह सम्मुहो करी तुरियं । तं वंचिऊण नियदक्खयाए गहिया मए कन्ना ॥११४॥**

**अइनेहनिब्भरेणं भयभीया किर करिंदरक्खट्ठा । परिरंभिऊण गाढं नीया निरुवद्दवे ठाणे ॥११५॥**

**मुक्का अमुंचमाणी हियएणं परियणम्मि । बहुमन्निओ य तेणं जीवियदाणेण कन्नाए ॥११६॥**

**एत्थंतरम्मि वंतरपओगओ वरिसिउं समाढत्तो । सम्मुच्छिमसप्पेहिं अकालमेहो महाघोरो ॥११७॥**

**लग्गो पलाइउं तो लोगो कत्थइ कहिं पि [2]सत्थो वि । सा वि हु कहं पि नट्ठा न मए दिट्ठा अहन्नेणं ॥११८॥**

**अप्पत्ततप्पउत्ती य हिंडिओ पुरवरीए सयलाए । तम्मोहमोहियमई संपत्तो मित्त ! इहइं ति ॥११९॥**

---

अहमपि तत्र प्राप्तः क्रीडारसनिर्भरेऽथ प्रवृत्ते । सहकारतरुतले दृष्टा बाला मयैका ॥ १०७ ॥

यावन्निरीक्षे तकां तावच्च रति सदृशरुपभ्रान्त्या । ईर्ष्ययेव मदनेन विद्धो हृदये बाणैः ॥ १०८ ॥

दृष्ट्वा मां सापि खलु नवस्नेहोत्कण्ठिता स्वहस्तेन । यावत्प्रेषयति ताम्बूलं हलबोलस्तावत्समुच्छलितः ॥ १०९ ॥

अत्रान्तरे तया पलायितं सखीजनेन सा कथमपि । यावन्नशक्नोति गन्तुं संप्राप्तस्तावन्मतकरी ॥ ११० ॥

गजप्रकटो वररत्नो निरङ्कुशः प्रवरपद्मकृतशोभः । भग्नवरमत्तवारणव्यापारः प्रवरारक्षः ॥ १११ ॥

अप्रतिकारो भूषासमन्वितो निहतनिगडमाहात्म्यः । एवंविधगुणयुक्तो द्विधाऽपि सर्वत्र वक्तव्यः ॥ ११२ ॥

तदा शुण्डादण्डेन यावत्किल तां गृह्णाति प्रलपन्तीम् । दृढमुष्टिप्रहारेण प्रहतः पृष्ट्यां तावन्मया ॥ ११३ ॥

ततस्तां मुक्त्वा वलितो मम सम्मुखः करी त्वरितम् । तं वञ्चित्वा निजदक्षतया गृहीता मया कन्या ॥ ११४ ॥

अतिस्नेहनिर्भरेण भयभीता किल करीन्द्ररक्षणार्था । परिरम्भ्य गाढं नीता निरुपद्रवे स्थाने ॥ ११५ ॥

मुक्ताऽमुञ्चन्ती हृदयेन परिजने प्राप्ते । बहुमतश्च तेन जीवितदानेन कन्यायाः ॥ ११६ ॥

अत्रान्तरे व्यन्तरप्रयोगाद्वर्षितुं समारब्धः । समुर्च्छिमसर्पैरकालमेघो महाघोरः ॥ ११७ ॥

लग्नः पलायितुं तदा लोकः कुत्रचित्कथमपि सर्वोऽपि । साऽपि खलु कथमपि नष्टा न मया दृष्टाऽधन्येन ॥ ११८ ॥

अप्राप्ततत्प्रवृत्तिश्च हिण्डितः पुरवर्यां सकलायाम् । तन्मोहितमतिः संप्राप्तो मित्र ! इहेति ॥ ११९ ॥

---

१. रूवभंतीए रं० । २. सव्वो वि रा० ।

तं सोऊणं भणिओ वसंतदेवेण मित्त ! जइ एवं । ता साहेसु उवायं तो जंपइ कामपालो वि ॥१२०॥
नाओ मए उवाओ देसायारो सुओ इमो एत्थ । पविसित्तु कामदेवस्स मंदिरं ढक्किउं दारं ॥१२१॥
लग्गदिणे पढमं चिय नववहुपाओग्गाविहियसिंगारा । एगागिणी निसाए पूएइ वहू मयणपडिमं ॥१२२॥
ता अम्हे पढमं चिय लग्गदिणे कामएवभवणम्मि । चिट्ठिस्सामो पविसिय पुरओ सव्वं भलिस्सामि ॥१२३॥
तो आवासे गंतुं दो वि हु भुंजंति मज्जणं काउं । जाओ महासिणेहो पुव्वभवब्भासओ ताण ॥१२४॥
तत्तो वसंतदेवो सत्थं मोक्कल्लिऊण नियनयरे । तो बीयदिणं बालं आगच्छंतं मुणेऊण ॥१२५॥
कयउब्भडसिंगारा दोन्नि वि कामस्स मंदिरं गंतुं । कामस्स पिट्ठिभाए तिरोहिया जाव चिट्ठंति ॥१२६॥
ता केसरा वि पत्ता मोत्तुं सिबियं सपरियणं दारे । गहियपूओवयारा दारं पिहिऊण मज्झम्मि ॥१२७॥
पूइत्तु तो पयंपइ अणंगमेगागिणी सबहुमाणं । किं भयवं ! रइवल्लह ! मज्झ तए ववसियं एयं ? ॥१२८॥
अवरं च बावकालाओ पूइओ तं मए सुभत्तीए । ता कीस तए अहयं विडंबिया इयरदइएण ? ॥१२९॥
मोत्तुं वसंतदेवं दइयं भयवं ! तमेव जाणासि । अन्नो न मज्झ सुविणे[1] वि माणसे वसइ मणयं पि ॥१३०॥
ता सामिसाल ! सुगहियनामं मुत्तुं वसंतदेवपइं । जम्मंतरे वि अन्नं दइयं मा देज्ज इय भणिउं ॥१३१॥
उत्तरिएणुव्वंधइ तत्तो तत्तोरणम्मि अप्पाणं । जा मेल्लइ ता पत्तो वसंतदेवो पयंपंतो ॥१३२॥

---

तच्छ्रुत्वा भणितो वसन्तदेवेन मित्र ! यद्येवम् । तदा कथयोपायं तदा जल्पति कामपालोऽपि ॥ १२० ॥
ज्ञातो मयोपायो देशाचारः श्रुतोऽयमत्र । प्रविश्य कामदेवस्य मन्दिरं पिधाय द्वारम् ॥ १२१ ॥
लग्नदिने प्रथममेव नववधूप्रायोग्यविहितशृङ्गारा । एकाकिनी निशायां पूजयति वधू मदनप्रतिमाम् ॥ १२२ ॥
तत आवाभ्यां प्रथममेव लग्नदिने कामदेवभवने । स्थास्यावः प्रविश्य पुरतः सर्वं भलिष्यामि ॥ १२३ ॥
तत आवासे गत्वा द्वावपि खलु भुञ्जेते मज्जनं कृत्वा । जातो महास्नेहः पूर्वभवाभ्यासात्तयोः ॥ १२४ ॥
ततो वसन्तदेवः सार्थं विसृज्य निजनगरे । ततो द्वितीयदिने बालामागच्छन्तीं मुणित्वा ॥ १२५ ॥
कृतोद्भटशृङ्गारौ द्वावपि कामस्य मन्दिरं गत्वा । कामस्य पृष्टभागे तिरोहितौ यावत्तिष्ठतः ॥ १२६ ॥
तावत्केसराऽपि प्राप्ता मुक्त्वा शिबिकां सपरिजनां द्वारे । गृहीतपूजोपचारा द्वारं पिधाय मध्ये ॥ १२७ ॥
पूजयित्वा ततः प्रजल्पत्यनङ्गमेकाकिनी सबहुमानम् । किं भगवन् । रतिवल्लभ ! मम त्वया व्यवसितमेतत् ॥१२८॥
अपरं च बालकालात्पूजितस्त्वं मया सुभक्त्या । ततः कथं त्वयाहं विडम्बितेरदयितेन ? ॥ १२९ ॥
मुक्त्वा वसन्तदेवं दयितं भगवन् । त्वमेव जानासि । अन्यो न मम स्वप्नेऽपि मानसे वसति मनागपि ॥ १३० ॥
ततः स्वामिशाल ! सुगृहीतनाम मुक्त्वा वसन्तदेवपतिम् । जन्मान्तरेऽप्यन्यं दयितं मा देहीति भणित्वा ॥ १३१ ॥
उत्तरियेणोद्बध्नाति ततस्तत्तोरण आत्मानम् । यावन्मुञ्चति तावत्प्राप्तो वसन्तदेवः प्रजल्पन् ॥ १३२ ॥

---

१. सुमिणे रं० ।

मा साहसं ति गाढं परिरंभिय वामबाहुदंडेण । इयरेण तओ सहसा छिन्नो छुरियाए तप्पासो ॥१३३॥
तत्तो मोत्तुं भूमीए वीइया अंचलेण वत्थस्स । उवलद्धचेयणा सा चिंतइ सो एस साणंदा ॥१३४॥
कत्तो संभवइ इहं सविसाया एगगो ? त्ति तरलच्छी । रूवेणऽहिओ एसो मं परिणेही ? न वा ? सभया ॥१३५॥
नायमणेणं उव्बंधणाइ मम चेट्ठियं ति सविलक्खा । मुच्छाविवसविसंठुलदेहावयव त्ति कयलज्जा ॥१३६॥
इय एवंविहपाउब्भवंतरसहरियहिययवावारा । भणिया वसंतदेवेण केसरा केसरमणीया ॥१३७॥
सो हं वसंतदेवो सुंदरि ! किं एत्थ विविहचिंताए ? । तुह हरणत्थं पुव्वं पि आगओ कामभवणम्मि ॥१३८॥
तत्तो य कामदेवं सक्खि काऊण कामपालेण । कारवियं परिणयणं वसंतदेवस्स सह तिए ॥१३९॥
भणिया य कामपालेण केसरा ! गिण्ह मह अलंकारे । जेणाहं तुह वेसं घेत्तुं गच्छामि तुह भवणं ॥१४०॥
एत्तो पलाइयव्वं तुब्भेहिं अहं तु इह भलिस्सामि । नवपरिणिएहिं भणियं एवं होही तुह अणत्थो ॥१४१॥
एत्थंतरम्मि केणइ छड त्ति छीयम्मि कामपालो वि । जंपइ न मज्झ चिंता तुब्भेहिं खणं पि कायव्वा ॥१४२॥
जम्हा छीयासउणो सउणो मह कहइ तत्थ पियलाभं । एवं ति पभणिऊणं तं सव्वमणुट्ठियं तेहिं ॥१४३॥
काऊण कामपालो कामिणिवेसं विसालनीरंगिं । नीहरिय मंदिराओ आरुहिउं पवरसिबियाए ॥१४४॥
वज्जंतसजलजलहरगभीरजयतूरपूरियदियंतो । पत्तो गिहम्मि तत्तो उवविट्ठो पवरपल्लंके ॥१४५॥
संखउराओ एत्थंरम्मि तम्माउभाउणो धूया । तरुणमणुम्मायकरी मइरा मइर व्व संपत्ता ॥१४६॥

---

मा साहसमिति गाढं परिरम्भ्य वामबाहुदण्डेन । इतरेण ततः सहसा छिन्नश्च्छूरिकया तत्पाशः ॥ १३३ ॥
ततो मुक्त्वा भूमौ वीजिताऽञ्चलेन वस्त्रस्य । उपलब्धचेतना सा चिन्तयति स एष सानन्दा ॥ १३४ ॥
कुतः सम्भवतीह सविषादैकक इति तरलाक्षी । रुपेणाधिक एष मां परिणेष्यति ? न वा ? सभया ॥ १३५ ॥
ज्ञातमनेनोब्दन्धनादि मम चेष्टितमिति सविलक्षा । मूर्च्छाविवशविसंस्थूलदेहावयवेति कृतलज्जा ॥ १३६ ॥
इत्येवंविधप्रादुर्भवद्रसहृतहृदयव्यापारा । भणिता वसन्तदेवेन केसरा केशरमणीया ॥ १३७ ॥
सोऽहं वसन्तदेवः सुन्दरि ! किमत्र विविधचिन्तया ? । तव हरणार्थं पूर्वमप्यागतः कामभवने ॥ १३८ ॥
ततश्च कामदेवं साक्षिणं कृत्वा कामपालेन । कारितं परिणयनं वसन्तदेवस्य सह तया ॥ १३९ ॥
भणिता च कामपालेन केसरा ! गृहाण ममालङ्कारान् । येनाहं तव वेशं गृहीत्वा गच्छामि तव भवनम् ॥ १४० ॥
इतः पलायितव्यं युवाभ्यामहं त्वेह भलिष्यामि । नवपरिणिताभ्यां भणितमेवं भविष्यति तवानर्थः ॥ १४१ ॥
अत्रान्तरे केनचिच्छटिति क्षुते कामपालोऽपि । जल्पति न मम चिन्ता युवाभ्यां क्षणमपि कर्तव्या ॥ १४२ ॥
यस्मात्क्षुताशकुनः शकुनो मम कथयति तत्र प्रियालाभम् । एवमिति प्रभण्य तत्सर्वमनुष्ठितं तैः ॥ १४३ ॥
कृत्वा कामपालः कामिनिवेशं विशालनीरङ्गिगम् । निसृत्य मन्दिरादारुह्य प्रवरशिबिकाम् ॥ १४४ ॥
वाद्यत्सजलजलधरगम्भीरजयतूर्यपूरितदिगन्तः । प्राप्तो गृहे तत उपविष्टः प्रवरपल्यङ्के ॥ १४५ ॥
शङ्खपुरादत्रान्तरे तन्मातृभ्रातुर्दुहिता । तरुणमनोन्मादकरी मदिरा मदिरेव संप्राप्ता ॥ १४६ ॥

**गंतूण तओ एसा उवविट्ठा कामपालपल्लंके । पभणइ बहिणि ! मए तुह निसुओ निस्सेसवुत्तंतो ॥१४७॥**
**संखउरमागयाए सयासओ तुह सहीए कमलाए । जह केसराए गरुओ वसंतदेवम्मि अणुराओ ॥१४८॥**
**सो तुज्झ विहिवसेणं संजाओ जइ वि अन्नहा इण्हिं । तह वि हु गुरुयणवयणाणुवत्तणे नियमणं कुणसु ॥१४९॥**
**जम्हा जं जेण जया पावेयव्वं सुहं व दुक्खं वा । सो पुव्वकम्मपरिणइवसेण पावेइ तं नियमा ॥१५०॥**
**अणुरूवरूव-जोव्वण-संपय-विन्नाण-नाणविसएसु । जायइ जए पवित्ती परम्मुहा हयपयावइणो ॥१५१॥**
**इय जंपिऊण नियपियसंभरणसमुच्छलंतगुरुसोया । मोत्तुं मुणालदीहरनिस्सासं भणइ पुण मइरा ॥१५२॥**
**जत्ताए पवित्ताए संखउरे संखवालजक्खस्स । कमणीयकामपाले अणुराओ मज्झ संजाओ ॥१५३॥**
**तम्मि वि कयाणुराए परोप्परं पेसियम्मि तंबोले । हलबोलो संजाओ संपत्तो तत्थ मत्तकरी ॥१५४॥**
**नट्ठो समग्गलोगो गइंदभयकंपिरा अहं तेण । आलिंगिऊण गाढं नीया निरुवद्दवे ठाणे ॥१५५॥**
**कयसम्माणो मह गुरुयणेण जा तत्थ चिट्ठए ताव । वुट्ठो अकालदारुणविसहरनियरेहिं नीरधरो ॥१५६॥**
**नियपाणे घेत्तूणं नट्ठो लोगो भुयंगभयभीओ । सुइरं निरिक्खिओ वि हु तप्पभिइ न सो कहिं दिट्ठो ॥१५७॥**
**तयणंतरं च विहिणा तेण समं दंसणं पि मह हरियं । जलबिंब पि तरंगा हरंति अहवा रहंगस्स ॥१५८॥**
**तं सोउं नीरंगी अवणीया ज्झति कामपालेण । कहमेसो सो ? त्ति ससंभमाए न हु जंपियमिमीए ॥१५९॥**
**तो नियकरकमलेणं घेत्तूणं पाणिपल्लवं तीए । भणियं तेण न एसो लज्जाकालो कुरंगच्छि ! ॥१६०॥**

---

गत्वा तत एषोपविष्टा कामपालपल्यङ्के । प्रभणति भगिनि ! मया तव निश्रुतो निःशेषवृत्तान्तः ॥ १४७ ॥
शङ्खपुरमागतया सकाशात्तव सख्या कमलया । यथा केसराया गुरुको वसन्तदेवेऽनुरागः ॥ १४८ ॥
स तत विधिवशेन सञ्जातो यद्यप्यन्यथेदानीम् । तथापि खलु गुरुजनवचनानुवर्तने निजमनः कुरु ॥ १४९ ॥
यस्माद्यद्येन यदा प्राप्तव्यं सुखं वा दुःखं वा । स पूर्वकर्मपरिणतिवशेन प्राप्नोति तन्नियमा ॥ १५० ॥
अनुरुपरुप-यौवन-संपद्विज्ञान-ज्ञानविषयेषु । जायते जगति प्रवृत्तिः पराम्मुखा हतप्रजापतेः ॥ १५१ ॥
इति जल्पित्वा निजप्रियस्मरणसमुच्छलद्गुरुशोका । मुक्त्वा मुणालदीर्धनिश्वासं भणति पुनर्मदिरा ॥ १५२ ॥
यात्रायां पवित्रायां शङ्खपुरे शङ्खपालयक्षस्य । कमनीयकामपालेऽनुरागो मम सञ्जातः ॥ १५३ ॥
तस्मिन्नपि कृतानुरागे परस्परं प्रेषिते ताम्बुले । हलबोलः सञ्जातः संप्राप्तस्तत्र मत्तकरी ॥ १५४ ॥
नष्टः समग्रलोको गजेन्द्रभयकम्पमानाऽहं तेन । आलिङ्ग्य गाढं नीता निरुपद्रवे स्थाने ॥ १५५ ॥
कृतसन्मानो मम गुरुजनेन यावत्तत्र तिष्ठति तावत् । वृष्टोऽकालदारुणविषधरनिकरैर्नीरधरः ॥ १५६ ॥
निजप्राणान्गृहीत्वा नष्टो लोको भुजङ्गभयभीतः । सुचिरं निरीक्षितोऽपि खलु तत्प्रभृति न स कुत्र दृष्टः ॥ १५७ ॥
तदनन्तरं च विधिना तेन समं दर्शनमपि मम हृतम् । जलबिम्बमपि तरङ्गा हरन्त्यथवा रथाङ्गस्य ॥ १५८ ॥
तच्छ्रुत्वा नीरङ्ग्यपनीता झटिति कामपालेन । कथमेष स ? इति ससम्भ्रमया न खलु-जल्पितमनया ॥ १५९ ॥
ततो निजकरकमलेन गृहीत्वा पाणिपल्लवं तस्याः । भणितं तेन नैष लज्जाकालः कुरङ्गाक्षि ! ॥ १६० ॥

**ता लज्जं मोत्तूणं निग्गमणोवायमेत्थ चिंतेहि । जेण लहुं गच्छामो वीवाहक्खित्तसयलजणे ॥१६१॥**

**अवरं च केसरा वि य मिलिया दइयस्स इय पओगेण । तो हरिसियहिययाए मइराए [1] पयंपियं एवं ॥१६२॥**

**काउं सरीरचिंतावएसं नियअसोगवणियाए । दारेण पगच्छाभो तो तेहिं कयं तह च्चेव ॥१६३॥**

**तत्तो वसंतदेवस्स गयउरे ताणि तत्थ मिलियाणि । इय चत्तारि वि नेहेण तत्थ भुंजंति विसयसुहं ॥१६४॥**

**नायं अम्मा-पियरेहिं केसरा जह वसंतदेवेण । उव्वूढा मइरा वि य ससिणेहं कामपालेण ॥१६५॥**

**तो संतुट्ठाइं मणम्मि ताइं अणुरूववरनिओगेण । एत्तो वसंतदेवाइएहिं दविणं बहु विढत्तं ॥१६६॥**

**उत्तुंगतोरणाइं गिहाणि काराविऊण नियगाणि । तत्थाऽऽणियाणि अम्मा-पियराणि सिणेहसारेहिं ॥१६७॥**

**रन्नो य तत्थ कोसल्लियाणि ढुक्कंति पंचसंखाए । नवरं कुओ वि न सयं परिभुंजइ ताणमेगं पि ॥१६८॥**

**मिलियाण ताण तेणं तेसिं परिभाइउं चउण्हं पि । उवभुत्ताणि सहरिसं सिणेहसारं समग्गेहिं ॥१६९॥**

**जाओ महासिणेहो जम्मंतरनेहसंगइवसेणं । कुरुचंदराइणा सह तेसिं कालो अइक्कमइ ॥१७०॥**

**एत्थंतरे सुरा-ऽसुर-खेयर-नरनियरनमियकमकमलो । तन्नयरवरुज्जाणे समोसढो संतिजिणनाहो ॥१७१॥**

**वद्धाविओ नरिंदो तत्तो उज्जाणपालपुरिसेहिं । दाऊण पारितोसियदाणं तो ताण नरनाहो ॥१७२॥**

**आरुहिय पट्टहत्थिं निस्सेसनरिंदनियरपरियरिओ । सद्धिं वसंतदेवाइएहिं पत्तो समवसरणे ॥१७३॥**

---

ततो लज्जां मुक्त्वा निर्गमनोपायमत्र चिन्तय । येन लघु गच्छावो विवाहाक्षिप्ते सकलजने ॥ १६१ ॥

अपरं च केसराऽपि च मिलिता दयितस्येति प्रयोगेण । ततो हर्षितहृदयया मदिरया प्रजल्पितमेवम् ॥ १६२ ॥

कृत्वा शरीरचिन्ताव्यपदेशं निजाशोकवनिकायाः । द्वारेण प्रगच्छावस्ततस्ताभ्यां कृत तथा चैव ॥ १६३ ॥

ततो वसन्तदेवस्य गजपुरे तानि तत्र मिलितानि । इति चत्वारि अपि स्नेहेन तत्र भुञ्जन्ति विषयसुखम् ॥ १६४ ॥

ज्ञातमम्बा-पितृभिः केसरा यथा वसन्तदेवेन । उद्वोढा मदिराऽपि च सस्नेहं कामपालेन ॥ १६५ ॥

तदा संतुष्टानि मनसि तान्यनुरुपवरनियोगेन । इतो वसन्तदेवादिकै र्द्रविणं बह्वर्जितम् ॥ १६६ ॥

उत्तुङ्गतोरणानि गृहाणि कारयित्वा निजकानि । तत्राऽऽनीतान्यम्बा-पितराणि स्नेहसारैः ॥ १६७ ॥

राज्ञश्च तत्र कोशलिकानि ढौकन्ते पञ्चसंख्यया । नवरं कुतोऽपि न स्वयं परिभुनक्ति तेषामेकमपि ॥ १६८ ॥

मिलितानां तेषां तेन तेभ्यःपरिभाज्य चतुर्भ्योऽपि । उपयुक्तानि सहर्षं स्नेहसारं समग्रैः ॥ १६९ ॥

जातो महास्नेहो जन्मान्तरस्नेहसंगतिवशेन । कुरुचन्द्रराज्ञा सह तेषां कालोऽतिक्रामति ॥ १७० ॥

अत्रान्तरे सुराऽसुर-खेचर-नरनिकरनतक्रमकमलः । तन्नगरवरोद्याने समवसृतः शान्तिजिननाथः ॥ १७१ ॥

वर्धापितो नरेन्द्रस्तत उद्यानपालपुरुषैः । दत्त्वा पारितोषिकदानं ततस्तेभ्यो नरनाथः ॥ १७२ ॥

आरुह्य पट्टहस्तीं निःशेषनरेन्द्रनिकरपरिकरितः । सार्द्ध वसन्तदेवादिकैः प्राप्तः समवसरणे ॥ १७३ ॥

---

१. जंपियं रं० ।

**कयपंचविहाभिगमो विरइयतिपयाहिणो पणयचलणो । सिरिसंतिसमोसरणे उवविट्ठो उचियठाणम्मि ।।१७४।।**

**भयवं पि सजलजलहरगंभीरसरेण देसणं कुणइ । तो अवसरम्मि राया पुच्छइ पणमित्तु जिणनाहं ।।१७५।।**

**भयवं ! किं अम्हाणं पंचण्ह वि एरिसा महापीई ? । तो भयवया वि कहिओ पुव्वभवो ताण सव्वो वि ।।१७६।।**

**जह तुब्भे पुव्वभवे परोप्परं नेहनिब्भरा आसि । सुधणधणवइ-धणीसर-धणया तह दोणकम्मयरो ।।१७७।।**

**मुणिदाणेणं दोणो नरिंद ! पुहईसरो तुमं जाओ । तद्दाणेणं भोया एयाण वि एरिसा जाया ।।१७८।।**

**इच्चाइ निसुणिऊणं अवलोएऊण जाइसरणेण । पुव्वभवं सव्वे वि हु वेरग्गगया गया सगिहं ।।१७९।।**

**नियरायलच्छिभारे कुमारमभिसिंचिऊण नरनाहो । इयरे वि नियसुएसुं कुडुंबभारं समप्पेउं ।।१८०।।**

**सकलत्ता निक्खंता तिन्नि वि सिरिसंतिनाहपासम्मि । समहिज्जियसुत्त-ऽत्था काउं घोरं तवच्चरणं ।।१८१।।**

**निहयघणाघाइकम्मा उप्पाडेऊण केवलं नाणं । पडिबोहिऊण भविए संपत्ता सासयं ठाणं ।।१८२।।**

**।। द्रोणाद्याख्यानकं समाप्तम् ।। ७ ।।**

**इदानीं शालिभद्राख्यानकमारभ्यते । तच्चेदम्-**

**सालीणजणसमिद्धे सालिग्गामम्मि आसि कुलपुत्तो । आबालकालदालिद्ददुक्खिओ कुणइ ओलग्गं ।।१।।**

**धन्ना य तस्स भज्जा तेसिं संगमयनामओ पुत्तो । अह अन्नया य तीए भत्ता भवियव्वयाए मओ ।।२।।**

**सा परगिहेसु कम्मं काऊणं कुणइ निययनित्थारं । संगमओ पुण चारइ सग्गामे वच्छरूवाइं ।।३।।**

---

कृतपञ्चविधाभिगमो विरचितत्रिप्रदक्षिणः प्रणतचरणः । श्रीशान्तिसमवसरण उपविष्ट उचितस्थाने ।। १७४ ।।

भगवानपि सजलजलधरगम्भीरस्वरेण देशनां करोति । तदावसरे राजा पृच्छति प्रणम्य जिननाथम् ।। १७५ ।।

भगवन् । किमस्माकं पञ्चानामपीदृशी महाप्रीतिः ? । ततो भगवताऽपि कथितः पूर्वभवस्तेषां सर्वोऽपि ।। १७६ ।।

यथा यूयं पूर्वभवे परस्परं स्नेहनिर्भरा आसन् । सुधन-धनपति-धनेश्वर-धनदास्तथा द्रोणकर्मकरः ।। १७७ ।।

मुनिदानेन द्रोणो नरेन्द्र ! पृथिवीश्वरस्त्वं जातः । तद्दानेन भोगा एतेषामपीदृशा जाताः ।। १७८ ।।

इत्यादि निश्रुत्याऽवलोक्य जातिस्मरणेन । पूर्वभवं सर्वेऽपि खलु वैराग्यगता गताः स्वगृहम् ।। १७९ ।।

निजराजलक्ष्मीभारे कुमारमभिषिञ्च्य नरनाथः । इतरेऽपि निजसुतेषु कुटुम्बभारं समर्प्य ।। १८० ।।

सकलत्रा निष्क्रान्तास्त्रयोरपि श्रीशान्तिनाथपार्श्वे । समधीत्यसूत्राऽर्थाः कृत्वा घोरं तपश्चरणम् ।। १८१ ।।

निहतघनघातिकर्माण उत्पाद्य केवलं ज्ञानम् । प्रतिबोध्य भविकान् संप्राप्ताः शाश्वतं स्थानम् ।। १८२ ।।

**।। द्रोणाद्याख्यानकं समाप्तम् ।। ७ ।।**

**इदानीं शालिभद्राख्यानकमारभ्यते । तच्चेदम् -**

शालिनजनसमृद्धे शालिग्राम आसीत्कुलपुत्रः । आबालकालदारिद्रदुःखितः करोत्यवलग्नम् ।। १ ।।

धन्या च तस्य भार्या तयोः संगमकनामकः पुत्रः । अथान्यदा च तस्या भर्ता भवितव्यतया मृतः ।। २ ।।

सा परगृहेषु कर्म कृत्वा करोति निजकनिस्तारम् । संगमकः पुनश्चारयति स्वग्रामे वत्सरूपाणि ।। ३ ।।

**सो अन्नया वणम्मी दट्ठुं उस्सग्गसंठियं साहुं । भत्तीए पणमिऊणं खणमेक्कं पज्जुवासेइ ॥४॥**
**पइदिणपणामपडिहयपावप्पसरस्स तस्स गच्छंति । दिवसाणि मुणीसरचरणकमलसेवाभिरत्तस्स ॥५॥**
**परमूसवम्मि कम्मि वि विहिया अह तत्थ पइगिहं खीरी । दट्ठूण तयं सो भणइ अंब ! मह देसु परमन्नं ॥६॥**
**उप्पन्नमन्नुभारा सुयराहाडिं सुणित्तु सा रुयइ । दट्ठूण तयं आसन्नभवणमहिलाओ मिलियाओ ॥७॥**
**संपुच्छिया य ताहिं भद्दे ! किं रुयसि ? तीए तो कहियं । अमुणियनियभवणधणो मह पुत्तो मग्गए खीरिं ॥८॥**
**तं निसुणिऊण संजायगरुयकरुणारसाहिं रमणीहिं । दुद्ध-घय-सालि-सक्करउवगरणं तीए उवणीयं ॥९॥**
**तो तीए कया खीरी थालं भरियं च निययपुत्तस्स । घय-सक्करासमेयं जा एसो भुंजिउं लग्गो ॥१०॥**
**ता पउरपुव्वपुन्नेण मुणिवरो मासखवणपारणए । धरणियलनिहियनयणो गिहंगणे तस्स अल्लीणो ॥११॥**
**दट्ठूण तयं उब्भूयभत्तिरोमंचअंचियसरीरो । उट्ठित्तु तं नमंसइ महिमंडलललुलियभालयलो ॥१२॥**
**उप्पाडिऊण थालं उच्छलियाखंडपरमपरिणामो । वियरइ परमन्नमसेसयं पि साहुस्स परितुट्ठो ॥१३॥**
**दव्वाइविसुद्धिं भाविऊण धम्मन्तरायभयमीरू । घेत्तूण मुणिवरिंदो तओ गओ गामउज्जाणे ॥१४॥**
**उत्तमपत्तविसेसियतिकालवुट्ठीविसिट्ठदाणेण । बंधइ सुकुलुप्पत्तीपुन्नं सुहभोगकम्मं च ॥१५॥**
**आकंठं तो पच्छा खीरी घेत्तूण भुंजिओ एसो । रयणी विसूइयाए सुहपरिणामेण कालगओ ॥१६॥**
**रायगिहे उववन्नो महिब्भगोभद्दसेट्ठिभज्जाए । भद्दाए कुक्खिकुहरम्मि सूइओ सालिसुमिणेण ॥१७॥**

---

सोऽन्यदा वने दृष्ट्वोत्सर्गसंस्थितं साधुम् । भक्त्या प्रणम्य क्षणमेकं पर्युपासते ॥ ४ ॥
प्रतिदिनप्रणामप्रतिहतपापप्रसरस्य तस्य गच्छन्ति । दिवसानि मुनीश्वरचरणकमलसेवाभिरतस्य ॥ ५ ॥
परमोत्सवे कस्मिन्नपि विहिताऽथ तत्र प्रतिगृहं क्षीरी । दृष्ट्वा तकं स भणत्यम्ब ! मम देहि परमान्नम् ॥ ६ ॥
उत्पन्नमन्युभारा सुतारार्टी श्रुत्वा सा रोदिति । दृष्ट्वा तकांमासन्नभवनमहिला मिलिताः ॥ ७ ॥
सम्पृष्टा च ताभि र्भद्रे ! किं रोदिसि ? तया ततः कथितम् । अमुणितनिजभवनधनो मम पुत्रो मार्गयति क्षीरम् ॥८ ॥
तन्निश्रुत्य सञ्जातगुरुककरुणारसाभीरमणिभिः । दुग्ध-घृत-शालि-शर्करोपकरणं तस्या उपनीतम् ॥ ९ ॥
ततस्तया कृता क्षीरी स्थालं भृतं च निजपुत्रस्य । घृत-शर्करासमेतं यावदेष भोक्तुं लग्नः ॥ १० ॥
तदा प्रचूरपूर्वपुण्येन मुनिवरो मासक्षपणपारणके । धरणितलनिहितनयनो गृहाङ्गणं तस्यालीनः ॥ ११ ॥
दृष्ट्वा तकमुद्भुतभक्तिरोमाञ्चाञ्चितशरीरः । उत्थाय तं नमति महिमण्डललुलितभालतलः ॥ १२ ॥
उत्पाद्य स्थालमुच्छलिताखण्डपरमपरिणामः । वितरति परमान्नमशेषकमपि साधोः परितुष्टः ॥ १३ ॥
द्रव्यादिविशुद्धिं भावयित्वा धर्मान्तरायभयभीरुः । गृहीत्वा मुनिवरेन्द्रस्ततो गतो ग्रामोद्याने ॥ १४ ॥
उत्तमपात्रविशेषितत्रिकालवृष्टिविशिष्टदानेन । बध्नाति सुकुलोत्पत्तिपुण्यं शुभभोगकर्म च ॥ १५ ॥
आकण्ठं ततः पश्चात्क्षीरी गृहीत्वा भुङ्क्त एषः । रजन्यां विसूचिकया शुभपरिणामेन कालगतः ॥ १६ ॥
राजगृह उत्पन्नो महेभ्यगोभद्रश्रेष्ठिभार्यायाः । भद्रायाः कुक्षिकुहरे सूचितः शालिस्वप्नेन ॥ १७ ॥

**तीए पवड्ढइ गब्भो अत्थोवज्जणनिमित्तमिब्भो वि । संचलिओ परतीरे भिन्नं जंतस्स बोहित्थं ॥१८॥**

**मणि-कणग-रयणरासिं मज्जंतं पेच्छिऊण जलहिम्मि । बहुविहविसायजुत्तो संपत्तो सो वि पंचत्तं ॥१९॥**

**एत्तो य सुओ जाओ भद्दाए तस्स सुविणए साली । जं दिट्ठो तं विहियं नामं से सालिभद्दो त्ति ॥२०॥**

**एत्थंतरम्मि सोऊण नियदइयस्स उवरमं भद्दा । संजायगरुयसोया अक्कंदइ करुणसद्देण ॥२१॥**

**हा हा पिययम ! एत्तियधणेण तुह आसि किं न पज्जतं ? । जं दविणज्जणकज्जे गंतूणं निहणिओ अप्पा ॥२२॥**

**हा हा हयास ! निक्करुण ! देव्व ! विहियं किमेरिसं तुमए ? । दाऊण मज्झ पुत्तं जमेवमुद्दालिओ दइओ ॥२३॥**

**हा हा गुणरयणायर ! हा हा हा दीणजणसमुद्धरण ! । हा हिययदइय ! पिययम ! पुणो वि तं कत्थ दीसिहसि ? ॥२४॥**

**इय एवं विलवंती भद्दा नियसयणमित्तलोएण । कहकहमवि संठविया जाया कालेण अवसोया ॥२५॥**

**जाओ य सालिभद्दो कमेण जोग्गो कलाकलावस्स । उवझायस्सुवणीओ धणियं जाओ कलाकुसलो ॥२६॥**

**पत्तो य हरिणनयणीमणहरणं जोव्वणं कमेण इमो । सोहग्ग-रूय-लायन्नसंजुओ सव्वजणइट्ठो ॥२७॥**

**असरिसदक्खिन्ननिही करुणारससायरो महुरवाणी । परउवयारेक्करओ किं बहुणा ? सयलगुणकलिओ ॥२८॥**

**घणकसिणकुडिलकोमलकेसकलावाओ हरिणनयणीओ । नवपउमरायरत्ताहराओ छणचंदवयणाओ ॥२९॥**

**मणहरसिणिद्धपीवरपओहराओ तरंगतिवलीओ । गंभीरनाहिकूवाओ गिरिसिलापिहुनियंबाओ ॥३०॥**

**कंकेल्लिकिसलयारुणपाणीओ करेणुकरसमोरूओ । नवकमलकोमलारुणचरणाओ करेणुगमणाओ ॥३१॥**

---

तस्याः प्रवर्धते गर्भोऽर्थोपार्जननिमित्तमिभ्योऽपि । सञ्चलितः परतीरे भिन्नं यातो बोहित्थम् ॥ १८ ॥

मणि-कनक-रत्नराशिं मज्जन्तं दृष्ट्वा जलधौ । बहुविधविषादयुक्तः सम्प्राप्तःसोऽपि पञ्चत्वम् ॥ १९ ॥

इतश्च सुतो जातो भद्रायास्तस्य स्वप्ने शालिः । यद्दृष्टस्तद्विहितं नामे तस्य शालिभद्र इति ॥ २० ॥

अत्रान्तरे श्रुत्वा निजकदयितस्योपरमं भद्रा । सञ्जातगुरुकशोकाऽऽक्रन्दति करुणशब्देन ॥ २१ ॥

हा हा प्रियतम ! एतावद्धनेन तवासीत्किं न पर्याप्तम् ? । यद्द्रविणार्जनकार्ये गत्वा निहत आत्मा ॥ २२ ॥

हा हा हताश ! निष्करुण ! दैव ! विहितं किमीदृशं त्वया ? । दत्वा मम पुत्रं यमेवाच्छिन्नो दयितः ॥ २३ ॥

हा हा गुणरत्नाकर ! हा हा हा दीनजनसमुद्धरण ! । हा हृदयदयित ! प्रियतम ! पुनरपि त्वं कुत्र द्रक्ष्यसे ? ॥२४॥

इत्येवं विलपन्ती भद्रा निजस्वजनमित्रलोकेन । कथंकथमपि संस्थापिता जाता कालेनापशोका ॥ २५ ॥

जातश्च शालिभद्रः क्रमेण योग्यः कलाकलापस्य । उपाध्यायस्योपनीतो गाढं जातः कलाकुशलः ॥ २६ ॥

प्राप्तश्च हरिणनयनीमनोहरणं यौवनं क्रमेणायम् । सौभाग्य-रूप-लावण्यसंयुक्तः सर्वजनेष्टः ॥ २७ ॥

असदृशदाक्षिण्यनिधिः करुणरससागरो मधुरवाक् । परोपकारेकरतः किं बहुना ? सकलगुणकलितः ॥ २८ ॥

घनकृष्णकुटिलकोमलकेशकलापा हरिणनयनाः । नवपद्मरागरक्ताधराः क्षणचन्द्रवदनाः ॥ २९ ॥

मनोहरस्निग्धपीवरपयोधरास्तरङ्गवत्रिलिकाः । गम्भीरनाभिकूपाः गिरिशिलापृथुनितम्बाः ॥ ३० ॥

कङ्केलिकिसलयारुणपाणयः करेणुकरसमोरुकाः । नवकमलकोमलारुणचरणाः करेणुगमनाः ॥ ३१ ॥

**आरूढपढमजोव्वणकंतिकडक्खियसुरिंदघरिणीओ । उत्तमकुलुब्भवाओ वत्तीसं इब्भकन्नाओ ॥३२॥**

**एगदिवसम्मि तेणं परिणीयाओ महाविभूईए । नच्चिरवारविलासिणिजयजयरवमणहरसरेण ॥३३॥**

**गोभद्दो वि हु जाओ तइया मरिउं सुरो भवणवासी । अवहिं पउंजमाणो सकलत्तं नियइ नियपुत्तं ॥३४॥**

**मुणिदाणसमयसज्जियपुन्नेणाऽऽगरिसिओ समागंतुं । विरएइ सत्तभूमियपासायं सालिभद्दस्स ॥३५॥**

**सुरवरविमाणरुइरं विचित्तमणिमत्तवारणाइन्नं । अवरं च तस्स परिसरधराए सव्वत्तुवणसंडं ॥३६॥**

**सिसिरजलजंतवाहयपुत्तलियाविलसिरं पवरवाविं । जलअंदोलयकीलानिमित्तमेयस्स विरएइ ॥३७॥**

**नवणीयमसिणबत्तीसतूलियाकलियपवरपल्लंकं । सयणनिमित्तं उवणेइ सुरवरो सालिभद्दस्स ॥३८॥**

**केऊर-हार-कंकण-रसणा-मंजीरपभिइआभरणं । वत्थंगराग-तंबोल-पुप्फपमुहं च भोगंगं ॥३९॥**

**पइवासरं पि अमरो देइ सभज्जस्स सालिभद्दस्स । सो वि हु तब्भोगसुही गयं पि कालं न याणेइ ॥४०॥**

**सव्वं गिहवावारं चिंतइ भद्दा अहऽन्नया वणिया । घेत्तुं कंबलरयणाणि आगया लक्खमोल्लाणि ॥४१॥**

**जाव न[१] इ को वि गिण्हइ ताणि महग्घत्तणेण नयरजणो । ता अत्थाणे गंतुं सेणियरायस्स दरिसंति ॥४२॥**

**मोल्लं पुच्छइ राया ते वि पयंपंति लक्खमोल्लाणि । आह निवो न हु कज्जं एएहिं महग्घमोल्लेहिं ॥४३॥**

**संजायबहुविसाया नीहरिया ते नरिंदभवणाओ । रिद्धिं सुणित्तु पत्ता पासाए सालिभद्दस्स ॥४४॥**

---

आरुढप्रथमयौवनकान्तिकटाक्षितसुरेन्द्रगृहिण्यः । उत्तमकुलोद्भवा द्वात्रिंशदिभ्यकन्याः ॥ ३२ ॥

एकदिवसे तेन परिणिता महाविभूत्या । नृत्यद्वारविलासिनिजयजयरवमनोहरस्वरेण ॥ ३३ ॥

गोभद्रोऽपि खलु जातस्तदा मृत्वा सुरो भवनवासी । अवधिं प्रयुञ्ज्यमानः सकलत्रं पश्यति निजपुत्रम् ॥ ३४ ॥

मुनिदानसमयसर्जितपुण्येनाऽऽकृष्टं समागत्य । विरचयति सप्तभूमिप्रासादं शालिभद्रस्य ॥ ३५ ॥

सुरवरविमानरुचिरं विचित्रमणिमत्तवारणाकीर्णम् । अपरं च तस्य परिसरधरायां सर्वर्तुवनखण्डम् ॥ ३६ ॥

शिशिरजलयन्त्रवाहकपुत्तलिकाविलसितां प्रवरवापिम् । जलान्दोलनक्रीडानिमित्तमेतस्य विरचयति ॥ ३७ ॥

नवनीतमसृणद्वात्रिंशत्तुलिकाकलितप्रवरपल्यङ्कम् । शयननिमित्तमुपनयति सुरवरः शालिभद्रस्य ॥ ३८ ॥

केयूर-हार-कङ्कण-रसना-मञ्जिरप्रभृत्याभरणम् । वस्त्राङ्गराग-ताम्बूल-पुष्पप्रमुखं च भोगाङ्गम् ॥ ३९ ॥

प्रतिवासरमप्यमरो ददाति सभार्यस्य शालिभद्रस्य । सोऽपि खलु तद्भोगसुखी गतमपि कालं न जानाति ॥ ४० ॥

सर्वं गृहव्यापारं चिन्तयति भद्राऽथान्यदा वणिजः । गृहीत्वा कम्बलरत्नानि आगता लक्षमूल्यानि ॥ ४१ ॥

यावन्न कोऽपि गृह्णाति तानि महार्घ्यत्वेन नगरजनः । तावदास्थाने गत्वा श्रेणिकराजस्य दर्शयन्ति ॥ ४२ ॥

मूल्यं पृच्छति राजा तेऽपि प्रजल्पन्ति लक्षमूल्यानि । आह नृपो न खलु कार्यमेतैर्महार्घ्यमूल्यैः ॥ ४३ ॥

सञ्जातबहुविषादा निसृतास्ते नरेन्द्रभवनात् । ऋद्धिं श्रुत्वा प्राप्ताः प्रासादे शालिभद्रस्य ॥ ४४ ॥

---

१. न उ कोइ गिण्हइ रं० ।

**भद्दाए तओ अवलोइऊण गहियाणि कहियमोल्लेण । वणिणो वि हिट्ठहियया सव्वे वि गया नियावासे ॥४५॥**

**कम्बलरयणसरूवं मुणिउं विन्नवइ चेल्लणा निवइं । पिययम ! किं मज्झ कए न तए एक्कं पि संगहियं ? ॥४६॥**

**एरिसरिद्धिजुयस्स वि चिट्ठा किं एरिसी तुह नरिंद ! । अहवा न तुज्झ भावइ मह दिन्नं उत्तमं वत्थुं ॥४७॥**

**अवरं च तुज्झ किर्त्ति सुणिऊण इहं समागया वणिणो । एवं नु ताण पुरओ देसेसु वि लहुइओ अप्पा ॥४८॥**

**जइ तुह न अत्थि दविणं ता गिण्हसु मज्झ रयणमालाए । कंबलरयणं ताण वि पुज्जउ आसा वरायाण ॥४९॥**

**जाहेवमुवालद्धो राया दइयाए तयणु वाणियए मग्गइ तो ते वि कहंति देव ! भद्दाए गहियाणि ॥५०॥**

**तं निसुणिऊण देवी सुट्ठुयरं कोवमुवगया भणइ । वाणिगिणीए समं पि य न अत्थि सत्तं तुह नरिंद ! ? ॥५१॥**

**तो भूवइणा भद्दा भणाविया देहि मज्झ मोल्लेण । संपइ संगहियाणं कंबलरयणाणमेगं ति ॥५२॥**

**तीए पडिभणियमेयं नरिंद ! नियपुत्तसालिभद्दस्स । बत्तीसभारियाणं विहिया पयलूहणा तेहिं ॥५३॥**

**गिण्हउ चिरंतणाइं देवोऽणुग्गहउ मं विणा मोल्लं । निसुणित्तु निवो पुच्छइ अभयं को सालिभद्दवणी ? ॥५४॥**

**तेणावि अमरनिम्मियपासायप्पभिइ सव्वमक्खायं । तो विम्हिओ नरिंदो तच्चरिएणं विचिंतेइ ॥५५॥**

**अहमेव इह कयत्थो जस्स पुरे संति एरिसा वणिणो । इय चिंतिऊण संजायकोउहल्लेण नरवइणा ॥५६॥**

**भद्दाए समाइसियं संपेससु सालिभद्दनियपुत्तं । रायभवणम्मि जेणं हरिसेण अहं पलोएमि ॥५७॥**

**पडिभणियं भद्दाए मज्झ सुओ सिरिसकुसुमसुकुमालो । ससि-सूरे वि न पेच्छइ निग्गच्छइ न हु गिहाओ बहिं ॥५८॥**

---

भद्रया ततोऽवलोक्य गृहीतानि कथितमूल्येन । वणिजोऽपि हृष्टहृदया सर्वेऽपि गता निजावासे ॥ ४५ ॥

कम्बलरत्नस्वरुपं मुणित्वा विज्ञापयति चेल्लणा नृपतीम् । प्रियतम ! किं मम कृते न त्वयैकमपि सङ्गृहीतम् ? ॥४६॥

ईदृगृद्धियुक्तस्यापि चेष्टा किमीदृशी तव नरेन्द्र ! । अथवा न तव रोचते मम दत्तमुत्तमं वस्तु ॥ ४७ ॥

अपरं च तव कीर्तिं श्रुत्वेह समागता वणिजः । एवं नु तेषां पुरत देशेष्वपि लघ्वीकृत आत्मा ॥ ४८ ॥

यदि तव नास्ति द्रविणं ता गृहाण मम रत्नमालायाः । कम्बलरत्नं तेषामपि पूर्यतु आशा वराकाणाम् ॥ ४९ ॥

यदेवमुपालब्धो राजा दयितया तदनु वणिजः । मार्गन्ते तदा तेऽपि कथयन्ति देव ! भद्रया गृहीतानि ॥ ५० ॥

तन्निश्रुत्य देवी सुष्ठुतरं कोपमुपागता भणति । वणिज्या सममपि च नास्ति सत्त्वं तव नरेन्द्र ! ? ॥ ५१ ॥

तदा भूपतिना भद्रा भाणिता देहि मम मूल्येन । सम्प्रति सङ्गृहीतानां कम्बलरत्नानामेकमिति ॥ ५२ ॥

तया प्रतिभणितमेतन्नरेन्द्र ! निजपुत्रशालिभद्रस्य । द्वात्रिंशद्भार्याणां विहिता पादप्रोच्छनकास्तैः ॥ ५३ ॥

गृह्णातु चिरन्तनानि देव ! अनुगृह्णातु मां विना मूल्यम् । निश्रुत्य नृपः पृच्छत्यभयं कः शालिभद्रवणिक् ? ॥५४॥

तेनामरनिर्मितप्रासादप्रभृति सर्वमाख्यातम् । ततो विस्मितो नरेन्द्रस्तच्चरितेन विचिन्तयति ॥ ५५ ॥

अहमेवेह कृतार्थो यस्य पुरे सन्त्येदृशा वणिजः । इति चिन्तयित्वा सञ्जातकौतूहलेन नरपतिना ॥ ५६ ॥

भद्रायाः समादेशितं संप्रेषय शालिभद्रनिजपुत्रम् । राजभवने येन हर्षेणाहं प्रलोकयामि ॥ ५७ ॥

प्रतिभणितं भद्रया मम सुतः शिरिषकुसुमसुकुमालः । शशि-सूर्यावपि न पश्यति निर्गच्छति न खलु गृहाद् बहिः ॥५८॥

ता कहि तुम्ह सयासे मज्झ सुओ सामि ! कुणउ आगमणं ? । इय नाउं नरनाहो मा अपसायं कुणउ अम्ह ॥५९॥
तो भूवइणा भणियं तत्थेव अहं समागमिस्सामि । तुह सालिभद्ददंसमसमुस्सुओ आह तो भद्दा ॥६०॥
एसो महापसाओ जमिहाऽऽगमणे समुस्सुओ सामी । किंतु विलंवउ कइय वि दिवसे जं होमि पउणा हं ॥६१॥
अणुमन्निआ नरिंदेण रायभवणाओ जाव नियभवणं । सम्मज्जिऊण पडमंडवेहिं संछाइओ मग्गो ॥६२॥
कत्थइ डज्झंतागरुघडिमुहउग्गिन्नधूमपडलेहिं । अंधारियं नहयलं जलहरसोहं समुव्वहइ ॥६३॥
कत्थइ तलियातोरणमालानवतरणिकिरिणसंवलिया । रेहइ पलयसमुग्गयदिणयरसेणि व्व दुप्पेच्छा ॥६४॥
कत्थइ मोत्तियहारावलीण किरिणावलिं पलोयंता । ससिजोन्हपाणलोला हिंडंति य चउरनिउरुंबा ॥६५॥
गिहमवि भद्दाए कयं कमणीयं दारतोरणतिएण । आबद्धरयणमालाकिरिणावलिरंजियदियंतं ॥६६॥
जाणाविओ नरिंदो सेयगयमहागइंदमारूढो । संचलिओ बहुकुंकुमकद्दमिलपहं पलोयंतो ॥६७॥
ठाणट्ठाणविलासिणीविरइयवरपेच्छणाणि पेच्छंतो । भद्दाभवणे गंतुं उवविट्ठो चंदणचउक्के ॥६८॥
हरिसियहियया भद्दा मुत्ताहल-वत्थ-रयणरासीओ । उवणेइ रायपुरओ गिन्हइ न हु किं पि नरनाहो ॥६९॥
जंपइ पुत्तं दंससु पभणइ गंतूण सालिभद्दं सा । उत्तरसु पुत्त ! भवणाओ आगओ सेणिओ जम्हा ॥७०॥
सो भणइ कयाणाणं मोल्लं न मुणेमि गिण्हसु सयं पि । जाय ! कयाणयमेयं न होइ भद्दा पयंपेइ ॥७१॥
किंतु इमो तुह सामी मज्झ विइह देसमाणवाणं पि । मज्झ वि अन्नो सामि त्ति सालिभद्दो सुणित्तु इमं ॥७२॥

---

ततः कथं तव सकाशे मम सुतः स्वामिन् ! करोत्वागमनम् ? । इति ज्ञात्वा नरनाथो माऽप्रसादं करोत्वस्माकम् ॥५९॥
ततो भूपतिना भणितं तत्रैवाहं समागमिष्यामि । तव शालिभद्रदर्शनसमुत्सुक आह ततो भद्रा ॥ ६० ॥
एष महाप्रासादो यदिहाऽऽगमने समुत्सुकः स्वामी । किन्तु विलम्बतु कतिपयानपि दिवसान् यद्भवामि प्रगुणाहम् ॥६१॥
अनुमता नरेन्द्रेण राजभवनाद्यावन्निजभवनम् । सम्मार्ज्य पटमण्डपैः सञ्छादितो मार्गः ॥ ६२ ॥
कुत्रचिद् दह्यमानागुरुघटिमुखोद्गीर्णधूम्रपटलैः । अन्धकारितं नभस्तलं जलधरशोभं समुद्वहति ॥ ६३ ॥
कुत्रचित्तलिकातोरणमालानवतरणिकिरणसम्बलिता । राजते प्रलयसमुद्गतदिनकरश्रेणिरिव दुष्प्रेक्ष्या ॥ ६४ ॥
कुत्रचिन्मौक्तिकहारावलीनां किरणावलिं प्रलोकयन्तः । शशिज्योत्सनापानलोला हिण्डन्ति च चतुरनिकुरम्बाः ॥ ६५ ॥
गृहमपि भद्रया कृतं कमनीयं द्वारतोरणत्रिकेन । आबद्धरत्नमालाकिरणावलिरञ्जितदिगन्तम् ॥ ६६ ॥
ज्ञापितो नरेन्द्रः सेचनकमहागजेन्द्रमारुढः । सञ्चलितो बहुकुङ्कुमकर्दमिलपथं प्रलोकयन् ॥ ६७ ॥
स्थानस्थानविलासिनिविरचितवरप्रेक्षणानि पश्यन् । भद्राभवने गत्वोपविष्टश्चन्दनचतुष्के ॥ ६८ ॥
हर्षितहृदया भद्रा मुक्ताफल-वस्त्र-रत्नराशयः । उपनयति राजपुरतो गृह्णाति न खलु किमपि नरनाथः ॥ ६९ ॥
जल्पति पुत्रं दर्शय प्रभणति गत्वा शालिभद्रं सा । उत्तर पुत्र ! भवनादागतः श्रेणिको यस्मात् ॥ ७० ॥
स भणति क्रयाणानां मूल्यं न मुणोमि गृहाण स्वयमपि । जात ! क्रयाणकमेतन्न भवति भद्रा प्रजल्पति ॥ ७१ ॥
किन्त्वयं तव स्वामी ममापीह देशमानवानामपि । ममाप्यन्यः स्वामीति शालिभद्रः श्रुत्वेदम् ॥ ७२ ॥

**चिंतेइ गुरुविसाओ पेच्छ अहो ? अकयपुन्नपब्भारा । पुरिसा परस्स सेवाविडंबणं कमवि पाविंति ।।७३।।**

**भणियं च-**

**न करिंति जे तवं संजमं च ते तुल्लपाणि-पायाणं । पुरिसा समपुरिसाणं अवस्सपेसत्तणमुविंति ।।७४।।**

**ते चेव जए जीवंतु मुणिवरा बालकालगहियवया । मोत्तुं जे देव-गुरुं परस्स पाए न पणमंति ।।७५।।**

**जइ पुव्वं पि हु दुच्चरतव-चरणकयुज्जमो अहं हुंतो । ता इण्हिं निवपणमणविडंबणं नेय पाविंतो ।।७६।।**

**विसयमहाविसमोहियमणाण मणुयाण निव्विवेयाणं । जिणनाहभणियधम्मो मणयं पि मणं न विप्फुरइ ।।७७।।**

**एवं विचिंतऊणं कलिउं वेरग्गकारणं तं पि । अभिमाणधणो धम्मेक्कमाणसो उट्ठिओ सहसा ।।७८।।**

**पसरंतदिसिविसप्पिरपरिमलपरिभमिरभमरनिउरुंबो । सकलत्तो उत्तरिओ करेणुकलिओ करिंदो व्व ।।७९।।**

**रायचरणारविंदे पणओ आलिंगिऊण नरवइणा । उच्छंगे विणिवेसिय सच्चविओ तेण सव्वंगं ।।८०।।**

**चिंतेइ नो असज्झं सुचरियकम्माण किं पि भुवणयले । जं अमरसिरिं विलसइ पेच्छ इमो मणुयमेत्तो वि ।।८१।।**

**संभासिओ निवेणं न पयंपइ होइ सामुहच्छाओ । अंसुजलोल्लियनयणो भद्दाए तओ निवो भणिओ ।।८२।।**

**अणुवासरं पि अमरोवणीयभोएहिं लालिओ एसो । नरपरिमलं न सक्कइ सहिउं ता मुयसु नरनाह ! ।।८३।।**

**तो मुक्को नरवइणा भणिऊणं गच्छ वच्छ ! नियठाणं । आरूढो सो भवणे गंतुमणो नरवरिंदो वि ।।८४।।**

**विन्नत्तो भद्दाए सपणामं बद्धपाणिपउमाए । देव ! पडिच्छह सागयकिच्चं काउं गुरुपसायं ।।८५।।**

---

चिन्तयति गुरुविषाद: पश्याहो ! अकृतपुण्यप्राग्भारा: । पुरुषा: परस्य सेवाविडम्बनं कमपि प्राप्नुवन्ति ॥ ७३ ॥

भणितञ्च -

न कुर्वन्ति ये तप: संयमं च ते तुल्यपाणि-पादानाम् । पुरुषा: समपुरुषाणामवश्यं प्रेष्यत्त्वमुपयन्ति ॥ ७४ ॥

ते चैव जगति जीवन्तु मुनिवरा बालकालगृहीतव्रता: । मुक्त्वा ये देव-गुरू परस्य पादे न प्रणमन्ति ॥ ७५ ॥

यदि पूर्वमपि खलु दुश्चरतपश्चरणकृतोद्यमोऽहमभवम् । तदेदानीं नृपप्रणमनविडम्बनं नैव प्राप्नवम् ॥ ७६ ॥

विषयमहाविषमोहितमनसां मनुष्याणां निर्विवेकानाम् । जिननाथभणितधर्मो मनागपि मनसि न विस्फुरति ॥ ७७ ॥

एवं विचिन्त्य कलयित्वा वैराग्यकारणं तदपि । अभिमानधनो धर्मैकमानस उत्थित: सहसा ॥ ७८ ॥

प्रसरद्दिग्विसर्पत्परिमलपरिभ्रमद्भ्रमरनिकुरम्ब: । सकलत्र उत्तीर्ण: करेणुकलित: करीन्द्र इव ॥ ७९ ॥

राजचरणाविन्दे प्रणत आलिङ्ग्य नरपतिना । उत्सङ्गे विनिवेश्य दृष्टस्तेन सर्वाङ्गम् ॥ ८० ॥

चिन्तयति नासाध्यं सुचरितकर्माणां किमपि भुवनतले । यदमरश्रियं विलसति पश्यायं मनुष्यमात्रोऽपि ॥ ८१ ॥

सम्भाषितो नृपेण न प्रजल्पति भवति श्याममुखच्छाय: । अश्रुजलार्द्रितनयनो भद्रया ततो नृपो भणित: ॥ ८२ ॥

अनुवासरमप्यमरोपनीतभोगै र्लालित एष: । नरपरिमलं न शक्नोति सोढुं ततो मुञ्च नरनाथ ! ॥ ८३ ॥

तदा मुक्तो नरपतिना भणित्वा गच्छ वत्स ! निजस्थानम् । आरुढ: स भवने गन्तुमना नरवरेन्द्रोऽपि ॥ ८४ ॥

विज्ञप्तो भद्रया सप्रणामं बद्धपाणिपद्मया । देव ! प्रतीच्छ स्वागतकृत्यं कृत्वा गुरुप्रसादम् ॥ ८५ ॥

उवरोहेणं राएण मन्निए तयणु वाररमणीहिं । अब्भंगण-उव्वट्टणपुव्वं वावीजले ण्हविओ ॥८६॥
वावीजलम्मि पडियं मुद्दारयणं नरिंदहत्थाओ । तो संभंतो राया जोयइ तरलेहिं नयणेहिं ॥८७॥
भद्दाए तओ भणियं किं नियह नरिंद ! एत्थ संभंता ? । कहियं तीए नरिंदेण मुद्दियारयणजलपडणं ॥८८॥
सिग्धं चिय भद्दाए जंतपओगेण तीए वावीए । दासिं भणित्तु सलिलं संकामियमन्नावावीए ॥८९॥
तो तीए तले पेच्छइ फुरंतकिरणं विहूसणसमूहं । इंगालं व पलोयइ तम्मज्झे मुद्दियारयणं ॥९०॥
चिंतइ ( ? पुच्छइ ) य कोउहल्लेण [1]नरवई किं इमं ? ति तो भद्दा । विन्नवइ देव ! एयंनिम्मल्लं सालिभद्दस्स ॥९१॥
जम्हा अणुदिणममरो आभरणमिमस्स पणइणिजुयस्स । वियरइ तो निम्मल्लं खिप्पइ वावीए मज्झम्मि ॥९२॥
विम्हियहियओ घेत्तुं मुद्दारयणं मणुन्नसिंगारो । नंदणवणमवलोइय नियइ समग्गं पि पासायं ॥९३॥
तो देवालयपडिमं भत्तिभरुब्भूयभूरिरोमंचो । न्हवइ विलेवइ पूयइ पणमइ संथवइ नरनाहो ॥९४॥
भद्दाए तओ भणियो भोयणभवणे गओ पुहइवालो । भुत्तो य सपरिवारो कयसम्माणो गओ राया ॥९५॥
चिट्ठइ य सालिभद्दो जा विसयपरम्मुहो सुधम्ममई । ता धम्मघोससूरी समागओ नयरउज्जाणे ॥९६॥
तव्वंदणवडियाए विणिग्गओ रायपभिइपुरलोगो । आपुच्छिऊण जणणिं तत्थ गओ सालिभद्दो वि ॥९७॥
वंदित्तु समुवविट्ठाए रायपमुहाए सयलपरिसाए । भयवं पि महुरवाणीए देसणं काउमारद्धो ॥९८॥

---

उपरोधेन राज्ञा मन्यते तदनु वाररमणिभिः । अभ्यङ्गनोद्वर्तनपूर्वं वापीजले स्नापितः ॥ ८६ ॥
वापीजले पतितं मुद्रारत्नं नरेन्द्रहस्तात् । ततः सम्भ्रान्तो राजा पश्यति तरलाभ्यां नयनाभ्याम् ॥ ८७ ॥
भद्रया ततो भणितं किं पश्यथ नरेन्द्र ! अत्र सम्भ्रान्ताः ? । कथितं तस्या नरेन्द्रेण मुद्रिकारत्नजलपतनम् ॥ ८८ ॥
शीघ्रमेव भद्रया यन्त्रप्रयोगेन तस्या वाप्याः । दासीं भणित्वा सलिलं सङ्क्रामितमन्यवाप्याम् ॥ ८९ ॥
तदा तस्यास्तले पश्यति स्फुरत्किरणं विभूषणसमूहम् । इंगालमिव प्रलोकयति तन्मध्ये मुद्रिकारत्नम् ॥ ९० ॥
चिन्तयति (? पृच्छति) च कौतूहलेन नरपतिः किमिदमिति ? तदा भद्रा । विज्ञापयति देव ! एतन्निर्माल्यं शालिभद्रस्य ॥९१॥
यस्मादनुदिनममर आभरणमेतस्य प्रणयिनियुक्तस्य । वितरति ततो निर्माल्यं क्षिपति वाप्या मध्ये ॥ ९२ ॥
विस्मितहृदयो गृहीत्वा मुद्रारत्नं मनोज्ञशृङ्गारः । नन्दनवनमवलोकय पश्यति समग्रमपि प्रासादम् ॥ ९३ ॥
ततो देवालयप्रतिमां भक्तिभरोद्भुतभूरिरोमाञ्चः । स्नापयति विलेपति पूजयति संस्तौति नरनाथः ॥ ९४ ॥
भद्रया ततो भणितो भोजनभवने गतः पृथिवीपालः । भुक्तश्च सपरिवारः कृतसन्मानो गतो राजा ॥ ९५ ॥
तिष्ठति च शालिभद्रो यावद्विषयपराङ्मुखः सुधर्ममतिः । तावद्धर्मघोषसूरिः समागतो नगरोद्याने ॥ ९६ ॥
तद्वन्दनवर्त्तिकया विनिर्गतो राजप्रभृतिपुरलोकः । आपृच्छ्य जननीं तत्र गतः शालिभद्रोऽपि ॥ ९७ ॥
वन्दित्वा समुपविष्टायां राजप्रमुखायां सकलपर्षदि । भगवानपि मधुरवाण्यां देशनां कर्तुमारब्धः ॥ ९८ ॥

---

१. नरवरो किं रं० ।

**जलहिजलगलियमुत्ताहलं व दुलहं लहित्तु मणुयत्तं । कायव्वा धम्ममई भवभयभीरूहिं भविएहिं ॥९९॥**

**इय निसुणिऊण संविग्गमाणसा देसणं मुणिंदस्स । पत्ता नियनियभवणे संविग्गो सालिभद्दो वि ॥१००॥**

**गंतूणं नियभवणे जणणिं नमिऊण भणइ अंब ! मए । निसुओ जिणिंदधम्मो सुट्ठु कयं वच्छ ! सा भणइ ॥१०१॥**

**अंब ! ममं अणुजाणह पव्वज्जामि त्ति निसुणिउं भद्दा । मुच्छानिमीलियच्छी धस त्ति धरणीयले पडिया ॥१०२॥**

**चंदणजलसित्तंगी ससलिलवीयणयवीइया संती । उवलद्धचेयणा सा रुयमाणी भणिउमाढत्ता ॥१०३॥**

**वच्छ ! तमेक्को पुत्तो अब्भहियो मज्झ जीवियस्सावि । मा गिण्ह ताव दिक्खं जाव अहं जाय ! जीवेमि ॥१०४॥**

**सो भणइ न अंब ! इमं नज्जइ को जियइ ? अहव को मरइ ? । जम्हा न बाल-तरूणा थविरा वि जमस्स छुट्टंति ॥१०५॥**

**सा जंपइ जाय ! इमं नवजोव्वणसुंदरं सुरूवं च । नियसरीरं पालसु ता विविहविलासकरणेण ॥१०६॥**

**सो आह अंत-वस-किमि-पुरीसपरिपूरियस्स अथिरस्स । तवचरणमिमस्स फलं अंब ! असारस्स देहस्स ॥१०७॥**

**माता- उव्वूढजोव्वणभरा अहिणवअणुरायरंजिया जाया । बत्तीसमिमाहिं समं उवभुंजसु जाय ! विसयसुहं ॥१०८॥**

**पुत्र- मुहमहुररसा परिणामदारुणा विसमविससमा विसया । ता अंब ! एरिसेसुं विसएसु बुहा न रज्जंति ॥१०९॥**

**माता- रयण-मणि-कणय-रुप्पय-मुत्ताहलपमुहपउरधणरिद्धिं । भोगोवभोग-बंदियणदाणकज्जेहिं विलसेसु ॥११०॥**

**पुत्र- राय-जल-जलण-तक्करं-वंतर-दायायसाहिया लच्छी । मणपरिणइ व्व अथिरा ता अंब ! इमीए को मोहो ॥१११॥**

**माता- जाय ! करवालधाराचंकमणसमं सुदुक्करं चरणं । भूसयण-लोय-भिक्खऽन्नपाण-बंभव्वयाईहिं ॥११२॥**

---

जलधिजलगलितमुक्ताफलमिव दुर्लभं लब्ध्वा मनुष्यत्वम् । कर्तव्या धर्ममति र्भवभयभीरुभि र्भविकैः ॥ ९९ ॥

इति निश्रुत्य संविग्नमानसा देशनां मुनीन्द्रस्य । प्राप्ता निजनिजभवने संविग्नः शालिभद्रोऽपि ॥ १०० ॥

गत्वा निजभवने जननीं नत्वा भणत्यम्ब ! मया । निश्रुतो जिनेन्द्रधर्मः सुष्ठु कृतं वत्स ! सा भणति ॥ १०१ ॥

अम्ब ! मामनुजानीहि प्रव्रजामीति निश्रुत्य भद्रा । मूर्च्छानिमीलिताक्षी धसेति धरणितले पतिता ॥ १०२ ॥

चन्द्रनजलसिक्ताङ्गी ससलिलवीजनकवीजीता सती । उपलब्धचेतना सा रुदन्ती भणितुमारब्धा ॥ १०३ ॥

वत्स ! त्वमेकः पुत्रोऽभ्यधिको मम जीवितस्यापि । मा गृहाण तावद्दिक्षां यावदहं जात ! जीवामि ॥ १०४ ॥

स भणति नाम्ब ! इदं ज्ञायते को जीवति ? अथवा को म्रियते ? । यस्मान्न बाल-तरुणाः स्थविरा अपि यमान्मुञ्चन्ति ॥१०५॥

सा जल्पति जात ! इदं नवयौवनसुन्दरं सुरुपं च । निजकशरीरं पालय तावद्विविधविलासकरणेन ॥ १०६ ॥

स आह अन्तर्वसा-कृमि-पुरिषपरिपूरितस्यास्थिरस्य । तपश्चरणमेतस्य फलमम्ब ! असारस्य देहस्य ॥ १०७ ॥

माता-उद्वोढयौवनभरा अभिनवानुरागरञ्जिता जायाः । द्वात्रिंशदिमाभिः सममुपभुङ्क्ष्व जात ! विषयसुखम् ॥ १०८ ॥

पुत्र-मुखमधुररसाः परिणामदारुणा विषमविषसमा विषयाः । ततोऽम्ब ! इदृक्षु विषयेषु बुधा न रज्यन्ति ॥ १०९ ॥

माता-रत्न-मणि-कनक-रुप्यक-मुक्ताफलप्रमुखप्रचूरधनर्द्धिम् । भोगोपभोग-बन्दिजनदानकार्यै-र्विलस ॥ ११० ॥

पुत्र-राज-जल-ज्वलन-तस्कर-व्यन्तर-दायादस्वाधीना लक्ष्मीः । मनः परिणतिरिवास्थिरा ततोऽम्ब ! अनया को मोहः ? ॥१११॥

माता-जात ! करवालधाराचङ्क्रमणसमं सुदुष्करं चरणम् । भूशयन-लोच-भिक्षान्न-पान-ब्रह्मव्रतादिभिः ॥ ११२ ॥

**पुत्र- विसयसुहपरवसाणं कायरपुरिसाण निव्विवेयाण । दुक्करमिह तव-चरणं न कयाइ वि धीरपुरिसाण ॥११३॥**

**माता- अमुणियदुहसब्भावो वच्छ ! तुमं केलिगब्भसुकुमालो । किह विसहिसि अइदुस्सहउवसग्ग-परीसहे घोरे ? ॥११४।**

**पुत्र- नरयम्मि अंब ! असिपत्त-जंत-करवत्तकप्पणाइदुहे । सहिउं इह उवसग्गा [1]केत्तियमित्तं किलिस्संति ॥११५॥**

**माता- जइ जाय ! तए एवं कायव्वं वासराणि ता कइवि । अप्पाणं परिकम्मसु पच्छा तं कुणसु तव-चरणं ॥११६॥**

**उवरोहेणं जणणीपयंपियं मन्निउं स पासायं । गंतूण पणइणीणं पडिबोहत्थं इमं भणइ ॥११७॥**

**निच्चं परभवचिंता नरेण नियमेण होइ कायव्वा । न हु विसयलालसेहिं हारेयव्वो मणुयजम्मो ॥११८॥**

**जम्हा न होइ तित्ती नराण विसएसु निव्विवेयाण । ता विसए परिचइउं पव्वज्जमहं करिस्सामि ॥११९॥**

**जा तुम्हाण ससल्ला का वि हु अहवा अवच्चसंजुत्ता । ता गिहिधम्मं कुव्वंतु सेसया दिक्खमिच्छाए ॥१२०॥**

**दइयाओ एवमणुसासिऊण भज्जाओ तह य भोगंगे । परिहरमाणो चिट्ठइ तव-चरणसमुस्सुओ मइमं ॥१२१॥**

**इयो य-**

**तत्थेव य परिणीया भइणी धन्नेण सालिभद्दस्स । अब्भंगंती कंतं साममुही मुयइ अंसूणि ॥१२२॥**

**संपुच्छिया य धन्नेण सुयणु ! किं सोयकारणं तुज्झ ! सा भणइ सालिभद्दो पव्वजं घेत्तुकामो त्ति ॥१२३॥**

**परिकम्मणं कुणंतो दिणे दिणे पणइणिं च तूलिं च । एक्केक्कं परिमेल्लइ बोल्लइ तयणंतरं धन्नो ॥१२४॥**

---

पुत्र-विषयसुखपरवशानां कातरपुरुषाणां निर्विवेकानाम् । दुष्करमिह तपश्चरणं न कदाचिदपि धीरपुरुषाणाम् ॥ ११३ ॥

माता-अमुणितदुःखस्वभावो वत्स ! त्वं कदलीगर्भसुकुमालः । कथं विषहसे अतिदुस्सहोपसर्ग-परिषहान्घोरान् ? ॥ ११४॥

पुत्र-नरकेऽम्ब ! असिपत्र-यन्त्र-करपत्रकल्पानादिदुःखान् । सहित्वेहोपसर्गाःकेचिन्मात्रं क्लिष्यन्ति ॥ ११५ ॥

माता-यदि जात ! त्वयैवं कर्तव्यं वासराणि तावत्कानिचिदपि । आत्मानं परिकर्म पश्चात्त्वं कुरुत्र तपश्चरणम् ॥ ११६ ॥

उपरोधेन जननी प्रजल्पितं मत्वा स प्रासादम् । गत्वा प्रणयिनीनां प्रतिबोधनार्थमिदं भणति ॥ ११७ ॥

नित्यं परभवचिन्ता नरेण नियमेन भवति कर्तव्या । न खलु विषयलालसै र्हारितव्यो मनुष्यजन्म ॥ ११८ ॥

यस्मान्न भवति तृप्ति र्नराणां विषयेषुनिर्विवेकानाम् । ततो विषयान्परित्यज्य प्रव्रज्यामहं करिष्यामि ॥ ११९ ॥

या युष्माकं सशल्या काऽपि खल्वथवाऽपत्यसंयुक्ता । ता गृहिधर्मं कुर्वन्तु शेषका दिक्षामिच्छया ॥ १२० ॥

दयिता एवमनुशास्य भार्यास्तथा च भोगाङ्गान् । परिहरंस्तिष्ठति तपश्चरणसमुत्सुको मतिमान् ॥ १२१ ॥

इतश्च -

तत्रैव परिणीता भगिनी धन्येन शालिभद्रस्य । अभ्यङ्गन्ती कान्तं श्याममुखी मुञ्चत्यश्रूणि ॥ १२२ ॥

सम्पृष्टा च धन्येन सुतनु ! किं शोककारणं तव ? । सा भणति शालिभद्रः प्रव्रज्यां गृहीतुकाम इति ॥ १२३ ॥

परिकर्मकुर्वन् दिने दिने प्रणयिनिं च तूलिं च । एकैकं परिमुञ्चति वक्ति तदनन्तरं धन्यः ॥ १२४ ॥

---

१. कित्तयमेत्तं रा०

**जो गिण्हइ जिणदिक्खं काउं परिकम्मणं स काउरिसो । सप्पुरिसो पुण सुंदरि ! तणं व रिद्धिं परिच्चयइ ॥१२५॥**
**जय धण-रिद्धी सुचया ता किं न तुमं पि चयसि ? सा भणइ । इय निसुणिऊण एसो अहिमाणी भणिउमाढत्तो ॥१२६॥**
**पेच्छंतो तुह वयण ठिओ म्हि इण्हिं तु पेच्छ जं होइ । अह सा जंपइ पिययम ! एयं मह खमह परिहासं ॥१२७॥**
**किं भणिएणं बहुणा ? स आह भइणि व्व तं इयाणिं मे । अह जइ तुज्झ वि इच्छा तुमं पि ता गिण्ह पवज्जं ॥१२८॥**
**तम्मि समयम्मि तिहुयणसामी सिरिवद्धमाणजिणइंदो । संपत्तो सुररइए उवविट्ठो समवसरणम्मि ॥१२९॥**
**सेणियपमुहो लोगो गओ जिणिंदस्स वंदणनिमित्तं । विणिजुंजइ धन्नो वि हु धणरिद्धिं धम्मकज्जेसु ॥१३०॥**
**पव्वज्जासामग्गीनिरयं नाऊण धन्नयं दइया । गंतूणं वुत्तंतं सबंधुणो कहइ रुयमाणी ॥१३१॥**
**अंतरिओ हं धन्नेण चिंतिउं संठवित्तु नियभइणिं । जणणिं भज्जाओ वि य संभासिय सालिभद्दो वि ॥१३२॥**
**घोसाविऊण अभयं दाणं दीणाइयाण दाऊण । काउं जिणिंदमहिमं सम्माणिय समणसंघं च ॥१३३॥**
**नियसयण-जणणि-पणइणिपरिकलिओ आरुहित्तु सिवियाए । सलहिज्जंतो नायरजणेण तित्थं पभाविंतो ।१३४।**
**सुरलोयसरिसरिद्धिं सणंकुमारो व्व उज्झिउं ज्झत्ति । महया महूसवेणं समागओ समवसरणम्मि ॥१३५॥**
**पुरओ पहुत्तधन्नेण संगओ तयणु तत्थ भयवंतं । काउं पयाहिणतियं सधन्नओ थुणियमाढत्तो ॥१३६॥**
**जय जय परमेसर ! चरमजिणेसर ! पुन्नमससिनिम्मलवयण ! ।**
**जय धम्मपयासण !, कुगइपणासण !, वियसियसियपंकयनयण ! ॥१३७॥**

---

यो गृह्णाति जिनदिक्षां कृत्वा परिकर्मणं स कापुरुषः । सत्पुरुषः पुनः सुन्दरि ! तृणमिवर्द्धिं परित्यजति ॥ १२५ ॥
यदि धनर्द्धिः सुत्यक्ता तदा किं न त्वमपि त्यजसि ? सा भणति । इति निश्रुत्येषोऽभिमानी भणितुमारब्धः ॥१२६॥
पश्यंस्तव वदनं स्थितोऽस्मीदानीं तु पश्य यद्भवति । अथ सा जल्पति प्रियतम ! एतन्मम क्षमध्व परिहासम् ॥१२७ ॥
किं भणितेन बहुना ? स आह भगिनीव त्वमिदानीं मे । अथ यदि तवापीच्छा त्वमपि तावद्गृहाण प्रव्रज्याम् ॥१२८॥
तस्मिन्समये त्रिभुवनस्वामी श्रीवर्धमानजिनेन्द्रः । संप्राप्तः सुररचित उपविष्टः समवसरणे ॥ १२९ ॥
श्रेणिकप्रमुखो लोको गतो जिनेन्द्रस्य वन्दननिमितम् । विनियुञ्जति धन्योऽपि खलु धनर्द्धिं धर्मकार्येषु ॥ १३० ॥
प्रव्रज्यासामग्रीनिरतं ज्ञात्वा धन्यकं दयिता । गत्वा वृत्तान्तं स्वबन्धोः कथयति रुदन्ती ॥ १३१ ॥
अन्तरितो ऽहं धन्येन चिन्तयित्वा संस्थाप्य निजभगिनीम् । जननीं भार्या अपि च संभाष्य शालिभद्रोऽपि ॥ १३२ ॥
घोषयित्वाभयं दानं दीनादिकेभ्यो दत्त्वा । कृत्वा जिनेन्द्रमहिमां सन्मान्य श्रमणसङ्घं च ॥ १३३ ॥
निजस्वजन-जननि-प्रणयिनिपरिकलित आरुह्य शिबिकाम् । श्लाघ्यमानो नागरजनेन तीर्थं प्रभावयन् ॥ १३४ ॥
सुरलोकसदृशर्द्धिं सनत्कुमार इवोज्झित्वा झटिति । महता महोत्सवेन समागतः समवसरणे ॥ १३५ ॥
पुरतः प्रभुतधन्येन सङ्गतस्तदनु तत्र भगवन्तम् । कृत्वा प्रदक्षिणात्रिकं सधन्यकः स्तोतुमारब्धः ॥ १३६ ॥
जय जय परमेश्वर ! चरमजिनेश्वर ! पूर्णिमाशशिनिर्मलवदन ! ।
जय धर्मप्रकाशन ! कुगतिप्रणाशन ! विकसितसितपङ्कजनयन ! ॥ १३७ ॥

**जय वीरजिणेसर ! दिव्वनाण ! संपत्तपरमसिवसुहनिहाण ! ।**
**जय चक्क-कमललंछियसुपाय ! सिद्धत्थनरेसरअंगजाय! ॥१३८॥**

**जय कोहहुयासणअम्बुवाह ! दुट्ठट्ठकम्मवणगहणदाह ! ।**
**जयमाणसेलनिद्दलणवज्ज ! परिचत्तसयलसंसारकज्ज ! ॥१३९॥**

**जय मायाभूमिविणाससीर ! जर-जम्मपंकनिट्ठवणनीर ! ।**
**जय लोहपिसायपयंडमंत ! वरनिम्मल-सम-सियकुंददंत! ॥१४०॥**

**जय रायमहाकरिहरिकिसोर ! सन्नयजणआवयहरणचोर ! ।**
**जय दोसरेणुवियरणसमीर ! संसारमहोयहिलद्धतीर ! ॥१४१॥**

**जय मोहितिमिरनिद्दलणभाणु ! तुह नमइ जिणेसर ! सुरपहाणु ।**
**जय मयणसुहडनिम्महणवीर ! ससुरासुरनमिय ! जिणिंद ! वीर ॥ १४२ ॥**

**जय मच्छररहिय ! विमुक्कसंग ! नियसत्तिविहियसंसारभंग ! ।**
**जय संगमकयदुट्ठोवसग्गनिक्कंप ! पयासियमोक्खमग्ग! ॥१४३॥**

**जय अमरविणिम्मियसमवसरण ! सरणागयवच्छलदरियहरण ! ।**
**जय वीरजिणेसर ! करि पसाउ महु देहि सामि ! सिवपुरिहिं ठाउ ॥ १४४ ॥**

---

जय वीरजिनेश्वर ! दिव्यज्ञान ! संप्राप्तपरमशिवसुखनिधान ! ।
जयचक्र-कमललञ्छितसुपाद ! सिद्धार्थनरेश्वराङ्गजात ! ॥१३८॥

जय क्रोधहुताशनाम्बुवाह ! दुष्टाष्टकर्मवनगहनदाह ! ।
जय मानशैलनिर्द्दलनवज्र ! परित्यक्तसकलसंसारकार्य ! ॥ १३९॥

जय मायाभूमिविनाशसीर ! जरा-जन्मपङ्कनिष्ठवननीर ! ।
जय लोभपिशाचप्रचण्डमन्त्र ! वरनिर्मल-सम-सितकुन्ददन्त ! ॥ १४० ॥

जय रागमहाकरिहरिकिशोर ! सन्नयजनापद्धरणचोर ! ।
जय दोषरेणुविदारणसमीर ! संसारमहोदधिलब्धतीर ! ॥१४१॥

जय मोहतिमिरनिर्दलनभानु ! त्वां नमति जिनेश्वर ! सुरप्रधान ! ।
जय मदनसुभटनिर्मथनवीर ! ससुरासुरनत ! जिनेन्द्र ! वीर! ॥ १४२ ॥

जय मत्सररहित ! विमुक्तसङ्ग ! निजशक्तिविहितसंसारभङ्ग ! ।
जय सङ्गमकृतदुष्टोपसर्गनिष्कम्प ! प्रकाशितमोक्षमार्ग ! ॥ १४३ ॥

जयामरविनिर्मितसमवसरण ! शरणागतवत्सलदूरितहरण ! ।
जय वीरजिनेश्वर ! कृत्वा प्रसादो मम देहि स्वामिन् ! शिवपुरे स्थानम् ॥ १४४ ॥

इय जयपूरियास ! चंदाणण ! विविहतवग्गिदड्ढभवकाणण ! ।
सिरिसिद्धत्थरायवरनंदण ! पसिय मज्झ जणनयणाणंदण! ॥१४५॥
पुणरवि पणमिय सामिं भणंति भयवं ! भवोहनिम्महणिं । दिक्खं देहि जिणेसर ! जायइ दुक्खक्खओ जीए ॥१४६॥
भणियं भद्दाए वि हु जामाउय-पुत्तया इमे मज्झ । पहु ! धन्न-सालिभद्दा दिक्खादाणेणऽणुग्गहह ॥१४७॥
तत्तो तिहुयणनाहेण दिक्खिया पंचमुट्ठिकयलोया । सिक्खविया य समग्गं आयारं साहुवग्गस्स ॥१४८॥
गीयत्था संजाया अइरेण य नायसयलसुत्त-ऽत्था । विहरंति जिणेण समं कुव्वंता तिव्वतव-चरणं ॥१४९॥
पुणरवि रायगिहम्मि समागया भुवणसामिणा सद्धिं । तिव्वतव-चरणसुक्का किडिकिडिभूया महासत्ता ॥१५०॥
नरनाहपमुहपरिसाए सामिणा देसियं भवसरूवं । जायाए भिक्खवेलाए पत्थिया दो वि भिक्खट्ठा ॥१५१॥
छट्ठस्स पारणम्मि पणामपुव्वं जिणस्स आणाए । ते धन्न-सालिभद्दा पयंपिया जिणवरिंदेण ॥१५२॥
तुह सालिभद्द ! जणणी काही हरिसेण अज्ज पारणयं । तो ते तवसुसियंगा भद्दाए गिहं समणुपत्ता ॥१५३॥
सिरिवीरजिणागमणं नाउं तह धन्न-सालिभद्दाणं । भद्दाइयो गिहजणो सव्वो वि समुस्सुओ जाओ ॥१५४॥
तत्थाऽऽगया वि मुणिणो केणावि न याणिया ठिया य खणं । तत्तो य अदीणमणा महाणुभावा पडिनियत्ता ॥१५५॥
भणियं च-
सुंदर-सुकुमाल-सुभोइएण विविहेहिं तवविसेसेहिं । तह सोसविओ अप्पा जह न वि नाओ सभवणे वि ॥१५६॥

---

इति जगत्पूरिताश ! चन्द्रानन ! विविधतपोऽग्निदग्धभवकानन !
श्री सिद्धार्थराजवरनन्दन ! प्रसीद मम जननयनानन्दन ! ॥ १४५ ॥
पुनरपि प्रणम्य स्वामिं भणतो भगवन् ! भवौघनिर्मथनीम् । दिक्षां देहि जिनेश्वर ! जायते दुःखक्षयो यस्याः ॥१४६॥
भणितं भद्रयाऽपि खलु जामातृ-पुत्रकाविमौ मम । प्रभो ! धन्य-शालिभद्रौ दिक्षादानेनानुगृह्णात ॥ १४७ ॥
ततस्त्रिभुवननाथेन दिक्षितौ पञ्चमुष्ठिकृतलोचौ । शिक्षयितौ च समग्रमाचारं साधुवर्गस्य ॥ १४८ ॥
गीतार्थौ सञ्जातावचिरेण च ज्ञातसकलसूत्राऽर्थौ । विहरतो जिनेन समं कुर्वन्तौ तीव्रतपश्चरणम् ॥ १४९ ॥
पुनरपि राजगृहे समागतौ भुवनस्वामिना सार्द्धम् । तीव्रतपश्चरणशुष्कौ किडिकिडिभूतौ महासत्त्वौ ॥ १५० ॥
नरनाथप्रमुखपर्षदि स्वामिना देशितं भवस्वरुपम् । जातायां भिक्षावेलायां प्रस्थितौ द्वावपि भिक्षार्थौ ॥ १५१ ॥
षष्टस्य पारणे प्रणामपूर्वं जिनस्याज्ञया । तौ धन्य-शालिभद्रौ प्रजल्पितौ जिनवरेन्द्रेण ॥ १५२ ॥
तव शालिभद्र ! जननी करिष्यति हर्षेणाद्य पारणकम् । ततः तौ तपःशोषिताङ्गौ भद्राया गृहं समनुप्राप्तौ ॥ १५३ ॥
श्रीवीरजिनागमनं ज्ञात्वा तथा धन्य-शालिभद्रयोः । भद्रादयो गृहजनः सर्वोऽपि समुत्सुको जातः ॥ १५४ ॥
तत्राऽऽगतावपि मुनी केनापि न जानितौ स्थितौ च क्षणम् । ततश्चादीनमनसौ महानुभावौ प्रतिनिवृत्तौ ॥ १५५ ॥
भणितं च -
सुन्दर-सुकुमाल-सुभोगितेन विविधैस्तपोविशेषैः । तथा शोषित आत्मा यथा नापि ज्ञातः स्वभवनेऽपि ॥ १५६ ॥

पडिलाहिया य गोउलथेरीए पहम्मि पवरदहिएण । जुगमेत्तनिहियनयणे समागया सामिणो पासे ॥१५७॥
आलोइऊण विहिणा पुच्छंति जिणेसरं कयपणामा । भयवं ! न अम्ह विहियं पारणयं निययजणणीए ॥१५८॥
जंपइ सामी जीए दिन्नं दहियं पहम्मि तुम्हाणं । सा सालिभद्दजणणी पुव्वभवे आसि धन्न त्ति ॥१५९॥
सव्वो वि य पुव्वभवो कहिओ जा साहुदाणओ भोगा । सुमरइ पुराणजम्मं तं सोउं सालिभद्दो वि ॥१६०॥
तं चिय पारित्तु दहिं संविग्गा पुच्छिऊण जिणनाहं । खामेवि समणसंघं गहियाणसणा समाहीए ॥१६१॥
गंतुं वेभारसिलायलम्मि आराहणाए कयकिच्चा । उल्लसिरसुक्कलेसा पाउवगमणं पवज्जंति ॥१६२॥
एत्थंतरम्मि भद्दा समागया वीरवंदणनिमित्तं । नमिउं पुच्छइ धन्नो सामि कहिं सालिभद्दो य ? ॥१६३॥
परिकहिओ वुत्तंतो जिणेण सव्वो वि तो ससोया सा । ताण सयासम्मि गया निच्चलगत्ते नियइ ते वि ॥१६४॥
वारं वारं वंदिय संभासइ ते न दिंति पडिवयणं । निस्संगा तयणु इमा गुरुसोया रुयइ अइकरुणं ॥१६५॥
हा पुत्त ! पावकम्माए आगओ नियगिहे वि न हु नाओ । पडिलाहिओ न दिट्ठो न भासिओ मंदपुन्नाए ॥१६६॥
हा पुत्त ! अमरउवणीयभोयणं भुंजिऊण कह तुमए । भुत्तं भिक्खं भमिऊण अंतपंता-ऽरसाहारं ? ॥१६७॥
हा पुत्त ! मसिणवत्तीसतूलियाउवरि आसि कयनिद्दो । इण्हिं पुण खरकक्कससिलायले किह सुहं सुयसि ? ॥१६८॥
हा पुत्त ! घुसिण-हरियंदणेहिं विरइयविलेवणो आसि । इण्हिं किह घम्मजलावणद्धमल-पंकमुव्वहसि ? ॥१६९॥
हा पुत्त ! सवणसुहयरकागलिगीयप्पिओ सया आसि । इण्हिं सिवफेक्कारवमिस्से किह सुणसि घूयरवे ? ॥१७०॥

---

प्रतिलाभितौ च गोकुलस्थविर्या पथि प्रवरदध्ना । युगमात्रनिहितनयनौ समागतौ स्वामिनः पार्श्वे ॥ १५७ ॥
आलोच्य विधिना पृच्छतो जिनेश्वरं कृतप्रणामौ । भगवन् ! नावयोर्विहितं पारणकं निजजनन्या ॥ १५८ ॥
जल्पति स्वामी यथा दत्तं दधि पथि युवयोः । सा शालिभद्रजननी पूर्वभव आसीद्धन्येति ॥ १५९ ॥
सर्वोऽपि च पूर्वभवः कथिते यावत्साधुदानतो भोगाः । स्मरति पुराणजन्म तच्छ्रुत्वा शालिभद्रोऽपि ॥ १६० ॥
तदेव पारयित्वा दधि संविग्नौ पृष्ट्वा जिननाथम् । क्षमयित्वा श्रमणसङ्घं गृहीतानशनौ समाधिना ॥ १६१ ॥
गत्वा वैभारशिलातले आराधनया कृतकृत्यौ । उल्लसितशुक्ललेश्यौ पादपोपगमनं प्रपद्येते ॥ १६२ ॥
अत्रान्तरे भद्रा समागता वीरवन्दननिमित्तम् । नत्वा पृच्छति धन्यः स्वामिन् कुत्र शालिभद्रश्च ? ॥ १६३ ॥
परिकथितो वृत्तान्तो जिनेन सर्वोऽपि ततः सशोका सा । तयोः सकाशे गता निश्चलगात्रौ पश्यति तावपि ॥ १६४ ॥
वारं वारं वन्दित्वा संभाषते तौ न ददतः प्रतिवचनम् । निस्सङ्गौ तदन्विमा गुरुशोका रोदित्यतिकरुणम् ॥ १६५ ॥
हा पुत्र ! पापकर्मयाऽऽगतो निजगृहेऽपि न खलु ज्ञातः । प्रतिलाभितो न दृष्टो न भाषितो मन्दपुण्यया ॥ १६६ ॥
हा पुत्र ! अमरोपनीतभोजनं भुक्त्वा कथं त्वया । भुक्तं भिक्षां भ्रान्त्वाऽऽन्त-प्रान्तारसाहारम् ? ॥ १६७ ॥
हा पुत्र ! मसृणद्वात्रिंशत्तूलिकोपरि आसीत्कृतनिद्रः । इदानीं पुनःखरकर्कशशिलातले कथं सुखं स्वपिषि ? ॥ १६८ ॥
हा पुत्र ! घृसृणहरिचन्द्रनै र्विरचितविलेपन आसीत् । इदानीं कथं धर्मजलावनद्धमल-पङ्कमुद्वहसि ? ॥ १६९ ॥
हा पुत्र ! श्रवणसुखकरकाकलिगीतप्रियः सदाऽऽसीत् । इदानीं शिवाफुत्काररवमिश्रान् कथं शृणोसि घूकरवान् ? ॥१७०॥

हा पुत्त ! सत्तभूमियपासाए सव्वया सुहं वसिउं । किह विहरिओ सि दिणयरकरतत्ते धरणिवीढम्मि ? ॥१७१॥
हा पुत्त ! जंतवावीए गिम्हमइवाहिऊण अणुवरिसं । किह चरियं तव-चरणं नयणे निहिउं दिणयरम्मि ? ॥१७२॥
हा पुत्त ! तुह सिणेहो तारिसओ आसि मज्झ विसयम्मि । इण्हिं किं दीणाए न देसि मह[1] वयणमेत्तं पि ? ॥१७३॥
इय एवं विलवंती तेसिं वंदणसमागयनिवेण । पडिबोहिया सुहासियवयणेहिं इमं भणंतेण ॥१७४॥
भद्दे ! धन्ना एए जेहिं दुहाणं विमोइओ अप्पा । तं पि कयत्था जीए जाएणाऽऽराहणा विहिया ॥१७५॥
वयण-चलणाइयं न हु कुणंति पाओवगमणपडिवन्ना । ता मा कुणसु अकारणखेयं मणयं पि नियमेण ॥१७६॥
एमाइमहुरवयणेहिं तत्थ सा सेणिएण संठविया । नीया य नियगिहम्मि भद्दा वहुययणसंजुत्ता ॥१७७॥
ते वि हु मुणिणो मरिऊण पंचपंचोत्तरेसु उववन्ना । चविउं तओ विदेहे उववज्जिय उत्तमकुलम्मि ॥१७८॥
भोगसमिद्धि उवभुंजिऊण घेत्तूण पवरपव्वज्जं । निट्ठवियअट्ठकम्मा तयणु गमिस्संति सिद्धिपुरिं ॥१७९॥

॥ शालिभद्राख्यानकं समाप्तम् ॥८॥

अन्यच्चास्मिन्नेव जन्मनि सुपात्रदानं कल्याणवहमित्यत आह-

दिन्नं सुपत्तदानं इहेव कल्लाणकारगं होइ ।
चक्कयर-चंदणज्जा समूलदेवा उदाहरणं ॥ ६ ॥

व्याख्या - 'दत्तं' वितीर्णं सुपात्रे - गुणवत्साध्वादौ दानं-वित्तवितरणं सुपात्रदानम् 'इहैव' अस्मिन्नेव जन्मनि आस्तां परभवे 'कल्याणकारकं' सुखसमृद्धिजनकं 'भवति' जायते । निदर्शनमाह-चक्रचरश्च-चक्रचराभिधानो ब्राह्मणः, स च चन्दनार्या च-दधिवाहनराजपुत्री भगवतो महावीरस्य शिष्यका चक्रचर-चन्दनार्ये । किम्भूते ? स( ह ) मूलदेवेन राजपुत्रेण वर्तेते ये ते तथोक्ते । 'उदाहरणं' दृष्टान्त इत्यक्षरार्थः ॥ ६ ॥ भावार्थस्त्वाख्यानकेभ्यो-ऽवसेयः । तानि चामूनि ।

---

हा पुत्र ! सप्तभूमिप्रासादे सर्वदा सुखमुषित्वा । कथं विहृतोऽसि दिनकरकरतप्ते धरणिपीठे ? ॥ १७१ ॥
हा पुत्र ! यन्त्रवाप्यां ग्रीष्ममतिवाह्यानुवर्षम् । कथं चरितं तपश्चरणं नयने निधाय दिनकरे ? ॥ १७२ ॥
हा पुत्र ! तव स्नेहस्तादृश आसीन्मम विषये । इदानीं किं दीनाया न देहि मम वचनमात्रमपि ? ॥ १७३ ॥
इत्येवं विलपन्ती तयोर्वन्दनसमागतनृपेण । प्रतिबोधिता सुभाषितवचनैरिदं भणता ॥ १७४ ॥
भद्रे ! धन्यौ एतौ याभ्यां दुःखानां विमोचित आत्मा । त्वमपि कृतार्था यस्या जातेनाऽऽराधना विहिता ॥ १७५ ॥
वचन-चलनादिकं न खलु कुर्वन्ति पादोपगमनप्रतिपन्नाः । ततो मा कुर्वकारणखेदं मनागपि नियमेन ॥ १७६ ॥
एवमादिमधुरवचनैस्तत्र सा श्रेणिकेन संस्थापिता । नीता च निजगृहे भद्रा वधूजनसंयुक्ता ॥ १७७ ॥
तावपि खलु मुनी मृत्वा पञ्चपञ्चोत्तरेषूत्पन्नौ । च्युत्वा ततो विदेह उत्पद्योत्तमकुले ॥ १७८ ॥
भोगसमृद्धिमुपभुज्य गृहीत्वा प्रवरप्रव्रज्याम् । निष्ठापिताष्टकर्माणौ तदनु गमिष्यतः सिद्धिपुरिम् ॥ १७९ ॥

॥ शालिभद्राख्यानकं समाप्तम् ॥ ८ ॥

---

१. मं खं० ।

तत्रापि क्रमायातं प्रथमं तावत् चक्रचराख्यानकमाख्यायते । तच्चेदम्

आसि नररयणरोहणगिरि व्व मणिरयणचक्कनयरं ति । समुवज्जियगुणचक्को चक्कयरो दियवरो तत्थ ॥१॥

करकलियतरुणदिणयरकिरणारुणतंबभायणो एसो । नयरब्भंतरभवणेसु भमइ कणभिक्खकज्जेण ॥२॥

अह अवरदिणे केणावि तस्स दिन्ना महेसरसुएण । वरसुरहिघय-गुडाविलनवसत्तुगपिंडिया दोन्नि ॥३॥

गंतूण तओ सो वि य गिहम्मि कयनित्ततारणविहाणो । उवविट्ठो जा चिट्ठइ संतुट्ठो भोयणट्ठाए ॥४॥

ता तस्स पुव्वपुन्नाणुभावओ मासखमणपारणए । एगो महातवस्सी संपत्तो [१]भवणदारम्मि ॥५॥

दट्ठूण मुणिं तवतेयभासुरं फुरियगरुयपरिओसो । उट्ठित्तु तस्स एगं सत्तुगपिंडं पयच्छेइ ॥६॥

सहस त्ति तओ पडिया हिरण्णवुट्ठी मुणिप्पभावेण । विम्हियमणेण तो दियवरेण सव्वा वि संगहिया ॥७॥

मुणिदाणसमयसज्जियपकिट्ठपुन्नाणुभावओ नियमा । उवभुंजिऊण नर-सुरसुहाइं सो पाविही सिद्धिं ॥८॥

॥ चक्कचराख्यानकं समाप्तम् ॥९॥

इदानीं चन्दनार्याख्यानकमारभ्यते । तच्चेदम्-

अत्थि इह भरहवासे चंपा नामेण विस्सुया नयरी । कोसंबिनयरिसामी चउरंगबलेण कइया वि ॥१॥

[२]दहिवाहणगहणत्थं चंपं वेढइ सयाणियो राया । एगागी रत्तीए नावाकडगेण गंतूण ॥२॥

---

आसीन्नररत्नरोहणगिरिरिव मणिरत्नचक्रनगरमिति । समुपार्जितगुणचक्रश्चक्रचरो द्विजवरस्तत्र ॥ १ ॥

करकलिततरुणदिनकरकिरणारुणताम्रभाजन एषः । नगराभ्यन्तरभवनेषु भ्रमति कणभिक्षाकार्येण ॥ २ ॥

अथाऽपरदिने केनापि तस्मै दत्ते महेश्वरसुतेन । वरसुरभिघृत-गुडाविलनवसक्तुकपिण्डिके द्वे ॥ ३ ॥

गत्वा ततः सोऽपि च गृहे कृतनित्यतारणविधानः । उपविष्टो यावत्तिष्ठति संतुष्टो भोजनार्थे ॥ ४ ॥

तावत्तस्य पूर्वपुण्यानुभावतो मासक्षमणपारणके । एको महातपस्वी संप्राप्तो भवनद्वारे ॥ ५ ॥

दृष्ट्वा मुनिं तपस्तेजोभासुरं स्फुरितगुरुकपरितोषः । उत्थाय तस्यैकं सक्तुकपिंडं प्रयच्छति ॥ ६ ॥

सहसेति ततः पतिता हिरण्यवृष्टि र्मुनिप्रभावेन । विस्मितमनसा ततो द्विजवरेण सर्वाऽपि सङ्गृहीता ॥ ७ ॥

मुनिदानसमयसर्जितप्रकृष्टपुण्यानुभावतो नियमा । उपभुज्य नर-सुरसुखानि स प्राप्स्यति सिद्धिम् ॥ ८ ॥

॥ चक्रचराख्यानकं समाप्तम् ॥ ९ ॥

इदानीं चन्दनार्याख्यानकमारभ्यते ।

अस्तीह भरतवर्षे चम्पा नाम्ना विश्रुता नगरी । कोशाम्बीनगरीस्वामी चतुरङ्गबलेन कदाचिदपि ॥ १ ॥

दधिवाहनग्रहणार्थं चम्पां वेष्टयति शतानिको राजा । एकाकी रात्र्यां नावाकटकेन गत्वा ॥ २ ॥

---

१. दारदेसम्मि-रा० । २. इत आरभ्य ६३ पर्यन्ताः कथागाथाः श्रीनेमिचन्द्रीय-श्रीमहावीरचरित्रे १२७३ तः १३३४ पर्यन्तं वर्त्तन्त इति टीकाकृता स्वरचनायां तत एवाऽऽहृता इति ज्ञेयम् । सूचितं चाप्येतद् वृत्तिकृता स्वयमप्येत्कथाप्रान्ते ६६तमगाथायामिति ।

**दहिवाहणो विनट्ठो चंपाए जग्गहो नरिंदेण । घोसाविओ य सेणालोगेण य लूसिया नयरी ॥३॥**

**दहिवाहणस्स रन्नो वसुमइधूयाए संजुया गहिया । भयभीया एगेणे वंठेणं धारिणी देवी ॥४॥**

**वलिओ सयाणियनिवो सो वंठो भणइ एस मे भज्जा । होही इमाए धूयं एयं पुण विक्किणिस्सामि ॥५॥**

**तो धारिणी विचिंतइ एसा बाला अणज्जहत्थगया । कमवत्थं पाविस्सइ ? न नज्जइ हा ! विहिविलासो ॥६॥**

**मज्झं पि सीलखलियं होही तं तु जस-धम्मनासणयं । सुद्धस्स वरं मरणं मा जीयं सीलखलियस्स ॥७॥**

**हा हियय ! किं न फुट्टसि बंधु विउत्ताए वसणवडियाए । मज्झ तुमं ? इय दुस्सहदुक्खेणं सा उ कालगया ॥८॥**

**अव्वत्तसरं रोयइ जणणीमरणेण वसुमई दीणा । तो सो वंठो चिंतइ मरिही एसा वि जइ किंचि ॥९॥**

**जंपामि अजुत्तमहं तो मोल्लं पि हु न होइ इय नाउं । अणुयत्तंतेण दढं कोसंबिपुरीए आणीया ॥१०॥**

**वीहीए[१] उड्डिया सा दिट्ठा य धणावहेण इब्भेणं । अणलंकिया वि लावन्नपुन्नसव्वंगसोहिल्ला ॥११॥**

**आगीए चेव नज्जइ ईसरधूया नरिंदधूया वा । एसा विसमं पत्ता हंत ! अवत्थं विहिवसेणं ॥१२॥**

**ता मा वसणं दीहं पावउ करुणापवन्नच्चित्तेणं । जम्मग्गियमोल्लेणं गहिया सा सेट्ठिणा तेणं ॥१३॥**

**नीया नियघरम्मि का सि तुमं ? पुच्छिया न साहेइ । रुयइ परं पव्वालियगंडयला अंसुधाराहिं ॥१४॥**

**पियवयणेहिं सणेहं संठविया बेट्टिय त्ति पडिवन्ना । मज्जण-भोयण-वत्थाइएहिं सम्माणिया धणियं ॥१५॥**

---

दधिवाहनो विनष्टश्चम्पाया यद्ग्रहो नरेन्द्रेण । घोषयितश्च सेनालोकेन च मुषिता नगरी ॥ ३ ॥

दधिवाहनस्य राज्ञो वसुमतिदुहित्रा संयुक्ता गृहीता । भयभीतैकेन वण्ठेन धारिणी देवी ॥ ४ ॥

वलितः शतानिकनृपः स वण्ठो भणत्येष मे भार्या । भविष्यत्यस्या दुहितरमेनां पुनर्विक्रीणिष्यामि ॥ ५ ॥

तदा धारिणी विचिन्तयत्येषा बालाऽनार्यहस्तगता । कामवस्थां प्राप्स्यति ? न ज्ञायते हा ! विधिविलासः ॥ ६ ॥

ममापि शीलस्खलितं भविष्यति तत्तु यशोधर्मनाशनकम् । शुद्धस्य वरं मरणं मा जीवितं शीलस्खलितस्य ॥ ७ ॥

हा हृदय ! किं न स्फुटसि बन्धुवियुक्ताया व्यसनपतितायाः । मम त्वं ? इति दुस्सहदुःखेन सा तु कालगता ॥८ ॥

अव्यक्तस्वरं रोदिति जननीमरणेन वसुमती दीना । तदा स वण्ठश्चिन्तयति मरिष्यत्येषापि यदि किञ्चित् ॥ ९ ॥

जल्पाम्ययुक्तमहं ततो मूल्यमपि खलु न भविष्यतीति ज्ञात्वा । अनुवर्तता दृढं कोशाम्बीपूर्यामानीता ॥ १० ॥

वीथ्यां विक्रीयमाणा सा दृष्टा च धनावहेनेभ्येन । अनलङ्कृतापि लावण्यपुण्यसर्वाङ्गशोभवती ॥ ११ ॥

आकृत्या चैव ज्ञायत ईश्वरदुहिता नरेन्द्रदुहिता वा । एषा विषमां प्राप्ता हन्त ! अवस्थां विधिवशेन ॥ १२ ॥

तावन्मा व्यसनं दीर्घं प्राप्नोतु करुणाप्रपन्नचित्तेन । यन्मार्गितमूल्येन गृहीता सा श्रेष्ठिना तेन ॥ १३ ॥

नीता निजकगृहे काऽसि त्वं ? पृष्टा न कथयति । रोदिति परं प्लावितगण्डस्थलाऽश्रुधाराभिः ॥ १४ ॥

प्रियवचनैः सस्नेहं संस्थापिता पुत्रीति प्रतिपन्ना । मज्जन-भोजन-वस्त्रादिकैः सन्मानिता गाढम् ॥ १५ ॥

---

१. वीहीय उड्डिया-रं० ।

**मूला य नियय‌भज्जा भणिया धूया तुहेस ता सम्मं । तह कायव्वं जह सरइ नेय नियजणणि-जणयाणं ॥१६॥**
**चिट्ठइ य कुलघरम्मि व सा नेव्वुयमाणसा गिहे तम्मि । विणएणं सीलेण य सव्वो वि य रंजिओ लोओ ॥१७॥**
**गिहवासी पुरवासी भणइ अहो सीलचंदणा एसा । तो तीए बीयनामं संजायं चंदण त्ति फुडं ॥१८॥**
**एवं वच्चइ कालो मूला पुण मच्छरिज्जए हियए । तीए उवरि धणावहबहुमाणं पेच्छमाणी य ॥१९॥**
**चिंतइ य-**
**सव्वो वि जणो पायं अहिणववत्थुम्मि कुणइ अणुरायं । चिरपरिचियमवहीरइ ता जइ एसो इमं भज्जं ॥२०॥**
**कुणइ गुरुरायरत्तो गेहस्स असामिणी अहं होमि । इय सा तीए पावा चिट्ठइ छिड्डाइं जोयंती ॥२१॥**
**सो सेट्ठी मज्झण्हे वीहीओ आगओ गिहे विजणे । एगम्मि दिणे नत्थि उ कोइ वि जो सोयई चलणे ॥२२॥**
**ताहे चंदणबाला तत्थ पाणियं घेत्तुं । वारंतस्स वि य बला आढत्ता सोइउं चलणे ॥२३॥**
**एत्थंतरम्मि तीए छुट्टा केसा सहावसोहिल्ला । पडिहिंति कद्दमे इय चिंतेउं सेट्ठिणा झत्ति ॥२४॥**
**हत्थट्ठियलीलाजट्ठियाए धरिया तहेव बद्धा य ओलोवणोवविट्ठा मूला चिंतेइ तं दट्ठुं ॥२५॥**
**नूण विणट्ठं कज्जं ता तरुणो चेव छिज्जए वाही । जइ पुण परिणेइ इमं ता मज्झ मुहे भवइ छारो ॥२६॥**
**अन्नं च-**
**वरि हउं मुय वरि हउं म जाय वरि विसहरि खद्धी, वरि उब्भिय सूलियहिं भिन्न वरि हुयवहि दद्धी ।**

---

मूला च निजकभार्या भणिता दुहिता तवैषा ततः सम्यक् । तथा कर्तव्यं यथा स्मरति नैव निजजननी-जनकौ ॥१६॥
तिष्ठति च कुलगृह इव सा निवृत्तमानसा गृहे तस्मिन् । विनयेन शीलेन च सर्वोऽपि च रञ्जितो लोकः ॥ १७ ॥
गृहवासी पुरवासी भणत्यहो शीलचन्दनैषा । ततस्तस्या द्वितीयनामं सञ्जातं चन्दनेति स्फुटम् ॥ १८ ॥
एवं व्रजति कालो मूला पुनर्मत्सरिते हृदये । तस्या उपरि धनावहबहुमानं पश्यन्ती च ॥ १९ ॥ चिन्तयति च—
सर्वोऽपि जनः प्रायोऽभिनववस्तुनि करोत्यनुरागम् । चिरपरिचितमवधीरति ततो यद्येष इमां भार्याम् ॥ २० ॥
करोति गुरुरागरक्तो गृहस्यास्वामिन्यहं भवामि । इति सा तस्याः पापा तिष्ठति छिद्राणि पश्यन्ती ॥ २१ ॥
स श्रेष्ठिर्मध्याह्ने वीथ्या आगतो गृहे विजने । एकस्मिन्दिने नास्ति तु कोऽपि यः शुच्यति चरणौ ॥ २२ ॥
तदा चन्दनबालोपस्थिता तत्र पानीयं गृहीत्वा । वार्यमाणस्यापि च बालाऽऽरब्धा शोचितुं चरणौ ॥ २३ ॥
अत्रान्तरे तस्या मुत्कलाः केशाः स्वभावशोभमानाः । पतिष्यन्ति कर्दम इति चिन्तयित्वा श्रेष्ठिना शीघ्रम् ॥ २४ ॥
हस्तस्थितलीलायष्ट्या धृतास्तथैव बद्धाश्च । अवलोकनोपविष्टा मूला चिन्तयति तद्दृष्ट्वा ॥ २५ ॥
नूनं विनष्टं कार्यं ततस्तरुण एव छिद्यते व्याधिः । यदि पुनःपरिणयतीमां ततो मम मुखे भवति क्षारः ॥ २६ ॥
अन्यच्च -
वरं भवतु मृतं वरंभवतुमा जातं वरं विषधर खादितम्, वरमुद्भिन्नशूलिकाभिर्भिन्नं वरं हुतवहे दग्धम् ।

**वरि उब्बंधिय रुक्खडालि वरि खड्डुहिं घल्लिय । मँ मइं दिट्ठु सवत्तिजुत्तु पिउ हियडासल्लिय ॥२७॥**

**इय एवमाइ चिंतिय सेट्ठम्मि विणिग्गए गरुयरोसा । निद्दयचित्ता पहणइ सिरं च मुंडावए तीए ॥२८॥**

**नियलेहि य बंधावइ चलणेसुं ओयरम्मि पक्खिवइ । पभणइ जो सेट्ठिस्सा साहिस्सइ सो ममं वइरी ॥२९॥**

**गिहमागओ य पुच्छइ सेट्ठी भो ? चंदणा कहिं चिट्ठे । मूलाए य भएणं न परियणो साहई कोइ ॥३०॥**

**सो मुणइ रमइ कत्थइ रत्तिं जाणाइ नवरि सा सुत्ता । बीयदिवसे न दिट्ठा पुट्ठा य न केणई सिट्ठा ॥३१॥**

**तइयदिणे परिकुविओ भणइ य मारेमि जइ न साहेह । ताहे एगा थेरी चिंतइ किं जीएण ? ॥३२॥**

**सा जियउ महाभागा मज्झ वि जीएण पाविया एसा । मूला जं सियबीयाससिलेहानिक्कलंकाए ॥३३॥**

**एइए इमं ववसइं[१] नरयनिमित्तं तओ य थेरीए । सेट्ठिस्स जहावत्थं मूलाए चेट्ठियं कहियं ॥३४॥**

**सेट्ठी वि अहो ! पावा मूला निद्धम्म-निद्दयसहावा । इस चिंतन्तो ओवरगदारमुग्धाडए सिग्धं ॥३५॥**

**दट्ठुं तं सुसियंगिं तिस-भुक्खकिलामियं सुदीणमुहं । रे जीव ! सहसु दुक्कयकम्मफलं एव भावंती ॥३६॥**

**बाहजलभरियनयणो गुरुदुक्खो पायए जलं थोयं । नियइ य भोयणजायं नत्थि य भवियव्वयवसेणं ॥३७॥**

**कुम्मास च्चिय दिट्ठा न य दिट्ठं तत्थ भायणं किं पि । उस्सुगभावेणं चिय सुप्पे काऊण कुम्मासे ॥३८॥**

**पासेसु पुत्ति ! एए तुह भंजावेमि जाव नियले हं । इय भणिय ते पणामिय लोहारघरं गओ सेट्ठी ॥३९॥**

---

वरमुद्बद्धं वृक्षशाखायां वरं गर्तायां क्षिप्तम् । मां मति दृष्ट्वा सपत्नियुक्तं प्रियं हृदयशल्यिता ॥ २७ ॥

इत्येवमादि चिन्तयित्वा श्रेष्ठिनि विनिर्गते गुरुकरोषा । निर्दयचित्ता प्रहन्ति शिरश्च मुण्डापयति तस्या: ॥ २८ ॥

निगडैश्च बन्धयतिचरणयोरपवरके प्रक्षिपति । भणति य: श्रेष्ठिन: कथिष्यति स मम वैरी ॥ २९ ॥

गृहमागतश्च पृच्छति श्रेष्ठी भो ! चन्दना कुत्र तिष्ठति ? । मूलायाश्चभयेन न परिजन: कथयति कोऽपि ॥ ३० ॥

स मुणाति रमते कुत्रचिद्रात्रिं जानाति नवरि सा सुप्ता । द्वितीयदिवसे न दृष्टा पृष्टा च न केनचिच्छिष्टा ॥ ३१ ॥

तृतीयदिने परिकुपितो भणति च मारयामि यदि न कथयत । तदैका स्थविरी चिन्तयति किं मम जीवितेन ? ॥३२॥

सा जीवतु महाभागा ममापि जीवितेन प्राप्तैषा । मूला यत् सितद्वितीयाशशिलेखानिष्कलङ्काया: ॥ ३३ ॥

एतस्या इदं व्यवसति नरकनिमित्तं ततश्च स्थविर्या । श्रेष्ठिनो यथावस्थं मूलायाश्चेष्टितं कथितम् ॥ ३४ ॥

श्रेष्ठ्यप्यहो ! पापा मूला निर्धर्म-निर्दयस्वभावा । इति चिन्तयन्नपवरकद्वारमुद्धाट्यति शीघ्रम् ॥ ३५ ॥

दृष्ट्वा तां शोषिताङ्गीं तृड्बुभुक्षाक्लामितां सुदीनमुखाम् । रे जीव ! सहस्व दृष्कृतकर्मफलमेव भावयन्तीम् ॥ ३६ ॥

बाष्पजलभृतनयनो गुरुदु:ख: पाययति जलं स्तोकम् । पश्यति च भोजनजातं नास्ति च भवितव्यतावशेन ॥ ३७ ॥

कुल्माषाश्चैव दृष्टा न च दृष्टं तत्र भाजनं किमपि । उत्सुकभावेनैव सूर्पे कृत्वा कुल्माषान् ॥ ३८ ॥

पारय पुत्री ! एतांस्तव भञ्जयामि यावन्निगडानहम् । इति भणित्वा तानर्पयित्वा लोहकारगृहं गत: श्रेष्ठी ॥ ३९ ॥

---

१. विलसइइ-खं० ।

सा तयवत्था सुमरिय पिउगेहं हत्थिणीव नियजूहं । मुत्ताहलसरिसाइं रोयइ अंसूणि मुयमाणी ॥४०॥
जणयविओगं पत्त जणणीमरणं च बंधुविरहं च । परदेसमिममवत्थं हा हा ! देवस्स परिणामो ॥४१॥
तारिसकुलजायाए तारिससीलाए एरिसं वसणं । ता नत्थि सा अवत्था कम्मवसा जा न संपडइ ॥४२॥
एवं चिंतेमाणी उद्धठिया गरुयदुक्खपभारा । पुरओ कयसुप्पा सा चिट्ठइ पुरओ पलोयन्ती ॥४३॥
जइ कोइ एज्ज अतिही ता अट्ठमपारणं करेमि अहं । एए च्चिय कुम्मासे दाउमवत्थोचिए तस्स ॥४४॥
एवं चिंतंतीए तीए पुन्नाणुभावओ सामी । संपत्तो तं दट्ठुं खणेण जाया विगयदुक्खा[१] ॥४५॥
गुरुहरिसभरा चिंतइ दरिद्दगेहे हिरन्नवुट्ठि व्व । संपत्तो मे भयवं कयपुन्नाए इहावसरे ॥४६॥
तो सुप्पं दरिसित्ता पयमेगं काउमेलुगाबाहिं । बीयं चंऽतो पभणइ भयवमणुग्गहह कुम्मासे ॥४७॥
पुन्नो अभिग्गहो मे दव्वाइचउव्विहो वि इय नाउं । कुम्मासग्गहणत्थं पसारिओ सामिणा पाणी ॥४८॥
दिन्ना य चंदणाए पंच य दिव्वाणि पाउभूयाणि । जिणपारणगं जायं पंचदिणेणूण छम्मासे ॥४९॥
देवा य सन्निवइया केसा तीए य वरतरा जाया । तुट्टा तडत्ति नियला सुवन्नमणिनेउरा जाया ॥५०॥
अमरेहि य सा विहिया सव्वालंकारभू[२]सियावयवा । पहयमहिरेणु उदयं वुट्ठं हरिचंदणुम्मीसं ॥५१॥
मुक्काइं अइभरेणं दसद्धवन्नाइं सुरहिकुसुमाइं । पहयाओ दंदुहीओ चेलुक्खेवो कओ परमो ॥५२॥

---

सा तदवस्था स्मृत्वा पितृगृहं हस्तीनीव निजयूथम् । मुक्ताफलसदृशानि रोदित्यश्रूणि मुञ्चन्ती ॥ ४० ॥
जनकवियोगं प्राप्ता जननीमरणं च बन्धुविरहं च । परदेशमिमामवस्थां हा हा ! दैवस्य परिणामः ॥ ४१ ॥
तादृशकुलजातायास्तादृशशीलाया ईदृशं व्यसनम् । ततो नास्ति साऽवस्था कर्मवशा या न संपतति ॥ ४२ ॥
एवं चिन्तयन्त्युर्ध्वस्थिता गुरुकदुःखप्राग्भारा । पुरतः कृतसूर्पा सा तिष्ठति पुरतः प्रलोकयन्ती ॥ ४३ ॥
यदि कोऽपीयेदतिथिस्तदाऽष्टमपारणं करोम्यहम् । एतांश्चैव कुल्माषान्दत्वाऽवस्थोचितांस्तस्य ॥ ४४ ॥
एवं चिन्तयन्त्यास्तस्याः पुण्यानुभावतः स्वामी । संप्राप्तस्तं दृष्ट्वा क्षणेन जाता विगतदुःखा ॥ ४५ ॥
गुरुहर्षभृता चिन्तयति दरिद्रगृहे हिरण्यवृष्टिरिव । संप्राप्तो मे भगवान् कृतपुण्याया इहावसरे ॥ ४६ ॥
ततः सूर्पं दर्शयित्वा पदमेकं कृत्वेलुकाबहिः । द्वितीयं चान्तः प्रभणति भगवन्नुगृह्णीत कुल्माषान् ॥ ४७ ॥
पूर्णोऽभिग्रहो मे द्रव्यादिचतुर्विधोऽपीति ज्ञात्वा । कुल्माषग्रहणार्थं प्रसारितः स्वामिना पाणिः ॥ ४८ ॥
दत्ताश्च चन्दनया पञ्च च दिव्यानि प्रादुर्भूतानि । जिनपारणकं जातं पञ्चदिनेनोने षण्मासे ॥ ४९ ॥
देवाश्च सन्निपातिकाः केशास्तस्याश्च वरतराजाताः । त्रुटितास्तडिति निगडाः सुवर्णमणिनेपूरा जाताः ॥ ५० ॥
अमरैः सा विहिता सर्वालङ्कारभूषितावयवा । प्रहतमहिरेणुमुदकं वृष्टं हरिचन्दनोन्मिश्रम् ॥ ५१ ॥
मुक्तान्यतिभारेण दशार्द्धवर्णानि सुरभिकुसुमानि । प्रहता दुन्दुभ्यश्चेलोत्क्षेपः कृतः परमः ॥ ५२ ॥

---

१. विगयसोला-रं० । २. ब्भूसिया बाला-रं० ।

**घुट्ठं च 'अहो दाणं' गयणे सक्को समागओ तुट्ठो । कोडीओ अद्धतेरस तहिं सुवन्नस्स वुट्ठाओ ॥५३॥**
**गायंति य नच्चंति य वायंति पढंति तह य मुंचंति । उक्किट्ठनायममरा पारणए तम्मि वीरस्स ॥५४॥**
**जाओ पुरे पघोसो चंदणबालाए पुन्नकलियाए । पाराविओ मुणिंदो धणावहो तो समावन्नो ॥५५॥**
**राया मिगावई वि य नंदाऽमच्चो य आगया तत्थ । दट्ठुं पारणमहिमं परमपमोयं गया सव्वे ॥५६॥**
**दहिवाहणस्स रन्नो संपुलओ नाम कंचुइज्जो उ । बंदित्तेणाऽऽणीओ सो पेच्छिय चंदणकुमारिं ॥५७॥**
**चलणेसु पडिय रोवइ रन्ना पुट्ठो य का इमा कन्ना ? । दहिवाणस्स रन्नो एसा धूय त्ति सो आह ॥५८॥**
**तं आलिंगिय पभणइ मिगावई एस भइणिधूया मे । राया हिरन्नवुट्ठिं गेण्हंतो वारिओ हरिणा ॥५९॥**
**जस्सेसा भो ! वियरइ तस्स इमा होइ पुच्छिया सा य । तायस्स मए दिन्नं हिरन्नमेयं ति सा भणइ ॥६०॥**
**सक्केण निवो भणिओ एसा वीरस्स सिस्सिणी पढमा । होही चरमसरीरा केवलनाणम्मि उप्पन्ने ॥६१॥**
**ता संगोवाहि तुमं परिवालसु आयरेण परमेणं । रन्ना तह त्ति भणिउं कन्नंतेउरगिहे नीया ॥६२॥**
**मूला धणावहेणं निच्छूढा धाडिया तह जणेणं । निंदित्ता खिंसित्ता विगोइया नयरमज्झम्मि ॥६३॥**
**सो वि हु चंदणबाला उप्पन्ने केवलम्मि वीरस्स । संविग्गा पव्वइया ठविया य पवित्तिणिपयम्मि ॥६४॥**
**ता एसा इहइं चिय जाया कल्लाणभायणं तत्तो । उप्पन्नविमलनाणा संपत्ता सासयं ठाणं ॥६५॥**
**एयं च चंदणज्जाकहाणयं सुत्तकारिकविरइयं । सव्वं तयक्खरं चिय गुरुबहुमाणाओ लिहियं ति ॥६६॥**

**॥ चन्दनार्याख्यानकं समाप्तम् ॥१०॥**

---

घृष्टं 'चाहोदानं' गगने शक्र: समागतस्तुष्ट: । कोटयोऽर्द्धत्रयोदश तत्र सुवर्णस्य वृष्टा: ॥ ५३ ॥
गायन्ति च नृत्यन्ति च वाद्यन्ति पठन्ति तथा च मुञ्चन्ति । उत्कृष्टनादममरा: पारणके तस्मिन्वीरस्य ॥ ५४ ॥
जात: पुरे प्रघोषश्चन्दनबालया पुण्यकलितया । पारयितो मुनीन्द्रो धनावहस्तत: समापन्न: ॥ ५५ ॥
राजा मृगावत्यपि च नन्दाऽमात्यश्चागतास्तत्र । दृष्ट्वा पारणमहिमां परमप्रमोदं गता: सर्वे ॥ ५६ ॥
दधिवाहनस्य राज्ञ: संपुलकोनाम कञ्चुकी तु । बन्दित्वेनाऽऽनीत: स दृष्ट्वा चन्दनाकुमारीम् ॥ ५७ ॥
चरणयो: पतित्वा रोदिति राज्ञा पृष्टश्च केमा कन्या ? । दधिवाहनस्य राज्ञो दुहितेति स आह ॥ ५८ ॥
तामालिङ्ग्य प्रभणति मृगावत्येषा भगिनीदुहिता मे । राजा हिरण्यवृष्टिं गृह्णन् वारितो हरिणा ॥ ५९ ॥
यस्यैषा भो ! वितरति तस्येमा भवति पृष्टा सा च । तातस्य मया दत्तं हिरण्यमेतदिति सा भणति ॥ ६० ॥
शक्रेण नृपो भणित एषा वीरस्य शिष्या प्रथमा । भविष्यति चरमशरीरा केवलज्ञान उत्पन्ने ॥ ६१ ॥
तत: संगोपय त्वं परिपालयादरेण परमेण । राज्ञा तथेति भणित्वा कन्यान्त:पुरगृहे नीता ॥ ६२ ॥
मूला धनावहेन निष्कासिता तथा जनेन । निन्दिता खिंसिता विगोपिता नगरमध्ये ॥ ६३ ॥
सापि खलु चन्दनबालोत्पन्ने केवले वीरस्य । संविग्ना प्रव्रजिता स्थापिता च प्रवर्तिनिपदे ॥ ६४ ॥
तावदेषेहैव जाता कल्याणभाजनं तत: । उत्पन्नविमलज्ञाना संप्राप्ता शाश्वतं स्थानम् ॥ ६५ ॥
एतच्च चन्दनार्याकथानकं सूत्रकारिकविरचितम् । सर्वं तदक्षरमेव गुरुबहुमानतो लिखितमिति ॥ ६६ ॥

**॥ चन्दनार्याख्यानकं समाप्तम् ॥ १० ॥**

इदानीं मूलदेवाख्यानकमारभ्यते । तच्चेदम्-

पउरपुर-गरुयपव्वयफणिवइकयभार भारहे वासे । अत्थि विदेहाविसए कुसुमपुरं नाम नयर-न्ति ॥१॥

दीसंति जत्थ निच्चं नरमणिसंदोहभूसियाऽऽवासा । नयनायसंपयओ नयपरमो नरवई तत्थ ॥२॥

विक्खायसयलनरवइसिरोमणी कुसुमसेहरो नाम । दुव्वारवइरिवारणनिवारण जस्स भुयदंडा ॥३॥

जम्मि जयलालसम्मि वसुंधराभारमुव्वहंतम्मि । उत्तिन्नभरो कमढो रइसुहलीलं समुव्वहइ ॥४॥

सयलंतेउरसारा विसालकुलसंभवा विसालच्छी । नियरूवोवहसियतियससुंदरी सुंदरी भज्जा ॥५॥

तीए सह विसयसोक्खं अणुहवमाणस्स तस्स सुहियस्स । अइकमइ कोइ कालो रज्जधुराधरणधवलस्स ॥६॥

कालेण समुप्पन्नो पुन्नज्जियसव्वसुंदरावयवो । सुहसुमिणसूइयासेसलक्खणजुओ सुओ तस्स ॥७॥

कयमूलदेवनामो सुललियकरपंचधाइदुल्ललिओ । पणइयणमणभिरामो स बालभावं अइक्कन्तो ॥८॥

निस्सेसकलाकुसलो विलसिरलायन्नमणहरसरीरो । तरूणियणमणभिरामं संपत्तो जोव्वणारंभं ॥९॥

अह अन्नया कयाई अणेगभडकोडिसंकडत्थाणे । जा चिट्ठइ नरनाहो ता पडिहारेण विन्नत्तं ॥१०॥

पहु ! पउरपउरलोगो रायदुवारम्मि चिट्ठइ [१]निसिद्धो । पहुपायपउमदंसणसमुस्सुओ को समाएसो ? ॥११॥

अह भणइ नरवरिंदो दसणावलिकिरणधवलियदियन्तो । रे ! झत्ति तं पवेससु मह पुरओ पउरपुरलोयं ॥१२॥

---

इदानीं मूलदेवाख्यानकमारभ्यते ।

प्रचूरपुरगुरुकपर्वतफणिपतिकृतभारे भारते वर्षे । अस्ति विदेहाविषये कुसुमपुरं नाम नगरमिति ॥ १ ॥

दृश्यन्ति यत्र नित्यं नरमणिसंदोहभूषितावासाः । नयन्यायसंपत्पदो नयपरमो नरपतिः तत्र ॥ २ ॥

विख्यातसकलनरपतिशिरोमणी कुसुमशेखरो नाम । दुर्वारवैरिवारणनिवारणौ यस्य भूजदण्डौ ॥ ३ ॥

यस्मिञ्जयलालसे वसुन्धराभारमुद्ववहति । उत्तीर्णभारः कमठो रतिसुखलीलां समुद्वहति ॥ ४ ॥

सकलान्तःपुरसारा विशालकुलसम्भवा विशालाक्षी । निजरुपोपहसितत्रिदशसुन्दरी सुन्दरी भार्या ॥ ५ ॥

तस्याः सह विषयसौख्यमनुभवतस्तस्य सुखितस्य । अतिक्रामति कोऽपि कालो राज्यधूराधरणधवलस्य ॥ ६ ॥

कालेन समुत्पन्नः पुण्यार्जितसर्वसुन्दरावयवः । शुभस्वप्नसूचिताशेषलक्षणयुक्तः सुतस्तस्य ॥ ७ ॥

कृतमूलदेवनामः सुललितकरपञ्चधात्रीदुर्ललितः । प्रणयिजनमनोऽभिरामः स बालभावमतिक्रान्तः ॥ ८ ॥

निःशेषकलाकुशलो विलसल्लावण्यमनोहरशरीरः । तरुणिजनमनोऽभिरामं संप्राप्तो यौवनारम्भम् ॥ ९ ॥

अथान्यदा कदाचिदनङ्गभटकोटिसंकीर्णस्थाने । यावत्तिष्ठति नरनाथस्तावत्प्रतिहारेण विज्ञप्तम् ॥ १० ॥

प्रभो ! प्रचूरपौरलोको राजद्वारे तिष्ठति निषिद्धः । प्रभुपादपद्मदर्शनसमुत्सुकः कः समादेशः ? ॥ ११ ॥

अथ भणति नरवरेन्द्रो दशनावलिकिरणधवलितदिगन्तः । रे ! शीघ्रं तं प्रवेशय मम पुरतः प्रचूरपुरलोकम् ॥ १२ ॥

---

१. निविट्ठों-रं० ।

नरवइआएसेणं पवेसिओ विहियउचियसम्माणो । धरणीयलमिलियनिडालमंडलो पणमिय निविट्ठो ॥१३॥
तो भणइ नरवरिंदो किं मह दंसणसमुस्सुओ लोओ । परचक्क-चोर-चरडाइडामरं किं नु मह रज्जे ? ॥१४॥
किं वा को वि हु असरिसपसायसंपत्तिदाणदुल्ललिओ । कुणइ पराभवमासंधिओ[१] जणो रायउलठाई ॥१५॥
एवं जाव पयंपइ नरनाहो विहियपणयसम्माणो । ता मउलिमिलियकरकमलसंपुडो पभणए सेट्ठी ॥१६॥
तइ पालंते जयपहु ! अइपयडपयावपहयपडिवक्खे । सुविणे वि देव ! नऽन्नो अम्हं भुवणे वि भयहेऊ ॥१७॥
किंतु परदाररसिओ नयपालियपरियणो महियमित्तो । परमायायाररओ बंदीकयसयलपउरजणो ॥१८॥
खत्तेण गहियरह-गय-माणिक्को हयपहाणपत्तियणो । रायचरिएहिं कुमरो एवं नयरं महइ देव ! ॥१९॥
इय निसुणिय पउरजणे विसज्जए विहियउचियपडिवत्ती । अंतगुरुकोवहुयवहधूमसिहासामलच्छाओ ॥२०॥
एत्थंतरम्मि कुमरो हारविरायंतवियडवच्छयलो । पिउपायपणमणकए समागओ तत्थ अत्थाणे ॥२१॥
पणमंतसयलसामंतमउलिमणिरयणकिरणकच्छुरिए । पयकमले मिलियनिडालमंडलो पणमइ कुमारो ॥२२॥
जंपेइ महीवालो कयभिउडीभंगभासुरनिडालो । खत्तियणगोत्तखंपण ! अवसर मह दिट्ठिपसराओ ॥२३॥
कुमरो वि गुरुपराभवमन्नुभरुप्पन्नअसरिसामरिसो । पिइपरुसवयणपरिभवमसहंतो चिंतए हियए ॥२४॥
उज्झंति धणं मुंचंति परियणं महियलं परिचयंति । मरणे वि महासत्ता न उणो माणं परिहरंति ॥२५॥

---

नरपत्यादेशेन प्रवेशितो विहितोचितसन्मानः । धरणीतलमिलितनिडालमण्डलः प्रणम्य निविष्टः ॥ १३ ॥
ततो भणति नरवरेन्द्रः किं मम दर्शनसमुत्सुको लोकः । परचक्रचौर-चरटादिडमरं किं नु मम राज्ये ? ॥ १४ ॥
किं वा कोऽपि खलु असदृशप्रसादसंप्राप्तिदानदुर्ललितः । करोति पराभवं[१] विश्वस्तो जनो राजकुलस्थायी ॥ १५ ॥
एवं यावत्प्रजल्पति नरनाथो विहितप्रणतसन्मानः । ततो मौलिमिलितकरकमलसम्पुटः प्रभणति श्रेष्ठी ॥ १६ ॥
त्वयि पालयति जगत् प्रभो ! अतिप्रकटप्रतापप्रहतप्रतिपक्षे । स्वप्नेऽपि देव ! नान्योऽस्माकं भुवनेऽपि भयहेतुः ॥ १७ ॥
किन्तु परदाररसिको नयपालितपरिजनो महितमित्रः । परमायाचाररतो बन्दीकृतसकलपौरजनः ॥ १८ ॥
क्षात्रेण गृहीतरथ-गज-माणिक्यो हयप्रधानपत्तिजनः । राजचरित्रैः कुमार एवं नगरं काङ्क्षति देव ! ॥ १९ ॥
इति निश्रुत्य पौरजनं विसर्जति विहितोचितप्रतिपत्तिः । अन्तर्गुरुकोपहुतवहधुम्रशिखाश्यामलच्छायः ॥ २० ॥
अत्रान्तरे कुमारो हारविराजद्विकटवक्षःस्थलः । पितृपादप्रणमनकृते समागतस्तत्राऽऽस्थाने ॥ २१ ॥
प्रणमत्सकलसामन्तमौलिमणिरत्नकिरणकच्छुरिते[२] । पदकमले मिलितनिडालमण्डलः प्रभणति कुमारः ॥ २२ ॥
जल्पति महीपालः कृतभृकुटीभङ्गभासुरनिडालः । क्षत्रिजनगोत्रक्षम्पन ! अपसर मम दृष्टिप्रसरात् ॥ २३ ॥
कुमारोऽपि गुरुपराभवमन्युभरोत्पन्नासदृशामर्षः । पितृपरुषवचनपरिभवमसहमानश्चिन्तयति हृदि ॥ २४ ॥
उज्झन्ति धनं मुञ्चन्ति परिजनं महितलं परित्यजन्ति । मरणेऽपि महासत्त्वा न पुन र्मानं परिहरन्ति ॥ २५ ॥

---

१. ओसंधिअ-विश्वस्त । २. व्याप्त इत्यर्थः ।

**अवि मरणमसमसाहसगिरिभइरवपडणवड्डियुच्छाहे । अहिलसइ महासत्तो न उणो माणं परिच्चयइ ॥२६॥**
**इय चिंतिऊण कुमरो पणमित्ता पायपंकयं रन्नो । अत्थाणाओ नियत्तो तत्तो रयणीए जायाए ॥२७॥**
**अहिमाणधणो नयराओ निग्गओ असमसाहससहाओ । वइरिकरिकुम्भदारणकरकलियकरालकरवालो ॥२८॥**
**अणवरयमक्कमंतो गामाऽऽगरनगरमंडियं वसुहं । गुडियकयवामणंगो संपत्तो नयरिमुज्जेणिं ॥२९॥**
**तत्थ दुरोदरदइओ निच्चं कलगीयदिन्नमइपसरो । अन्नायकुल-परक्कमपरमत्थो निवसइ सुहेण ॥३०॥**
**अह अन्नया य दिट्ठो किन्नरकलगीयवावडो तत्थ । नियभवणमत्तवारणपरिविलसिरदेवदत्ताए ॥३१॥**
**गीयाणुरायरत्ता वामणए तम्मि पेसए दासिं । साणुणयं सप्पणयं ससिणेहं सा वि तं भणइ ॥३२॥**
**वामणय ! तुम्ह दंसणसमुस्सुया सामिणी समाइसइ । मह किन्नर ! मणहरणो होसि तुमं गिहपवेसेण ॥३३॥**
**तो भणइ मूलदेवो का सा तुह सामिणी ? तओ भणइ । सोहग्गजयपडाया पणंगणा देवदत्त त्ति ॥३४॥**
**अह भणइ मूलदेवो विस्सासो मह न अत्थि वेसासु । खणरत्त-विरत्तासुं अवरा-ऽवरहरियचित्तासुं ॥३५॥**
**इयरासु वि जुवईसुं न वीससेयव्वमेत्थ कुडिलासु । विसमविससन्निभासुं किं पुण वेसासु विस्सासो ? ॥३६॥**
**अन्नोन्ननेहनिब्भररसाणुविद्धो न जत्थ सब्भावो । रूवावहरियदेहो न वामणो तत्थ अल्लियइ ॥३७॥**
**जा एवं नाऽऽगच्छइ ता साहइ सामिणीए सा गंतुं । सा वि पुणो वि भणावइ दासीवयणेण वयणमिणं ॥३८॥**
**आगच्छ एक्कवारं उवरोहेणावि मज्झ गेहम्मि । दक्खिन्ननीरनिहिणो हवंति जेणेत्थ सप्पुरिसा ॥३९॥**

---

अपि मरणमसमसाहसगिरिभैरवपतनवर्धितोत्साहान् । अभिलषति महासत्त्वो न पुन र्मानं परित्यजति ॥ २६ ॥
इति चिन्तयित्वा कुमरः प्रणम्य पादपङ्कजं राज्ञः । आस्थानान्निवृतःस्ततो रजन्यां जातायाम् ॥ २७ ॥
अभिमानधनो नगरान्निर्गतोऽसमसाहससहायः । वैरिकरिकुम्भदारणकरकलितकरालकरवालः ॥ २८ ॥
अनवरतमाक्रामन्ग्रामाऽऽकरनगरमण्डितां वसुधाम् । गुटिकाकृतवामनाङ्गः सम्प्राप्तो नगरीमुज्जैनीम् ॥ २९ ॥
तत्र दूरोदरदयितो नित्यं कलगीतदत्तमतिप्रसरः । अज्ञातकुल-पराक्रमपरमार्थो निवसति सुखेन ॥ ३० ॥
अथान्यदा च दृष्टः किन्नरकलगीतव्यापृतस्तत्र । निजभवनमत्तवारणपरिविलसद्देवदत्तया ॥ ३१ ॥
गीतानुरागरक्ता वामनके तस्मिन्प्रेषयति दासीम् । सानुनयं सप्रणयं सस्नेहं साऽपि तं भणति ॥ ३२ ॥
वामनक ! तव दर्शनमुत्सुका स्वामिनी समादिशति । मम किन्नर ! मनोहरणो भव त्वं गृहप्रवेशेन ॥ ३३ ॥
ततो भणति मूलदेवः का सा तव स्वामिनी ? ततो भणति । सौभाग्यजयपताका पण्यांगना देवदत्तेति ॥ ३४ ॥
अथ भणति मूलदेवो विश्वासो मम नास्ति वेश्यासु । क्षणरक्त-विरक्तासु अपरा-परहृतचितासु ॥ ३५ ॥
इतरास्वपि युवतिषु न विश्वसितव्यमत्र कुटिलासु । विषमविषसन्निभासु किं पुनर्वेश्यासु विश्वासः ? ॥ ३६ ॥
अन्योन्यस्नेहनिर्भररसानुविद्धो न यत्र सद्भावः । रुपापहृतदेहो न वामनस्तत्रालिनाति ॥ ३७ ॥
यावदेवं नाऽऽगच्छति तावत्कथयति स्वामिन्याः सा गत्वा । सापि पुनरपि भणयति दासीवचनेन वचनमिदम् ॥३८॥
आगच्छैकवारमुपरोधेनापि मम गृहे । दाक्षिण्यनीरनिधयो भवन्ति येनात्र सत्पुरुषाः ॥ ३९ ॥

**तो अणुमन्नियगमणो जा जाइ खणंतरं तमणुलग्गो । ता मुट्ठिपहारेणं झड त्ति पउणीकया खुज्जा ॥४०॥**

**विन्नाण-वयणपगरिस-किन्नरकलगीयं[1]-गुणविसेसं च । कलिऊण तस्स गणिया अहिययरं रंजिया हियए ॥४१॥**

**ताहे वामणगो वि हु पेच्छइ सव्वंगसुंदरावयवं । सो देवदत्तगणियं रइगुणमाणिक्कभंडारं ॥४२॥**

**तथा हि-**

**सिंगारजलहिलहरी सयलजुवाणेक्कमणवसीकरणं । जयविजयवेजयंती जयेक्ककामस्स कामस्स ॥४३॥**

**सयलजणनयणअंजणअमियसलाया विलासरइभवणं । विहिविन्नाणपगरिसो मुत्तिमई मोहवल्लि व्व ॥४४॥**

**एवं संपेच्छंतो संपत्तो तीए वासभवणम्मि । कयसमुचियोवयारो उवविट्ठो तीए पासम्मि ॥४५॥**

**तो कुसलवत्तपुव्वं आउच्छइ सव्वमेव वुत्तंतं । सो वि समयाणुरूवं पयासए किं पि तप्पुरओ ॥४६॥**

**एत्थंतरम्मि सा वि हु तप्पच्चक्खं पयासइ पहिट्ठा । नियगीयपरमपगरिसमणुरंजियनिययपरिवारा ॥४७॥**

**अह जंपइ वामणओ परियणकयचाडुरंजियं गणियं । अप्पुव्वगेयपगरिसपरिस्समो तुह परं किंतु ॥४८॥**

**वालाणुविद्ध तंती वंसो सुद्धो न तुम्ह वीणाए । विउसाण वन्नणिज्जो सद्दो न हु तेण रमणीओ ॥४९॥**

**तव्वयणजायकोऊहलेण सम्मं निरूवए जाव । ता तंतीए पेच्छइ वालं वंसे य पाहाणं ॥५०॥**

**तग्गुणरंजियचित्ता पणंगणा भणइ देवदत्ता सा । वामणय ! मणो मह गयलालसं कुणसु सकयत्थं ॥५१॥**

---

ततोऽनुमतगमनो यावद्याति क्षणान्तरं तामनुलग्नः । तावन्मुष्टिप्रहारेण शीघ्रं प्रगुणीकृता कुब्जा ॥ ४० ॥

विज्ञान-वचनप्रकर्ष-किन्नरकलगीत-गुणविशेषं च । कलयित्वा तस्य गणिकाधिकतरं रञ्जिता हृदि ॥ ४१ ॥

तदा वामनोऽपि खलु पश्यति सर्वाङ्गसुन्दरावयवाम् । स देवदत्तागणिकां रतिगुणमाणिक्यभण्डागारम् ॥ ४२ ॥

तथा हि -

श्रृङ्गारजलधिलहरी सकलयुवानैकमनोवशीकरणम् । जयविजयवैजयन्तीजयैककामस्य कामस्य ॥ ४३ ॥

सकलजननयनाञ्जनामृतशलाका विलासरतिभवनम् । विधिविज्ञानप्रकर्षो मूर्तिमती मोहवल्लीव ॥ ४४ ॥

एवं सम्पश्यन्सम्प्राप्ततस्या वासभुवने । कृतसमुचितोपचार उपविष्टस्तस्याः पार्श्वे ॥ ४५ ॥

ततः कुशलवार्तापूर्वमापृच्छति सर्वमेव वृत्तान्तम् । सोऽपि समयानुरुपं प्रकाशते किमपि तत्पुरतः ॥ ४६ ॥

अत्रान्तरे सापि खलु तत्प्रत्यक्षं प्रकाशते प्रहृष्टा । निजगीतपरमप्रकर्षमनुरञ्जितनिजकपरिवारा ॥ ४७ ॥

अथ जल्पति वामनकः परिजनकृतचाटुरञ्जितां गणिकाम् । अपूर्वगेयप्रकर्षपरिश्रमस्तव परं किन्तु ॥ ४८ ॥

वालानुविद्धा तन्त्री वंशः शुद्धो न तव वीणायाः । विदुषाणां वर्णनीयः शब्दो न खलु तेन रमणीयः ॥ ४९ ॥

तद्वचनजातकौतूहलेन सम्यक् पश्यति यावत् । तावत्तन्त्र्यां पश्यति वालं वंशे च पाषाणम् ॥ ५० ॥

तद्गुणरञ्जितचित्ता पणाङ्गणा भणति देवदत्ता सा । वामनक ! मनो मम गीतलालसं कुरु सकृतार्थम् ॥ ५१ ॥

---

१. व्यमुणिविसेसं रं० ।

**उद्दामरणंगणवीरपुरिसचरियाणुसारिचरिएण । सर-गामविहियमुच्छेण तेण आसारिया वीणा ॥५२॥**

**तो कुमरगीयसंजायपरवसा हरियमाणसा सहसा । तड्डुवियकन्नजुयला करिणी परिहरिय करकवलं ॥५३॥**

**संजायविम्हया सा चिंतइ हिययम्मि अत्तणो गणिया । एवंविहगुणकलिओ सामन्नो होइ न हु एस ॥५४॥**

**ता कारणेण केणइ होयव्वमवस्स एत्थ रूवम्मि । इय चिंतिऊण हियए वामणओ तीए भोयविओ ॥५५॥**

**तो भोयणावसाणे एगंते नेहनिब्भरं भणिओ । कहसु नियकुल-परक्कमपरमत्थं मज्झ एत्ताहे ॥५६॥**

**तो तेण नेहरंजियमणेण सव्वं पयासियं तीए । उग्गलियगुडियभावा संजायसहावरूवेण ॥५७॥**

**सब्भावरूयरंजियमणाए तो तीए देवदत्ताए । तरुणियणजणियकामो कामो व्व रईए सो दिट्ठो ॥५८॥**

**पभमइ य नेहसारं सा रंजियमाणसा विणयनियरा । सह रयणाहरणेहिं जीयं पि हु मह तुहाऽऽयत्तं ॥५९॥**

**अवहरियपरोप्परमाणसाण अन्नोन्ननेहसाराण । जा जाइ कोइ कालो परिवज्जिअवरकज्जाण ॥६०॥**

**तो तीए अइपसंगं नाऊण कुट्टणी[१] भणइ इवं । परिहरसु पुत्ति ! एयं धणहीणं नाणदुवियड्ढं ॥६१॥**

**जेण-**

**पाएण इयररमणी वि रच्चए उत्तमे वि न दरिद्दे । वेसाण पुण विसेसो नियदेहविढत्तदविणाण ॥६२॥**

**तथा च-**

**कयकूडकवडचाडुयरइकलिया कोढियं पि कामेइ । परिहरइ रइविरत्ता धणहीणं कामएवं पि ॥६३॥**

---

उद्दामरणाङ्गणवीरपुरुषचरितानुसारिचरितेन । स्वरग्रामविहितमूर्च्छेन तेनासारिता वीणा ॥ ५२ ॥

ततः कुमरगीतसञ्जातपरवशा हृतमानसा सहसा । ताडितकर्णयुगला करिणी परिहृत करकवलम् ॥ ५३ ॥

सञ्जातविस्मया सा चिन्तयति हृदये आत्मनो गणिका । एवंविधगुणकलितः सामान्य भवति न खल्वेषः ॥ ५४ ॥

ततः कारणेन केनचिद्भवितव्यमवश्यमत्र रुपे । इति चिन्तयित्वा हृदये वामनकस्तया भोजितः ॥ ५५ ॥

ततो भोजनावसाने एकान्ते स्नेहनिर्भरं भणितः । कथय निजकुलपराक्रमपरमार्थं ममेदानीम् ॥ ५६ ॥

तदा तेन स्नेहरञ्जितमनसा सर्वं प्रकाशितं तस्याः । उद्गालितगुटिकाभावात्सञ्जातस्वभावरुपेण ॥ ५७ ॥

स्वभावरुपरञ्जितमनसा ततस्तया देवदत्तया । तरुणिजनजनितकामः काम इव रत्या स दृष्टः ॥ ५८ ॥

प्रभणति च स्नेहसारं सा रञ्जितमानसा विनयनिकरा । सह रत्नाभरणै र्जीवितंमपि खलु मम तवाऽऽयत्तम् ॥ ५९ ॥

अपहृतपरस्परमानसयोरन्योन्यस्नेहसारयोः । यावद्याति कोऽपि कालः परिवर्जितापरकार्ययोः ॥ ६० ॥

ततस्तस्या अतिप्रसङ्गं ज्ञात्वा कुट्टिनी भणत्येवम् । परिहर पुत्रि ! एनं धनहीनं ज्ञानदुर्विग्धम् ॥ ६१ ॥

येन -

प्रायेणेतररमण्यपि रचयत्युतमेऽपि न दरिद्रे । वेश्यानां पुनर्विशेषो निजदेहार्जितद्रविणानाम् ॥ ६२ ॥

कृत कूटकपटचाटूकरतिकलिता कुष्टिनमपि कामयति । परिहरति रतिविरक्ता धनहीनं कामदेवमपि ॥ ६३ ॥

---

१. कुट्टिणी-रं० ।

**वीणा-विणोय-विन्नाणपगरिसुप्पन्नकित्तिरमणीयं । जइ वि हु एयं तह विं हु धणहीणं पुत्ति ! परिहरसु ॥६४॥**
**तो भणइ देवदत्ता बहुवेणिपरंपरागया एसा । किं अम्मो ! किज्जिस्सइ रिद्धीकारट्टए तुज्झ ? ॥६५॥**
**एत्तो य तत्थ निवसइ [१]सुरवइअयलो व्व अयलवरसेट्ठी । सइभद्दसालकलिओ वररयणो कणयकडओ य ॥६६॥**
**सो अन्नया य गणियं वसंतमासम्मि विविहकीलाहिं । उज्जाणे कीलंतिं पेच्छइ सह मूलदेवेण ॥६७॥**
**तो चिंतइ सो हियए कह होही संगमो मह इमाए ? । अहवा दव्वुवयारो पणंगणाणं वसीकरणं ॥६८॥**
**इय चिंतिउं पयट्टो तीए उवयरिउमत्थजाएण । उवरोहकयसिणेहा सा वि हु अभिरमइ तं अयलं ॥६९॥**
**एवं च जंति दियहा सद्धिं अयलेण देवदत्ताए । परमच्चंतसिणेहा सया वि सा मूलदेवम्मि ॥७०॥**
**अह सा पुणरवि भणिया अक्काए निद्धणेण किह वच्छे । ससएण व खोडेणं अणेण वणवाडओ रुद्धो ? ॥७१॥**
**तो भणइ देवदत्ता गुणेहिं रत्ता धणम्मि न हु अंब ! । अंबा वि भणइ वच्छे ! अयलो वि हु गुणगमावासो ॥७२॥**
**तो भणइ देवदत्ता जइ एवं अंब ! किज्जउ परिक्खा । इय भणिए नियदासिं चवलं अयलम्मि पेसेइ ॥७३॥**
**भणइ तओ सा गंतुं पुरओ सेट्ठिस्स वयणमिणमेवं । जह तुज्झ वल्लहाए इक्खूहिं पओयणं अज्ज ॥७४॥**
**तो अयलो इक्खूणं सगडं भरिऊण पेसए तीए । तो भणइ देवदत्ता पेच्छाहं अम्ब ! किं करिणी ? ॥७५॥**
**जेण सडाल-समूलयइक्खूणं सगडयं भरेऊणं । मह पेसिय-न्ति विन्नाणपगरिसं पेच्छ अयलस्स ॥७६॥**
**संपइ पुण विन्नाणं [२]अम्ब ! निरिक्खेसु मूलदेवस्स । इय भणिउं तं दासिं संपेसइ मूलदेवम्मि ॥७७॥**

---

वीणा-विनोद-विज्ञानप्रकर्षोत्पन्नकीर्तिरमणीयम् । यद्यपि खलु एनं तथापि खलु धनहीनं पुत्रि ! परिहर ॥ ६४ ॥
ततो भणति देवदत्ता बहुवेणिपरम्परागतेषा । किमम्ब ! करिष्यते ऋद्धिः कारट्टके तव ? ॥ ६५ ॥
इतश्च तत्र निवसति सुरपत्यचल इवाचलवरश्रेष्ठी । सदाभद्रशालकलितो वररत्नः कनककटकश्च ॥ ६६ ॥
सोऽन्यदा च गणिकां वसन्तमासे विविधक्रीडाभिः । उद्याने क्रीडन्तीं पश्यति सह मूलदेवेन ॥ ६७ ॥
तदा चिन्तयति स हृदि कथं भविष्यति सङ्गमो ममानया ? । अथवा द्रव्योपचारः पण्याङ्गनानां वशीकरणम् ॥६८॥
इति चिन्तयित्वा प्रवृत्तस्तस्या उपचरितुमर्थजातेन । उपरोधकृतस्नेहा सापि खल्वभिरमते तमचलम् ॥ ६९ ॥
एवं च यान्ति दिवसा सार्द्धमचलेन देवदत्तायाः । परमत्यन्तस्नेहा सदापि सा मूलदेवे ॥ ७० ॥
अथ सा पुनरपि भणिताऽऽक्कया निर्धनेन कथं वत्से ! । शशकेनेव खञ्जेनानेन वनवाटको रुद्धः ? ॥ ७१ ॥
तदा भणति देवदत्ता गुणै रक्ता धने न खल्बम्बा । अम्बापि भणति वत्से ! अचलोऽपि खलु गुणगणावासः ॥७२ ॥
ततो भणति देवदत्ता यद्येवमम्ब ! क्रियते परीक्षा । इति भणिते निजदासीं चपलामचले प्रेषयति ॥ ७३ ॥
भणति ततः सा गत्वा पुरतः श्रेष्ठिनो वचनमिदमेवम् । यथा तव वल्लभाया इक्षुभिः प्रयोजनमद्य ॥ ७४ ॥
ततोऽचल इक्षूणां शकटं भृत्वा प्रेषयति तस्याः । तदा भणति देवदत्ता पश्याहमम्ब ! किं करिणी ? ॥ ७५ ॥
येन सशाख-समूलकेक्षूणां शकटकं भृत्वा । मम प्रेषितमिति विज्ञानप्रकर्षं पश्याचलस्य ॥ ७६ ॥
सम्प्रति पुनर्विज्ञानमम्ब ! निरीक्षस्व मूलदेवस्य । इति भणित्वा तां दासीं संप्रेषयति मूलदेवे ॥ ७७ ॥

---

१. सुरपतिश्चचलः-मेरुः । २. ओज्ज रं० ।

**तो सा साहइ गंतु जूयप्फलयम्मि मूलदेवस्स । जह तुज्झ अज्ज दइया इच्छूवंछं समुव्वहइ ॥७८॥**

**तो तेण वराडगदसदुगेण एगं गहाय वरलट्ठिं । सिग्धमसिधेणुछोल्लियगंडलए काउमचिरेण ॥७९॥**

**अवरवराडगदसदुगसंगहियसरावसंपुडे खिवइ । पक्खिविय चाउजायं सूलासुं पोइउं तत्तो ॥८०॥**

**पट्ठवइ तीए तग्गुणरंजियहियया पजंपए सा वि । जूयार-अयलविन्नाणअंतरं एरिसं अंब ॥८१॥**

**तो कुट्टणी[1] विचिंतइ केण उवाएण मज्झ गेहाओ । नीहरिही ? इय चिंतिय एगंते भणइ तं अयलं ॥८२॥**

**जहेसा अच्चंतं अणुरत्ता मूलदेवजूयारे । वत्थालंकाराइ भरभोगं तीए तं वहसि ॥८३॥**

**ता किं एसो वि तए निक्कासिज्जइ न मज्झ भवणाओ ? अयलो वि भणइ मह दिट्ठिगोयरं कह णु सो होही ? ॥८४॥**

**अक्का वि भणइ एवं नीसंकं तुह भएण न हु एइ । ता कवडगामगमणं करित्तु संझाए पुण एज्ज ॥८५॥**

**जेण तुमं नीसंकं विलसंतं मूलदेवजूयारं । सह देवदत्तगणियाए पेच्छसे मज्झ गेहम्मि ॥८६॥**

**तेण तह च्चिय विहिए रंजियहियया पणंगणा पच्छा । वाहरिय मूलदेवं नीसंकं जाव अभिरमइ ॥८७॥**

**लल्लक्कभिउडिभीसणपाइक्कपमुक्कहक्कदुप्पेच्छो । विज्जुच्छड व्व सहसा ता अयलो तत्थ संपत्तो ॥८८॥**

**तो तीए तयणु तुरियं तूलीए तलम्मि तं खिवेऊणं । अब्भुट्ठिय भणियमिणं किं गमणं तुम्ह न हु जायं ? ॥८९॥**

**अवसउणो त्ति भणंतो उवविट्ठो तम्मि चेव पल्लंके । गोविज्जंतो दिट्ठो जस्संते देवदत्ताए ॥९०॥**

---

ततः सा कथयति गत्वा द्युतफलके मूलदेवस्य । यथा तवाद्य दयितेक्षुवाञ्छां समुद्वहति ॥ ७८ ॥

ततस्तेन वराटकदशद्विकेनेकं गृहीत्वा वरयष्टीम् । शीघ्रमसिधेनुच्छोलितगण्डलकान् कृत्वाचिरेण ॥ ७९ ॥

अपरवराटकदशद्विकसङ्गृहीतशरावसम्पुटे क्षिपति । प्रक्षिप्य चातुजार्तं शूलासु पोत्वा ततः ॥ ८० ॥

प्रस्थापयति तस्यास्तद्गुणरञ्जितहृदया प्रजल्पति सापि । द्युतकाराऽचलविज्ञानान्तरमीदृशमम्ब ! ॥ ८१ ॥

ततः कुट्टिनी विचिन्तयति केनोपायेन मम गृहात् । निसरिष्यति ? इति चिन्तयित्वैकान्ते भणति तमचलम् ॥ ८२ ॥

यथैषात्यन्तमनुरक्ता मूलदेवद्युतकारे । वस्त्रालङ्कारादि भरभोगं तस्यास्त्वं वहसि ॥ ८३ ॥

ततः किमेषोऽपि त्वया निष्काष्यते न मम भवनात् ? । अचलोऽपि भणति मम दृष्टिगोचरं कथं नु स भविष्यति ? ॥८४॥

अक्कापि भणत्येवं निःशङ्कं तव भयेन न खल्वेति । ततः कपटग्रामगमनं कृत्वा सन्ध्यायां पुनरायाः ॥ ८५ ॥

येन त्वं निःशङ्कं विलसन्तं मूलदेवद्युतकारम् । सह देवदत्तागणिकायाः पश्यसि मम गृहे ॥ ८६ ॥

तेन तथा चैव विहिते रञ्जितहृदया पणाङ्गना पश्चात् । व्याहृय मूलदेवं निःशङ्कं यावदभिरमते ॥ ८७ ॥

भयानकभृकूटिभीषणपादातिप्रमुक्तहक्कारदुष्प्रेक्ष्यः । विद्युच्छटेव सहसा तावदचलस्तत्र सम्प्राप्तः ॥ ८८ ॥

ततस्तया तदनुत्वरितं तूल्यास्तले तं क्षिप्त्वा । अभ्युत्थाय भणितमिदं किं गमनं तव न खलु जातम् ? ॥ ८९ ॥

अपशकुन इति भणन्नुपविष्टस्तस्मि चैव पल्यङ्के । गोपायमानो दृष्टो यस्यान्ते देवदत्तया ॥ ९० ॥

---

१. कुट्टिणी-रं० ।

**ण्हाएयव्वं नियमा अज्ज मए एत्थ चेव पल्लंके । सा भणइ पट्टतूलिं निरत्थयं किं विणासेसि ? ।।९१।।**
**सो भणइ तुज्झ पिउणो न विणस्सइ किंतु मज्झ इय भणिए । तप्परियणेण अयलो सिग्धं अब्भंगिओ तत्तो ।।९२।।**
**अइमइलखलिखरंटियपल्हत्थियकलससलिलसंसित्तो । चिंतेइ मूलदेवो धिरत्थु मह जीवियव्वस्स ।।९३।।**
**धन्ना हु जए जइणो जइणो कंदप्पसप्पदप्पस्स । मरणे वि जाण मुसियो न माणमाणिक्कभंडारो ।।९४।।**
**परिहासपरंपरपासपरवसा नेहवागुरायत्ता । हरिण व्व कुसुमसरवाहबाणनिहया न के एत्थ ? ।।९५।।**
**अहव इह परभवम्मि य परिभवतरुकुसुममंजरी महिला । कामुयजणस्स सुइरं निम्मविया हयपयावइणा ।।९६।।**
**इय चिंतिऊण सहसा निग्गच्छइ जाव तूलिहेट्ठाओ । दट्ठोट्ठभिउडिभासुरअयलो केसेसु संगहिय ।।९७।।**
**निब्भच्छिऊण पभणइ कोवपरामुसियकूरकरवालो । किं रे ? कीरउ अवयारकारिणो वइरिणो तुज्झ ?**
**तो भणइ मूलदेवो अदीणचित्तो अभिन्नमुहराओ । जं किं पि तुज्झ चित्तस्स सम्मयं कुणसु तं चेव ।।९९।।**
**चिंतेइ तओ अयलो सामन्नो एस होइ न हु पुरिसो । न हि हीणकुलुप्पन्नाण धीरिमा एरिसा होइ ।।१००।।**
**इय चिंतिऊण पभणइ आवइपडियं ममं पि कइया वि । रक्खिज्जत्ति सतोसं मुक्को सम्माणिउं तत्तो ।।१०१।।**
**कह णु मए वसियव्वं इह परिभवगुरुकलंककलिएण ? । इय चिंतंतो चित्ते चलिओ बिन्नायडाभिमुहं ।।१०२।।**
**संबल-सहायरहिओ सव्वुत्तमबुद्धिसाहससहाओ । लंघंतो लंघंतो गिरि-सरियाइन्नमहिवीढं ।।१०३।।**
**वायामेत्तसहायं पि पेच्छए जाव नेय अडवीए । अइकविलेसकाओ दिट्ठो ता बंभणो एगो ।।१०४।।**

---

स्नातव्यं नियमाद्य मयात्रैव पल्यङ्के । सा भणति पट्टतूलिं निरर्थकं किं विनाशयसि ? ।। ९१ ।।
सभणति तव पितु र्न विनश्यति किन्तु ममेति भणिते । तत्परिजनेनाचलः शीघ्रमभ्यङ्गितस्ततः ।। ९२ ।।
अतिमलखलिखरण्टितपर्यस्तकलशसलिलसंसिक्तः । चिन्तयति मूलदेव धिगस्तु मम जीवितव्यस्य ।। ९३ ।।
धन्याः खलु जगति यतयः कन्दर्पसर्पदर्पस्य । मरणेऽपि येषां मुषितो न मानमाणिक्यभण्डागारः ।। ९४ ।।
परिहासपरम्परापाशपरवशाः स्नेहवागुरायत्ताः । हरिण इव कुसुमसरव्याधबाणनिहता न केऽत्र ? ।। ९५ ।।
अथवेह परभवे च परिभवतरुकुसुममञ्जरि महिला । कामुकजनस्य सुचिरं निर्मापिता हतप्रजापतिना ।। ९६ ।।
इति चिन्तयित्वा सहसा निर्गच्छति यावत्तूलिकाधस्तात् । दष्टौष्टभृकूटिभासुराचलः केशेषु संगृह्य ।। ९७ ।।
निर्भर्त्स्य प्रभणति कोपपरामुषितक्रूरकरवालः । किं रे ? क्रियतामपकारकारिणो वैरिणस्तव ? ।। ९८ ।।
ततो भणति मूलदेवोऽदीनचित्तोऽभिन्नमुखरागः । यत्किमपि तव चित्तस्य सम्मतं कुरु तदेव ।। ९९ ।।
चिन्तयति ततोऽचलः सामान्य एष भवति न खलु पुरुषः । न हि हीनकुलोत्पन्नानां धीरीमेदृशी भवति ।। १०० ।।
इति चिन्तयित्वा प्रभणति आपदि पतितं ममापि कदापि । रक्षिष्येरिति सतोषं मुक्तः सन्मान्य ततः ।। १०१ ।।
कथं नु मया वसितव्यमिह परिभवगुरुकलङ्ककलितेन ? । इति चिन्तयंश्चित्ते चलितो बेन्नातटाभिमुखम् ।। १०२ ।।
सम्बलसहायरहितः सर्वोत्तमबुद्धिसाहससहायः । लङ्घयल्लङ्घयन् गिरि-सरिदाकीर्णमहीपीठम् ।। १०३ ।।
वाचामात्रसहायमपि प्रेक्षते यावन्नैवाटव्याम् । अतिकपिलेशकायोदृष्टस्तावद्ब्राह्मण एकः ।। १०४ ।।

**किवणाण चक्कवट्टी टक्को जाईए सद्धडो नाम । जणकयनिग्घिणसम्माभिहाणओ निग्घिणत्तणओ ॥१०५॥**
**संबलबलमवलंबिय एयस्स अहं सुहेण लंघिस्सं । इय चिंतिय संचलिओ कयसंभासेण सह तेण ॥१०६॥**
**तो पहरदुगे सलिलप्पएसमासज्ज सद्धडो तुरियं । अवलोडिऊण सलिलेण सत्तुए जिमइ एगागी ॥१०७॥**
**अह तेण मूलदेवो वयणेण वि न हु निमंतिओ जाव । चिंतेइ नूणमिण्हि विस्सरियमिमस्स मह सुहिणो ॥१०८॥**
**अवरण्हे उण नियमा न वंचिही एस चिंतए जाव । चित्तम्मि मूलदेवो तो भोच्चा बंभणो पत्तो ॥१०९॥**
**तुंदं परामुसंतो मलमाणो हत्थजुयलमणवरयं । दाढियमवलूहंतो उड्डुग्गारे पमुंचंतो ॥११०॥**
**अह बहलतरुतलम्मि खणमेत्तं ताव विस्समामो त्ति । खरकिरणतावियतणू मज्झत्थो जाव दिवसयरो ॥१११॥**
**पच्छा पुरओ गमणं काहामो इय कुमारभणियम्मि । वीसमिउं खणमेक्कं पुणो पयट्टा पहे गंतुं ॥११२॥**
**एत्थंतरम्मि कुमरं आवइकलियं वियाणिउं रन्नो । मित्तो अत्थनिमित्तं व दूरमवगाहए जलहिं ! ॥११३॥**
**तो सद्दडेण भुत्तं तहेव एगागिणा वियाले वि । न य वायामेत्तेण वि निमंतिओ कढिणहियएण ॥११४॥**
**बीयदियहे वि तह वि हु निमंतिओ तेण न य मणागं पि । तइयम्मि दिणे अडविं अइकंता दो वि ते कह वि ॥११५॥**
**संपत्तवसिमदेसो तस्साऽऽसाधरियनिययपाणधणो । चिंतेइ मूलदेवो उवयारी बंभणो मज्झ ॥११६॥**
**पभणइ वच्च जहिच्छं भद्द ! तुमं किंतु एज्ज कइया वि । मह रज्जसंपयं जाणिऊण जं देमि ते गामं ॥११७॥**
**इय भणिय मूलदेवो पहरदुगे गाममागओ संतो । करकलियपत्तपुडओ भिक्खं भमिउं समाढत्तो ॥११८॥**

---

कृपणानां चक्रवर्ती टक्कोजात्या सद्धडो नाम । जनकृतनिर्घृणशर्माभिधानको निर्घृणत्वात् ॥ १०५ ॥
शम्बलबलमवलम्ब्यैतस्याहं सुखेन लङ्घिष्यामि । इति चिन्तयित्वा सञ्चलितः कृतसम्भाषेण सह तेन ॥ १०६ ॥
ततः प्रहरद्विके सलिलप्रदेशमासाद्य सद्धडस्त्वरितम् । अवमिश्रित्य सलिलेन सक्तुना जेमत्येकाकी ॥ १०७ ॥
अथ तेन मूलदेवो वचनेनापि न खलु निमन्त्रितो यावत् । चिन्त्यति नूनमीदानीं विस्मृतमेतस्य मम मित्रस्य ॥१०८॥
अपराह्णेपुनर्नियमा न वञ्चिष्यत्येष चिन्तयति यावत् । चित्ते मूलदेवस्तदा भुक्त्वा ब्राह्मणः प्राप्तः ॥ १०९ ॥
तुन्दं परामृशन्मलमानो हस्तयुगलमनवरतम् । कुर्चमपमृशन्नुद्दगारान्प्रमुञ्चन् ॥ ११० ॥
अथ बहलतरुतले क्षणमात्रं तावद्विश्राम्याव इति । खरकिरणतापिततनू र्मध्यस्थो यावद्दिवसकरः ॥ १११ ॥
पश्चात्पुरतो गमनं करिष्याव इति कुमारभणिते । विश्रम्य क्षणमेकं पुनःप्रवृत्तौ पथि गन्तुम् ॥ ११२ ॥
अत्रान्तरे कुमारमापत्कलितं विज्ञाय राज्ञः । मित्रोऽर्थनिमित्तं च दूरमवगाहते जलधिम् ॥ ११३ ॥
तदा सद्धडेन भुक्तं तथैवैकाकिना विकालेऽपि । न च वाचामात्रेणापि निमन्त्रितः कठिनहृदयेन ॥ ११४ ॥
द्वितीयदिवसेऽपि तथापि खलु निमन्त्रितस्तेन न च मनागपि । तृतीये दिनेऽटवीमतिक्रान्तौ द्वावपि तौ कथमपि ॥११५ ॥
सम्प्राप्तवसतिदेशस्तस्याशाधृतनिजकप्राणधनः । चिन्तयति मूलदेव उपकारी ब्राह्मणो मम ॥ ११६ ॥
प्रभणति गच्छ यथेच्छं भद्र ! त्वं किन्त्वायाः कदापि । मम राज्यसंपज्ज्ञात्वा यद् ददामि तुभ्यं ग्रामम् ॥ ११७ ॥
इति भणित्वा मूलदेवः प्रहरद्विके ग्राममागतः सन् । करकलितपत्रपुटको भिक्षां भ्रान्तुं समारब्धः ॥ ११८ ॥

---

१. मित्र – सूर्य इत्यर्थः ।

**केवलकुम्मासेहिं भरित्तु पुडयं तडागमणुसरिउं । जा निग्गच्छइ तत्तो संपेच्छइ मुणिवरं एगं ॥११९॥**
**मासोववाससोसियसरीरसंपत्तिमसमसुहलेसं । पारणगपत्तदिवसं पविसंतं गाममज्झम्मि ॥१२०॥**
**दट्ठुण मूलदेवो चिंतइ मह पुन्नपरिणई एसा । मरुरन्नम्मि व एसो जं दिट्ठो कप्परुक्खो व्व ॥१२१॥**
**इय चिंतिऊण पभणइ भत्तिभरुल्लसियबहलरोमंचो । गिण्हसु करुणं काउं कुम्मासे मज्झ मुणिनाह ! ॥१२२॥**
**दव्वाइचउहसुद्धिं पउंजिउं गिण्हए मुणिवरो वि । एत्थंतरम्मि कुमरो रंजियहियओ भणइ एवं ॥१२३॥**
**धन्नाणं खु नराणं कुम्मासा हुंति साहुपारणए । इय भणिए भणइ तओ मुणिभत्ता देवया गयणे ॥१२४॥**
**मग्गसु वरं महायस ! जं रोयइ तुज्झ उत्तरद्धेण । गणियं च देवदत्तं दंतिसहस्सं च रज्जं च ॥१२५॥**
**इय भणइ जाव कुमरो भणइ तओ देवया पहिट्ठमणा । मुणिदाणपुन्नपायवफलमिणमचिरेण तुह होही ॥१२६॥**
**उव्वरियसेसकुम्मासभोयणाणंतरं पसत्थगई । मुणिदाणपुन्नकलिओ चलिओ विन्नायडाभिमुहं ॥१२७॥**
**पइदियहपयाणेहि वेन्नायडनयरमागओ संतो । सुत्तो देसिकुडीए सुमिणं पेच्छइ निसासेसे ॥१२८॥**
**अमयमयकिरणनिम्महियतावमसमाणकंति जणसुहयं । पविसंतं नियवयणं केरविणीरमणपडिविंवं ॥१२९॥**
**कप्पडिओ वि हु पासित्तु तारिसं कहइ सुमिणमियराण । ते वि हु भणंति गुड-नेहमंडियं मंडयं लहसि ॥१३०॥**
**तो तेण वीयदिवसे छाइज्जंतम्मि कम्मिवि घरम्मि । भिक्खाए पविट्ठेणं लद्धो गुडमंडओ एगो ॥१३१॥**
**कुमरो वि मणे मुणिउं मणोरहाणं अपावणिज्जं ति । सुमिणमिणं मणहरणं पहाणपुरिसाण कहणीयं ॥१३२॥**

---

केवलकुल्माषै भृत्वा पुटकं तडाकमनुसृत्य । यावन्निर्गच्छति ततः सम्प्रेक्षते मुनिवरमेकम् ॥ ११९ ॥
मासोपवासशोषितशरीरसंपत्तिमसमसुखलेशम् । पारणकप्राप्तदिवसं प्रविशन्तं ग्राममध्ये ॥ १२० ॥
दृष्ट्वा मूलदेवश्चिन्तयति मम पुण्यपरिणतिरेषा । मरुरण्ये इवैष यद् दृष्टः कल्पवृक्ष इव ॥ १२१ ॥
इति चिन्तयित्वा प्रभणति भक्तिभरोल्लसितबहलरोमाञ्चः । गृहाण करुणां कृत्वा कुल्माषान् मम मुनिनाथ ! ॥१२२॥
द्रव्यादिचतुर्धाशुद्धिं प्रयुज्य गृह्णाति मुनिवरोऽपि । अत्रान्तरे कुमारो रञ्जितहृदयो भणत्येवम् ॥ १२३ ॥
धन्यानां खलु नराणां कुल्माषा भवन्ति साधुपारणके । इति भणिते भणति ततो मुनिभक्ता देवतागगने ॥ १२४ ॥
मार्गय वरं महायश ! यद्रोचते ततोत्तरार्द्धेन । गणिकां च देवदत्तां दन्तिसहस्रं च राज्यं च ॥ १२५ ॥
इति भणति यावत्कुमारो भणति ततो देवता प्रहृष्टमना । मुनिदानपुण्यपादपफलमिदमचिरेण तव भविष्यति ॥१२६ ॥
उद्धृताशेष कुल्माषभोजनानन्तरं प्रशस्तगतिः । मुनिदानपुण्यकलितश्चलितो बेन्नातटाभिमुखम् ॥ १२७ ॥
प्रतिदिवसप्रयाणै र्बेन्नातटनगरमागतस्सन् । सुप्तो देशीकुट्यां स्वप्नं पश्यति निशाशेषे ॥ १२८ ॥
अमृतमयकिरणनिर्मथिततापमसमानकान्ति जनसुभगम् । प्रविशन्तं निजवदने कैरविणिरमणप्रतिबिम्बम् ॥ १२९ ॥
कार्पटिकोऽपि खलु दृष्ट्वा तादृशं कथयति स्वप्नमितराणाम् । तेऽपि खलु भणन्ति गुडस्नेहमण्डितं मण्डकं लभसे ॥१३०॥
ततस्तेन द्वितीयदिवसे छाद्यमाणे कस्मिन्नपि गृहे । भिक्षायां प्रविष्टेन लब्धो गुडमण्डक एकः ॥ १३१ ॥
कुमारोऽपि मनसि मुणित्वा मनोहराणामप्रापनीयमिति । स्वप्नमिदं मनोहरणं प्रधानपुरुषाणां कथनीयम् ॥ १३२ ॥

अह उग्गयम्मि सूरे कुमरो कुसुमाणमंजलिं भरिउं । सुविणन्नुयस्स पासे संपत्तो परमविणएण ॥१३३॥

पूइत्तु पायकमलं पणामपुव्वं पयासए सुमिणं । अह चिंतइ सुविणविऊ रज्जफलो एस सुमिणो त्ति ॥१३४॥

लायन्नपुन्नकलियं अह तं परिणाविऊण नियधूयं । साहइ जह तुह होही सत्तदिणब्भंतरे रज्जं ॥१३५॥

एयं निसामिऊणं थक्को सो तम्मि चेव नयरम्मि । कोउगअक्खित्तमणो दिणे दियन्तो नयरसोहं ॥१३६॥

कहमेत्थ निद्धणो हं विलसिस्सं चिंतिऊण नयरीए । ईसरगिहम्मि खत्तं खणिऊणं गहियगिहसारो ॥१३७॥

जा निगच्छइ तत्तो पत्तो आरक्खिएहिं सहस त्ति । तो बंधिऊण नीओ करणे मंतिस्स पासम्मि ॥१३८॥

चोरो त्ति काउमेसो भणियममच्चेण देहचायस्स । ता निंति वज्झभूमीए किंकरा लद्धआएसा ॥१३९॥

पुव्वुत्तमलियमेयं किं होही जाव चिंतए कुमरो । ता दुग्गसूलवेयणविवसो तन्नयरनरनाहो ॥१४०॥

मरइ अपुत्तो तो मंतिपमुहसामंत-पउरलोएण । अहिवासिऊण सम्मं गयपभिई पंचदिव्वाइं ॥१४१॥

मग्गिज्जइ नररयणं पुव्वभवुप्पन्नपुन्नपब्भारं । रज्जनिमित्तं नयरे तिय-चच्चर-देउलाईसु ॥१४२॥

तो जंताइं ताइं दिव्वाइं नयरबाहिरुद्देसे । पेच्छंति खरारूढं रत्तंदणलित्तसव्वंगं ॥१४३॥

सिरिउवरिधरियछित्तिरमारोवियगलसरावमालं च । वज्जंतवज्झडिंडिममुग्घोसिज्जंतचोरवहं ॥१४४॥

तं मूलदेवचोरं गलगज्जी ता गएण पारद्धा । गुरुहरिसपरवसेणं हएण हेसारवो विहिओ ॥१४५॥

---

अथोद्गते सूर्ये कुमारः कुसुमानामञ्जलिं भृत्वा । स्वप्नज्ञस्य पार्श्वे संप्राप्तः परमविनयेन ॥ १३३ ॥

पूजयित्वा पादकमलं प्रणामपूर्वं प्रकाशते स्वप्नम् । अथ चिन्तयति स्वप्नविद् राज्यफल एष स्वप्न इति ॥ १३४ ॥

लावण्यपुण्यकलितामहं तां परिणाय्य निजदुहितरम् । कथयति यथा तव भविष्यति सप्तदिनाभ्यन्तरे राज्यम् ॥१३५॥

एतन्निशम्य स्थितःस तस्मिंश्चैव नगरे । कौतुकाक्षिप्तमना दिने पश्यन्नगरशोभाम् ॥ १३६ ॥

कथमत्र निर्धनोऽहं विलसिष्यामि चिन्तयित्वा नगर्याः । ईश्वरगृहे क्षात्रं खनित्वा गृहीतगृहसारः ॥ १३७ ॥

यावन्निर्गच्छति ततः प्राप्त आरक्षकैः सहसेति । ततो बद्ध्वानीतः करणे[१] मन्त्रिणः पार्श्वे ॥ १३८ ॥

चौर इति कृत्वैष भणितममात्येन देहत्यागस्य । तत नयन्ति वध्यभूमौ किङ्करा लब्धादेशाः ॥ १३९ ॥

पूर्वोक्तमलिकमेतत्किं भविष्यति यावच्चिन्तयति कुमारः । तावदग्रशूलवेदनाविवशस्तन्नगरनरनाथः ॥ १४० ॥

म्रियतेऽपुत्रस्ततो मन्त्रिप्रमुखसामन्त-पौरलोकेन । अधिवास्य सम्यग्गजप्रभृतिनि पञ्चदिव्यानि ॥ १४१ ॥

मार्ग्यते नररत्नं पूर्वभवोत्पन्नपुण्यप्राग्भारम् । राज्यनिमित्तं नगरे त्रिक-चत्वर-देवकुलादिषु ॥ १४२ ॥

तदा यान्ती तानि दिव्यानि नगरबाह्योद्देशे । पश्यन्ति खरारूढं रक्तचन्दनलिप्तसर्वाङ्गम् ॥ १४३ ॥

शिरोपरिधृतसूर्पकमारोपितगलशरावमालं च । वाद्यद्वध्यडिंडिममुद्घोष्यमाणचौरवधम् ॥ १४४ ॥

तं मूलदेवचौरं गलगर्जी तावद्गजेन प्रारब्धा । गुरुहर्षपरवशेन हयेन हेषारवो विहितः ॥ १४५ ॥

---

१. न्यायालय इत्यर्थः ।

**कलसं घेत्तूण करी अहिसिंचिय नेइ खंधदेसम्मि । ढलियं चामरजुयलं उवरि ठियं सेयवरछत्तं ॥१४६॥**

**उच्छलिओ तूररवो जयजयसद्दो पवड्डिओ झत्ति । उद्दामबंदिविंदेण परिगओ पउरलोएण ॥१४७॥**

**रायसहाए पत्तो मुत्तामणिमंडिए चउक्कम्मि । सिंहासणे निविट्ठो पणओ सामंत-मंतीहिं ॥१४८॥**

**अह देवयाए गयणे भणिया सामंत-मंतिणो सव्वे । जह एस पुन्नकलिओ विक्कमराओ महाराओ ॥१४९॥**

**जो आणाए वट्टइ न सम्ममेयस्स तस्स न खामामि । तप्पभिइ अमच्चाई संजाया आणतल्लिच्छा ॥१५०॥**

**जाओ महानरिंदो पडुपयडपयावपत्तमाहप्पो । निट्ठवियवइरिविंदो जहत्थमणुपालए रज्जं ॥१५१॥**

**अह अन्नया कयाई राया चित्तम्मि चिंतए एवं । सह दंतिसहस्सेणं लद्धं रज्जं जहुद्दिट्ठं ॥१५२॥**

**किन्तु-**

**किमणेण देवदत्तारहिएणं सुंदरेण रज्जेण ? । जेण पियसंपओगो रज्जं कज्जं किमन्नेण ? ॥१५३॥**

**तो पट्ठविओ लेहो उज्जेणिनराहिवस्स नरवइणा । भणिओ य मज्झ नेहो एईए देवदत्ताए ॥१५४॥**

**जइ पडिहासइ तीए तुम्हाणं सव्वहा अभिमयं च । मह जीयनिव्विसेसं ता पेससु तं सिणेहेण ॥१५५॥**

**इय वाइऊण लेहं रन्ना लेहारिया इमं भणिया । भो भो ! किमेवमेयं विन्नायडसामिणा लिहियं ? ॥१५६॥**

**किं अम्हाणं तस्स य कोइ विसेसो समत्थि रज्जम्मि ? । जेणाहं नियरज्जं सव्वमिणं तस्स कप्पेमि ॥१५७॥**

**हक्कारिऊण भणिया गणिया रन्ना जहा तए भद्दे ! । विन्नत्तमासि पुव्वं जह मोत्तुं मूलदेवं मे ॥१५८॥**

---

कलशं गृहीत्वा कर्यभिषिञ्च्य नयति स्कन्धदेशे । वीजितं चामरयुगलमुपरि स्थितं श्वेतवरच्छत्रम् ॥ १४६ ॥

उच्छलितस्तूर्यरवो जयजयशब्दः प्रवर्धितः झटितिम् । उद्दामबन्दिवृन्देन परिगतः पौरलोकेन ॥ १४७ ॥

राजसभायां प्राप्तो मुक्तामणिमण्डिते चतुष्के । सिंहासने निविष्टः प्रणतः सामन्त-मन्त्रिभिः ॥ १४८ ॥

अथ देवतया गगने भणिताः सामन्त-मन्त्रिणः सर्वे । यथैष पुण्यकलितो विक्रमराजो महाराजः ॥ १४९ ॥

य आज्ञायां वर्तते न सम्यगेतस्य तस्य न क्षमे । तत्प्रभृति अमात्यादयः सञ्जाता आज्ञातत्पराः ॥ १५० ॥

जातो महानरेन्द्रः पटुप्रकटप्रतापप्राप्तमाहात्म्यः । निष्ठापितवैरिवृन्दो यथार्थमनुपालयति राज्यम् ॥ १५१ ॥

अथान्यदा कदाचिद्राजा चिते चिन्तयत्येवम् । सह दन्तिसहस्रेण लब्धं राज्यं यथोदिष्टम् ॥ १५२ ॥

किन्तु -

किमनेन देवदत्तारहितेन सुन्दरेण राज्येन ? । येन प्रियसम्प्रयोगो राज्यं कार्यं किमन्येन ? ॥ १५३ ॥

ततः प्रस्थापितो लेख उज्जैनीनराधिपस्य नरपतिना । भणितश्च मम स्नेहोऽस्यां देवदत्तायाम् ॥ १५४ ॥

यदि प्रतिभाषते तस्या युष्माकं सर्वथाभिमतं च । मम जीवनिर्विशेषं ततः प्रेषय तां स्नेहेन ॥ १५५ ॥

इति वाचित्वा लेखं राज्ञा लेखार्या इदं भणिताः । भो भो ! किमेवमेतद्विन्नातटस्वामिना लिखितम् ? ॥ १५६ ॥

किमस्माकं तस्य च कोऽपि विशेषः समस्ति राज्ये ? । येनाहं निजराज्यं सर्वमिदं तस्य कल्पामि ॥ १५७ ॥

आकार्य भणिता गणिका राज्ञा यथा त्वया भद्रे ! । विज्ञप्तमासीत् पूर्वं यथा मुक्त्वा मूलदेवं मे ॥ १५८ ॥

अन्नो न पेसियव्वो पुरिसो ता एस सो महाराया । संजाओ पुव्वज्जियपुन्नमहापरिणइवसेण ॥१५९॥
तो तुज्झाऽऽणयणत्थं नियपुरिसा पेसिया इहं तेण । ता जाहि तस्स पासे पडिहासइ तुज्झ जइ चित्ते ॥१६०॥
तो भणइ देवदत्ता देव ! सया वि हु मणोरहो आसि । संपुण्णो पुण इण्हि तुम्हाणुन्नाए अम्हाणं ॥१६१॥
विभवेण पूइऊणं पट्ठविया मूलदेवपासम्मि । पत्ता य तत्थ तेण वि पवेसिया गुरुविभूईए ॥१६२॥
तीए सह विसयसोक्खं उवभुंजंतस्स जाइ जा कालो । ता सद्धडभट्टेणं निसुया रज्जस्स संपत्ती ॥१६३॥
तत्थाऽऽगओ पविट्ठो पडिहारनिवेइओ निवसमीवे । दिन्नो गामो रन्ना वि तस्स भणिउं इमं वयणं ॥१६४॥
पलिज्जसु नियगामं अज्जप्पभिइं परं तुमं किंतु । मह नयणगोयरे मा हवेज्ज कइया वि जाजीवं ॥१६५॥
अह अन्नया य अयलो उज्जेणीए धणज्जणनिमित्तं । बिन्नायडम्मि नयरे पत्तो बहुलोगपरियरिओ ॥१६६॥
मंजिट्ठाइकयाणगमज्झे गोवित्तु परमवत्थूणि । मंजिट्ठाईण पुणो सुकं पाडेउमारद्धो ॥१६७॥
नाओ सुंकियलोएण कह वि तो दंसिओ नरवइस्स । जह देव ! सुंकचोरीए वाणिओ सावराहु त्ति ॥१६८॥
राया वि संभमब्भंतलोयणो जा पलोयए सम्मं । कह अयलसत्थवाहो ? अव्वो ! अच्छरियमेयं ति ॥१६९॥
तो भणियं नरवइण परियाणसि को अहं ? भणइ अयलो । नियकित्तिभरियभुवणं देव ! तुमं को न याणेइ ॥१७०॥
तो नरवइणा साहियनियवुत्तंतो विसज्जिओ अयलो । सम्माणदाणपरिओसपुव्वयं सुंकपरिमुक्को ॥१७१॥
अह मूलदेवराया नएण परिपालिऊण नियरज्जं । सावगधम्मं च तहा मरिउं देवेसु उववन्नो ॥१७२॥

॥ मूलदेवाख्यानकं समात्तम् ॥११॥

---

अन्यो न प्रेषितव्यः पुरुषस्तावदेष स महाराजा । सञ्जातः पूर्वार्जितपुण्यमहापरिणतिवशेन ॥ १५९ ॥
ततस्तवानयनार्थं निजपुरुषाः प्रेषिता इह तेन । ततो याहि तस्य पार्श्वे प्रतिभाषते तव यदि चित्ते ॥ १६० ॥
ततो भणति देवदत्ता देव ! सदापि खलु मनोरथ आसीत् । सम्पूर्णः पुनरीदानीं तवानुज्ञयास्माकम् ॥ १६१ ॥
विभवेन पूजयित्वा प्रस्थापिता मूलदेवपार्श्वे । प्राप्ता च तत्र तेनापि प्रवेशिता गुरुविभूत्या ॥ १६२ ॥
तस्याः सह विषयसौख्यमुपभुञ्जतो याति यावत्कालः । तावत्सद्धडभटेन निश्रुता राज्यस्य संप्राप्तिः ॥ १६३ ॥
तत्राऽऽगतः प्रविष्टः प्रतिहारनिवेदितो नृप समीपे । दत्तो ग्रामो राज्ञापि तस्य भणित्वेदं वचनम् ॥ १६४ ॥
पालय निजग्राममद्यप्रभृति परं त्वं किन्तु । मम नयनगोचरे मा भवेः कदापि यावज्जीवम् ॥ १६५ ॥
अथान्यदा चाचल उज्जैन्यां धनार्जननिमित्तम् । बेन्नातटे नगरे प्राप्तो बहुलोकपरिकरितः ॥ १६६ ॥
मञ्जिष्ठादिक्रयाणकमध्ये गोपयित्वा परमवस्तूनि । मञ्जिष्ठादीनां पुनः शुल्कं पातितुमारब्धः ॥ १६७ ॥
ज्ञातः शुल्कितलोकेन कथमपि ततो दर्शितो नरपतेः । यथा देव ! शुल्कचौर्याद् वणिक् सापराध इति ॥ १६८ ॥
राजापि सम्भ्रमभ्रान्तलोचनो यावत्प्रलोकयति सम्यक् । कथमचलसार्थवाहो ? अहो ! आश्चर्यमेतदिति ॥ १६९ ॥
ततो भणितं नरपतिना परिजानासि कोऽहम् ? भणत्यचलः । निजकीर्तिभृतभुवनं देव ! त्वां को न जानाति ॥ १७० ॥
तदा नरपतिना कथितनिजवृत्तान्तो विसर्जितोऽचलः । सन्मानदानपरितोषपूर्वकं शुल्कपरिमुक्तः ॥ १७१ ॥
अथ मूलदेवराजा नयेन परिपाल्य निजराज्यम् । श्रावकधर्मं च तथा मृत्वा देवेषूत्पन्नः ॥ १७२ ॥

॥ मूलदेवाख्यानकं समाप्तम् ॥ ११ ॥

इदं च सुपात्रदानं कल्याणावहमप्यशुभपरिणामेनासुन्दरं दत्तं प्रत्युत भवभ्रमणाय भवतीत्यत आह

**जो अमणुन्नं असणाइ देइ साहूण दुट्ठपरिणामो ।**
**सो किर नागसिरी विव दुहपउरे भमइ संसारे ॥ ७ ॥**

व्याख्या-यः कश्चिद् 'अमनोज्ञम्' असुन्दरम् 'अशनादि' ओदनादि 'ददाति' वितरति 'साधुभ्यः' मुनिभ्यः 'दुष्टपरिणामः' अशुभभावः 'सः' जीवः 'किल' इति आप्तोक्तौ 'नागश्रीरिव' ब्राह्मणभार्येव 'दुःखप्रचुरे' प्रभूतदुःखे 'भ्रमति' पर्यटति 'संसारे' भवे इत्यक्षरार्थः ॥ ७ ॥ भावार्थस्त्वाख्यानकगम्यः ॥ तच्चेदम्-

**चंपाए पुरवरीए निवसंति सहोयरा दिया तिन्नि । सुपवित्तो पवरकलो सोमो सोमो व्व ताणेगो ॥१॥**
**सोमो विभूइभासी हरो व्व तह सोमदत्तनामो त्ति । तइओ य सोमभूई गुरुभरणरूई सुसीसो व्व ॥२॥**
**नागसिरी भूयसिरी जक्खसिरी ताण भारिया कमसो । सव्वेसिं पि सुहेणं वच्चइ कालो अहऽन्नादिणे ॥३॥**
**नागसिरीए महुरयतुंबयवामोहओ उवक्खडियं । कडुयविसतुंबयं घय-गुडाइसुसिणिद्धदव्वेहिं ॥४॥**
**नायं च कह वि विसतुंबयं तओ कहमिमं परिचएमि ? । उत्तमदव्वविमीसियमिय चिंतिय मुयइ एगत्थ ॥५॥**
**अह तत्थ सयलसिद्धंतपारगा धम्मधोसमुणिवसभा । निरुवममुणिपरिवारा पत्ता अह तेसिमेगमुणी ॥६॥**
**समहिज्जियसुत्तत्थो परियाणियसयलसुत्तपरमत्थो । जीवाणं करुणारसनिज्झरणगिरिंदसमरूवो ॥७॥**
**आबालकालपालियसामन्नो सीलसंगओ सोमो । पारइ सया वि काउं मासक्खमणं महाभागो ॥८॥**
**अह अट्ठि-मिंजपेम्माणुरायरत्तो जिणिंदधम्मम्मि । धम्मरुई धम्मरुई अणगारो मासपारणए ॥९॥**
**उच्चवयभवणेसुं परिब्भमंतो पसंत-थिरचित्तो । नागसिरीए गेहे गओ तओ तीए सो दिट्ठो ॥१०॥**

---

चम्पायां पुर्वर्यां निवसन्ति सहोदरा द्विजास्त्रयः । सुपवित्रः प्रवरकलः सोमः सोमइव तेषामेकः ॥ १ ॥
सोमो विभूतिभाषी हर इव तथा सोमदत्तनामेति । तृतीयश्च सोमभूति र्गुरुभरणरुचिः सुशिष्य इव ॥ २ ॥
नागश्री भूतश्री र्यक्षश्रीस्तेषां भार्याः क्रमशः । सर्वेषामपि सुखेन गच्छति कालोऽथान्यदिने ॥ ३ ॥
नागश्रिया मधुरकतुम्बकव्यामोहत उपस्कृतम् । कटुकविषतुम्बकं घृत-गुडादिसुस्निग्धद्रव्यैः ॥ ४ ॥
ज्ञातं च कथमपि विषतुम्बकं ततः कथमिदं परित्यजामि ? । उत्तमद्रव्यविमिश्रितमिति चिन्तयित्वा मुञ्चत्येकत्र ॥५॥
अथ तत्र सकलसिद्धान्तपारगा धर्मघोषमुनिवृषभाः । निरुपममुनिपरिवाराः प्राप्ता अथ तेषामेकमुनिः ॥ ६ ॥
समधीतसूत्रार्थः परिजानितसकलसूत्रपरमार्थः । जीवानां करुणारसनिर्झरणगिरीन्द्रसमरुपः ॥ ७ ॥
आबालकालपालितश्रामण्यः शीलसङ्गतः सोम्यः । पारयति सदापि कृत्वा मासक्षपणं महाभागः ॥ ८ ॥
अथास्थि-मज्जाप्रेमानुरागरक्तो जिनेन्द्रधर्मे । धर्मरुचि र्धर्मरुचिरणगारो मासपारणके ॥ ९ ॥
उच्चावचभवनेषु परिभ्रमन्प्रशान्त-स्थिरचित्तः । नागश्रिया गृहे गतस्ततस्तया स दृष्टः ॥ १० ॥

**चिंतइ य कडुयविसतुंबयम्मि जाया पभूयधणहाणी । ता किं परिचत्तेणं इमिणा ? वियरिज्जउ इमस्स ।।११।।**
**इय चिंतिऊण पावाए तीए दिन्नं तवस्सिणो सो वि । तं दव्वाइविसुद्धं कलिउं पडिगाहिय नियत्तो ।।१२।।**
**पत्तो य गुरुसमीवे आलोएउं पडिग्गहं गुरुणो । दंसइ गंधं अग्घाइऊण सो जायसिरवियणो ।।१३।।**
**पभणइ अहो महासय ! कडुयं विसतुंवयं परिट्ठवसु । कत्थइ गवेसिऊणं उवभुंजसु सुद्धमाहारं ।।१४।।**
**इच्छं ति पभणिऊणं धम्मरुई सुद्धथंडिलं पत्तो । तत्तो परिट्ठवंतस्स निवडिओ कहवि तब्बिदू ।।१५।।**
**तग्गंधेण पभूया पिपीलिया आगया तओ तम्मि । बिंदुम्मि जा विलग्गइ रसेण सा तक्खणा मरइ ।।१६।।**
**तत्तो पिपीलियानियरमरणसंजायगरुयवेरग्गो । परिभाविउं पवत्तो धम्मरुई हा ! महापावं ।।१७।।**
**जइ एक्कबिंदुमित्ते वि एत्तियाओ मरंति एयाओ । ता सव्वपरिच्चाए बहुजीवखओ धुवं होही ।।१८।।**
**इच्छंति न एगस्स वि कीडियमेत्तस्स साहुणो मरणं । ता किह परिठविउमिमं वहुयाण वहं करेमि अहं ? ।।१९।।**
**जायस्स धुवं मरणं होही कइया वि कह वि कस्सावि । ता जीवदयाकरणे जुज्जइ इण्हिं पि मह मरणं ।।२०।।**
**इय चिंतिऊण पडिलेहिऊण मुहपोत्तियं महासत्तो । उवभुंजइ परमन्नं व समयविहिणा विसुद्धमणो ।।२१।।**
**तम्मि उ परिणममाणे सा का वि हु तस्स वेयणा जाया । जा कहिउं पि न तीरइ किं पुण सहिउं ? तओ सुमुणी ।।२२।।**
**संथरिउमणालोयम्मि थंडिले दब्भसंत्थरं तत्तो । पणमइ जिणकमकमलं भत्तिब्भरनिब्भरो तयणु ।।२३।।**
**जेसिं पसायाओ हं उत्तिन्नो भीमभवसमुद्दाओ । पममामि ताण सिरिधम्मघोससूरीण कमकमलं ।।२४।।**

---

चिन्तयति च कटुकविषतुम्बके जाता प्रभूतधनहानी । ततः किं परित्यक्तेनानेन ? वितीर्यत एतस्य ॥ ११ ॥
इति चिन्तयित्वा पापया तया दत्तं तपस्विनः सोऽपि । तद्द्रव्यादिविशुद्धं कलयित्वा प्रतिग्राह्य निवृत्तः ॥ १२ ॥
प्राप्तश्च गुरुसमीप आलोच्य पतद्ग्रहं गुरोः । दर्शयति गन्धमाघ्राय स जातशिरोवेदनः ॥ १३ ॥
प्रभणति अहो ! महायशः ! कटुकं विषतुम्बकं परिष्ठापय । कुत्रचिद्गवेष्योपभुङ्क्ष्व शुद्धमाहारम् ॥ १४ ॥
इच्छामीति प्रभण्य धर्मरुचिः शुद्धस्थण्डिलं प्राप्तः । ततः परिष्ठापयतो निपतितः कथमपि तद्बिन्दुः ॥ १५ ॥
तद्गन्धेन प्रभूताः पिपीलका आगतास्ततस्तस्मिन् । बिन्दौ या विलगति रसेन सा तत्क्षणान्म्रियते ॥ १६ ॥
ततः पिपिलिकानिकरमरणसञ्जातगुरुकवैराग्यः । परिभावयितुं प्रवृतो धर्मरुचि र्हा ! महापापम् ॥ १७ ॥
यद्येकबिन्दुमात्रेऽपि एतावन्त्यो म्रियन्त एताः । ततः सर्वपरित्यागे बहुजीवक्षयो ध्रुवं भविष्यति ॥ १८ ॥
इच्छन्ति नैकस्यापि कीटिकामात्रस्य साधवो मरणम् । ततः कथं परिष्ठाप्येदं बहूनां वधं करोम्यहम् ? ॥ १९ ॥
जातस्य ध्रुवं मरणं भविष्यति कदापि कथमपि कस्यापि । ततो जीवदयाकरणे युज्यत इदानीमपि मम मरणम् ॥२०॥
इति चिन्तयित्वा प्रतिलेख्य मुखवस्त्रिकां महासत्त्वः । उपभुङ्क्ते परमान्नमिव समयविधिना विशुद्धमनाः ॥ २१ ॥
तस्मिंस्तु परिणममाने सा कापि खलु तस्य वेदना जाता । या कथयितुमपि न शक्यते किं पुनः सोढुं ? ततः सुमुनिः ॥२२॥
संस्तीर्यानालोके स्थण्डिले दर्भसंस्तारं ततः । प्रभणति जिनक्रमकमलं भक्तिभरनिर्भरस्तदनु ॥ २३ ॥
येषां प्रसादादहमुत्तीर्णो भीमभवसमुद्रात् । प्रणमामि तेषां श्रीधर्मघोषसूरीणां क्रमकमलम् ॥ २४ ॥

**सिद्धाण पणमिऊणं वियरइ आलोयणं पुरो ताण । रोमंचअंचियंगो उच्चरइ महव्वए पंच ॥२५॥**
**खामेइ सव्वसत्ते इहलोए परभवे य दुक्खविए । आहारं पच्चक्खइ चउव्विहं पि हु समयविहिणा ॥२६॥**
**जह जह पभूयपीडापरव्वसं तस्स जायइ सरीरं । तह तह धम्मज्झाणे थिरचित्तो ठाइ स महप्पा ॥२७॥**
**आगमभावियहिययस्स जीव तुह केत्तिया इमा वियणा ? । सहिया अणंतवारा उ वेयणा घोरनरएसु ॥२८॥**
**लद्धो जिणिंदधम्मोसुइरं परिपालियं पि सामन्नं । वियणमिममसहमाणो सव्वं पि निरत्थयं कुणसि ॥२९॥**
**अहियासंतो विसतुंबयुब्भवं वेयणं महासत्तो । हिययब्भंतरविप्फुरियगरुयसंवेगसंजुत्तो ॥३०॥**
**पंचपहुनमोक्कारा सुमरंतो सत्तु-मित्तसमचित्तो । मरिऊण समुप्पन्नो सव्वट्ठे भासुरो अमरो ॥३१॥**
**गुरुणा वि गरुयवेल त्ति कलिय बाहिं गयस्स तवनिहिणो । पडिजागरणनिमित्तं पट्ठविया साहुणो तस्स ॥३२॥**
**आगंतूण गुरूणं पणमियचरणा कहंति ते साहू । कालगयं तो गुरूणो उवओगं दिंति पुव्वेसु ॥३३॥**
**परियाणियपरमत्था वाहरिउं साहु-साहुणीवग्गं । नागसिरीकडुतुंबयदाणा मरणं पयासंति ॥३४॥**
**जाओ जा सव्वट्ठे अमरो ता साहु-साहुणीवग्गो । निंदइ नागसिरीए दुच्चरियं थुणइ मुणिचरियं ॥३५॥**
**जाओ जणाववाओ नयरीमज्झम्मि तीए पावाए । भत्तार-देवरेहिं वि चत्ता रिसिधाइणि त्ति तओ ॥३६॥**
**निंदिज्जंती नयरीजणेण डिंभेहिमभिहणिज्जंती । सव्वत्थ दीणवयणा[१] भिक्खं पि न पावइ भमंती ॥३७॥**

सिद्धान्प्रणम्य वितरत्यालोचनं पुरस्तेषाम् । रोमाञ्चाञ्चिताङ्ग उच्चरति महाव्रतानि पञ्च ॥ २५ ॥
क्षामयति सर्वसत्वानिहलोके परभवे च दुःखायितान् । आहारं प्रत्याख्याति चतुर्विधमपि खलु समयविधिना ॥२६॥
यथा यथा प्रभूतपीडापरवशं तस्य जायते शरीरम् । तथा तथा धर्मध्याने स्थिरचित्तस्तिष्ठति स महात्मा ॥ २७ ॥
आगमभावितहृदयस्य जीव ! तव कियतीमावेदना ? । सोढाऽनन्तवारा तु वेदना घोरनरकेषु ॥ २८ ॥
लब्धो जिनेन्द्रधर्मः सुचिरं परिपालितमपि श्रामण्यम् । वेदनामिमामसहमानः सर्वमपि निरर्थकं करोषि ॥ २९ ॥
अध्यासमानविषतुम्बकोद्भवां वेदनां महासत्त्वः । हृदयाभ्यन्तरविस्फुरितगुरुकसंवेगसंयुक्तः ॥ ३० ॥
पञ्चप्रभुनमस्कारान् स्मरन् शत्रुमित्रसमचितः । मृत्वा समुत्पन्नः सर्वार्थे भासुरोऽमरः ॥ ३१ ॥
गुरुणापि गुरुकवेलेति कलयित्वाबहिर्गतस्य तपोनिधेः । प्रतिजागरणनिमित्तं प्रस्थापिताः साधवस्तस्य ॥ ३२ ॥
आगत्य गुरुणां प्रणमितचरणाः कथयन्ति ते साधवः । कालगतं ततो गुरव उपयोगं ददाति पूर्वेषु ॥ ३३ ॥
परिज्ञातपरमार्था व्याहृत्य साधु-साध्वीवर्गम् । नागश्रीकटुकतुम्बकदानान्मरणं प्रकाशन्ते ॥ ३४ ॥
जातो यावत्सर्वार्थेऽमरस्तावत्साधु-साध्वीवर्गः । निन्दति नागश्रिया दुश्चरितं स्तौति मुनिचरितम् ॥ ३५ ॥
जातो जनापवादो नगरीमध्ये तस्याः पापायाः । भर्ता-देवरैरपि त्यक्ता ऋषिघातिनीति ततः ॥ ३६ ॥
निन्द्यमाना नगरीजनेन डिम्भैरभिहन्यमानी । सर्वत्र दीनवदना भिक्षामपि न प्राप्नोति भ्रमन्ती ॥ ३७ ॥

१. वइणां रं ।

**इहलोए च्चिय पावा अक्कंता सोलसेहिं रोगेहिं । ते पुण सोलस रोगा सिद्धंते वन्निया एवं ॥३८॥**
**सासे कासे जरे दाहे जोणीसूले भगंदरे । अरिसा अजीरए दिट्ठी-मुहसूले अरोयए ॥३९॥**
**अच्छि-कन्नाण वियणा कंडू अवरे जलोदरे । कुट्ठवाही य दुहए एए सोलस वाहिणो ॥४०॥**
**अणुभविऊणं एए रोए सा तम्मि चेव य भवम्मि । मरिऊण समुप्पन्ना परलोए छट्ठपुढवीए ॥४१॥**
**तत्तो तंदुलमच्छत्तणाइभवभमणदुक्खमणुभविउं । उप्पन्ना अइबहुसो सव्वासु वि नरयपुढवीसु ॥४२॥**
**तत्तो परिब्भमंती संसारे तिरियजोणिलक्खेसु । कह कह वि हु मणुयत्तं पत्ता चंपाए नयरीए ॥४३॥**
**धूयत्ताए जाया सागरदत्तस्स सेट्ठिणो भवणे । भद्दाए भरियाए नामं सुकुमालिया तीसे ॥४४॥**
**सा जोव्वणमणुपत्ता विलसिरलायन्नपूरियसरीरा । जिणदत्तेणं गंतुं वरिया सागरसुयस्स कए ॥४५॥**
**सागरएण सपणयं परिणीया सा महाविभूईए । संपत्तो वासगिहं तो तीए अंगफासेण ॥४६॥**
**तिक्खतरवारिधारासंगेण व छिज्जमाणसव्वंगो । पत्तो य नियं गेहं दुहपत्थारिं व तं मोत्तुं ॥४७॥**
**गंतूणमुवालद्धो सागरदत्तेण तयणु जिणदत्तो । किं तुह कुलाणुरूवं निद्दोसं चइय मज्झ सुयं ॥४८॥**
**जं एस समायाओ तुह तणओ सिग्घमेव नियगेहं । जिणदत्तेण वि तणओ पयंपिओ एवमुल्लवइ ॥४९॥**
**वरमहमुज्झामि गिहं तणं व धण-सयण-मित्तकलियं पि । न उणो करवत्तसमं तीए तणुफासमिच्छामि ॥५०॥**
**वच्चामि वा विएसं छुहा-पिवासाभिभूयसव्वंगो । न उणो करवत्तसमं तीए तणुफासमिच्छामि ॥५१॥**

---

इहलोके चैव पापाऽऽक्रान्ता षोडशै रोगैः । ते पुनः षोडश रोगाः सिद्धान्ते वर्णिता एवम् ॥ ३८ ॥
श्वासः कासो ज्वरो दाहो योनीशूलं भगन्दरः । अर्षा अजीर्णं दृष्टिमुखशूलमरोचकम् ॥ ३९ ॥
अक्षि-कर्णानां वेदना कन्डू अपरं जलोदरम् । कुष्टव्याधिश्च दुःखयति एते षोडश व्याधयः ॥ ४० ॥
अनुभूयैतान् रोगान् सा तस्मिंश्चैव च भवे । मृत्वा समुत्पन्ना परलोके षष्ठपृथिव्याम् ॥ ४१ ॥
ततस्तन्दुलमत्स्यत्वादिभवभ्रमणदुःखमनुभूय । उत्पन्नातिबहुशः सर्वास्वपि नरकपृथिविषु ॥ ४२ ॥
ततः परिभ्रमन्ती संसारे तिर्यग्योनिलक्षेषु । कथं कथमपि खलु मनुष्यत्वं प्राप्ता चम्पायां नगर्याम् ॥ ४३ ॥
दुहितृत्वे जाता सागरदतस्य श्रेष्ठिनो भवने । भद्राया भार्याया नाम सुकुमालिका तस्याः ॥ ४४ ॥
सा यौवनमनुप्राप्ता विलसल्लावण्यपूरितशरीरा । जिनदत्तेन गत्वा वृता सागरसुतस्य कृते ॥ ४५ ॥
सागरेण सप्रणयं परिणीता सा महाविभूत्या । संप्राप्तो वासगृहं ततस्तस्या अङ्गस्पर्शेन ॥ ४६ ॥
तीक्ष्णतरवारिधारासङ्गेनेव छिद्यमानसर्वाङ्गः । प्राप्तश्चनिजं गृहं दुःखप्रस्तारिकामिव तां मुक्त्वा ॥ ४७ ॥
गत्वोपालब्धः सागरदत्तेन तदनु जिनदत्तः । किं तव कुलानुरुपं निर्दोषां त्यक्त्वा मम सुताम् ॥ ४८ ॥
यदेष समायातस्तव तनयः शीघ्रमेव निजगृहम् । जिनदत्तेनापि तनयः प्रजल्पित एवमुल्लपति ॥ ४९ ॥
वरमहमुज्झामि गृहं तृणमिव धन-स्वजन-मित्रकलितमपि । न पुनः करपत्रसमं तस्यास्तनुस्पर्शमिच्छामि ॥ ५० ॥
गच्छामि वा विदेशं क्षुधा-पिपासाभिभूतसर्वाङ्गः । न पुनः करपत्रसमं तस्यास्तनुस्पर्शमिच्छामि ॥ ५१ ॥

पज्जलियजलणजालाकलावदुसहं चियं पि पविसामि । न उणो करवत्तसमं तीए तणुफासमिच्छामि ॥५२॥
तिव्वतरवारिधारासंचरणसमं वयं पि गिण्हामि । न उणो करवत्तसमं तीए तणुफासमिच्छामि ॥५३॥
इय जामाउयभणियं कुड्डंतरिओ समग्गमवि सोउं । सागरदत्तो पत्तो सविलक्खमणो सभवणम्मि ॥५४॥
कहमवि न महइ वच्छे ! तुज्झ पई तुज्झ संगमं गुणवं । ता वीसत्था होउं उवभुंजसु मज्झ धणरिद्धिं ॥५५॥
मिच्छत्तमोहिया सा सोहग्गकएऽणुवासरं कुणइ । मयरद्धयस्स पूयं अच्चइ तह गउरिपडिमं पि ॥५६॥
धूयण-विलेवण-तिलय-मूलिया-मन्त-जन्त-तन्ताणि । जाणगजणोवइट्ठाणि कुणइ सव्वाणि न तहा वि ॥५७॥
संजायं सोहग्गं दोहग्गं वड्ढए सकोवं व । नेहपरव्वसहियया आदन्ना जणणि-जणया से ॥५८॥
चिंतंति य कस्सइ भिक्खवित्तिणो वियरिमो अहऽन्नदिणे । कच्छोट्टयपरिहाणो लिल्लिरियावेढियसिरग्गो ॥५९॥
धूलीधूसरगत्तो अंगुलपिहुपयवियाउयाविवरो । सिप्पउडसरिसनहरो कुरूवयाकलियसव्वंगो ॥६०॥
जुन्नकुसरज्जलंबिरमक्कडियाधरण ( वग्ग ) वामकरो । साणाइवारणत्थं दाहिणकरकलियढंखरओ ॥६१॥
भिक्खयरो भिक्खकए समागओ तयणु सेट्ठिणा भणिओ । को भद्द ! तुमं ? कत्थ व निवससि ? तो भणइ सो एवं ॥६२॥
परिहीणबंधुवग्गो वणियसुआ भिक्खमेत्तधणकलिओ । अनियययवासी साहु व्व खोणिवीढम्मि वियरामि ॥६३॥
सोऊण तस्स वयणं सेट्ठी चिंतइ जहा हवउ एसो । महदुहियाए दोहग्गदुक्खदूमियमणाए वरो ॥६४॥

---

प्रज्वलितज्वलनज्वालाकलापदुःसहां चितामपिप्रविशामि । न पुनः करपत्रसमं तस्यास्तनुस्पर्शमिच्छामि ॥ ५२ ॥
तीव्रतरवारिधारासञ्चरणसमं व्रतमपि गृह्णामि । न पुनः करपत्रसमं तस्यास्तनुस्पर्शमिच्छामि ॥ ५३ ॥
इति जामातृभणितं कुड्यान्तरितः समग्रमपि श्रुत्वा । सागरदत्तः प्राप्तः सविलक्षमनाः स्वभवने ॥ ५४ ॥
कथमपिन काङ्क्षते वत्से ! तव पतिस्तव सङ्गमं गुणवान् । ततो विश्वस्ता भूत्वोपभुङ्ग्ध मम धनर्द्धिम् ॥ ५५ ॥
मिथ्यात्वमोहिता सा सौभाग्यकृतेऽनुवासरं करोति । मकरध्वजस्य पूजामर्चयति तथा गौरिप्रतिमामपि ॥ ५६ ॥
धूपन-विलेपन-तिलक-मूलिका-मन्त्र-यन्त्र-तन्त्राणि । ज्ञापकजनोपदिष्टानि करोति सर्वाणि न तथापि ॥ ५७ ॥
सञ्जातं सौभाग्यं दौर्भाग्यं वर्धते सकोपमिव । स्नेहपरवशहृदयावादर्णौ जननी-जनकौ तस्याः ॥ ५८ ॥
चिन्तयतश्च कस्यचिद्भिक्षावृत्तिने वितरावोऽथान्यदिने । कच्छोटकपरिधानो चीरिकावेष्टितशिराग्रः ॥ ५९ ॥
धूलिधूसरगात्रोऽङ्गुलपृथुपदविपादिका[1]विवरः । सूर्पपुटसदृशनरवरः कुरुपकाकलितसर्वाङ्गः ॥ ६० ॥
जीर्णकुशरज्जुलम्बन्मर्कटिकाधरण (व्यग्र) वामकरः । श्वानादिवारणार्थं दक्षिणकरकलितढंखर[2]ओ ॥ ६१ ॥
भिक्षाचरो भिक्षाकृते समागतस्तदनु श्रेष्ठिना भणितः । को भद्र ! त्वं ? कुत्र वा निवसति ? ततो भणति स एवम् ॥६२॥
परिहीणबन्धुवर्णो वणिक्सुतो भिक्षामात्रधनकलितः । अनियतवासी साधुरिव क्षोणिपीठे विचरामि ॥ ६३ ॥
श्रुत्वा तस्य वचनं श्रेष्ठी चिन्तयति यथा भवत्येषः । मम दुहितु दौर्भाग्यदुःखदवितमनसः वरः ॥ ६४ ॥

---

१. 'बिवाई-रोग' इति भाषायाम् । २. 'डफली' भाषायाम् (दे.) ।

भणइ य भद्दय ! परिहरसु सयलभिक्खोवगरणमसुहमिमं । तुह वियरेमि नियसुयं तं सोउं चिंतए दमओ ॥६५॥
कम्मेहिं मज्झ विवरं दिन्नं दिव्वो वि अभिमुहो जाओ । फलियं च सुहमणोरहमालावल्लीवियाणेण ॥६६॥
जं मह भिक्खयरस्स वि रूवविहूणस्स बंधुरहियस्स । अमुणियकुलक्कमस्स वि एसो वियरइ नियं धूयं ॥६७॥
इय चिंतिऊण संजायगरुयहरिसेण तेण पडिवन्नं । तो सेट्ठिणा पहिट्ठेण ण्हाविओ तक्खणे दमओ ॥६८॥
परिहाविओ य सुंदरवत्थाइं तओ मणुन्नमाहारं । भुंजाविऊण विहियं परिनहपरिकम्मणं तस्स ॥६९॥
अणुवासरं पि ण्हाणुव्वट्टणपरिकम्मणेण संजाओ । सो जच्चकंचणनिभो दमओ वि हु देव्वकुमरो व्व ॥७०॥
सेट्ठी सुपसत्थदिणम्मि तस्स सुकुमालियं समप्पेइ । तो तीए संगमुस्सुयचित्तो पत्तो स वासगिहं ॥७१॥
अन्नोन्ननेहनिब्भरमणेहिमवरोप्परं तओ तत्थ । निवडियकयभुयजुयलेहिं तेहिं परिरंभमं विहियं ॥७२॥
तो तीए सरीरलयाफासेण वि सव्वओ समुच्छलिओ । तस्स सरीरे मुम्मुरहुयाससरिसो महादाहो ॥७३॥
चिंतइ विसन्नचित्तो जइ एसा सोक्खकारिणी होज्जा । ता किं धण-सयणजुयाण वणियपुत्ताण न हु दिन्ना ? ॥७४॥
जीए सरीरफासे वि दारुणो जायए महादाहो । संगेण तीए नियमेण होइ मरणं न संदेहो ॥७५॥
वररूवसालिणी वि य महरिहवंसुब्भवा वि फासेण । असुहेण न परिणीया केणावि सुहत्थिपुरिसेण ॥७६॥
नूणं भिक्खयराणं थीरयणं को वि देइ न कया वि । ता एयारिसफासेण संजुया वियरिया मज्झ ॥७७॥
जइ एयारिसफासो सव्वस्स वि होज्ज नारिनियरस्स । ता नामं पि न पुरिसो गिण्हेज्ज इमाण किमु संगं ? ॥७८॥

---

भणति च भद्रक ! परिहर सकलभिक्षोपकरणमशुभमिदम् । तुभ्यं वितरामि निजसुतां तच्छ्रुत्वा चिन्तयति द्रमकः ॥६५॥
कर्मभि र्मम विवरं दत्तं दिव्योऽप्यभिमुखो जातः । फलितं च शुभमनोरथमालावल्लीवितानेन ॥ ६६ ॥
यन्मम भिक्षाचरस्यापि रुपविहीनस्य बन्धुरहितस्य । अमुणितकुलक्रमस्याप्येष वितरति निजां दुहितरम् ॥ ६७ ॥
इति चिन्तयित्वा सञ्जातगुरुकहर्षेण तेन प्रतिपन्नम् । ततः श्रेष्ठिना प्रहृष्टेन स्नापितस्तत्क्षणे द्रमकः ॥ ६८ ॥
परिधापितश्च सुन्दरवस्त्राणि ततो मनोज्ञमाहारम् । भोजयित्वा विहितं परिणहपरिकर्म तस्य ॥ ६९ ॥
अनुवासरमपि स्नानोद्ध्वर्तनपरिकर्मणो सञ्जातः । स जात्यकञ्चननिभो द्रमकोऽपि खलु देवकुमार इव ॥ ७० ॥
श्रेष्ठी सुप्रशस्तदिने तस्य सुकुमालिकां समर्पयति । ततस्तस्याः सङ्गमोत्सुकचित्तः प्राप्तः स वासगृहम् ॥ ७१ ॥
अन्योन्यस्नेहनिर्भरमनोभ्यामपरापरं ततस्तत्र । निवर्तितकृतभुजयुगलाभ्यां ताभ्यां परिरम्भणं विहितम् ॥ ७२ ॥
ततस्तस्याः शरीरलतास्पर्शेनापि सर्वतः समुच्छलितः । तस्य शरीरं मुर्मुरहुताशसदृशो महादाहः ॥ ७३ ॥
चिन्तयति विषण्णचित्तो यद्येषा सौख्यकारिणी भवेत् । तदा किं धन-स्वजनयुतानां वणिक्पुत्राणां न खलु दत्ता ? ॥७४॥
यस्याः शरीरस्पर्शेऽपि दारुणो जायते महादाहः । सङ्गेन तस्या नियमेन भवति मरणं न सन्देहः ॥ ७५ ॥
वररुपशालिन्यपि च महार्हवंशोद्भवापि स्पर्शेन । अशुभेन न परिणीता केनापि सुखार्थी पुरुषेण ॥ ७६ ॥
नूनं भिक्षाचराणां स्त्रीरत्नं कोऽपि ददाति न कदापि । तत एतादृशस्पर्शेन संयुक्ता वितरिता मम ॥ ७७ ॥
यद्येतादृशस्पर्शः सर्वस्यापि भवेन्नारिनिकरस्य । तदा नाममपि न पुरुषो गृह्णीयादासां किमु सङ्गम् ? ॥ ७८ ॥

**ता सव्वहा वि वरि मज्झ होउ आबालकालिया भिक्खा । मा संपज्जउ फासो इमाए धणरिद्धिजुत्तो वि ॥७९॥**
**इय चिंतिऊण काउं कडीए कच्छोट्टयं तओ झत्ति । नीहरिओ रुयमाणिं तणं व चइऊण तं दमओ ॥८०॥**
**भणिओ य सेट्ठिणा वच्छ ! पढमपेम्मे वि रूसणारंभो । किं तुज्झ ? तओ सो भणइ मज्झ न हु रूसणं किं पि ॥८१॥**
**किंतु तुह अंगयाअंगसंगसंतावमसहमाणो हं । गच्छामि न भोगेहिं पओयणं मज्झ एयाए ॥८२॥**
**जइ अहिलसेमि विसए इमाए ता होइ नित्तूलं मरणं । जीवंतो पुण सीयलसलिलं सव्वत्थ वि पिएमि ॥८३॥**
**तो सहसा जुन्नतणं धेत्तूणं भामिऊण नियसीसे । पक्खिविय तीए समुहं विणिग्गओ झति भवणाओ ॥८४॥**
**दमएण वि परिचत्ता तो य संजायगरुयवेरग्गा । पव्वइया अइघोरं चरिउं सुचिरं तवच्चरणं ॥८५॥**
**दट्ठुं गणियं पंचहि विलासिपुरिसेहिं आलविज्जंतिं । परिहासचाडुवयणेहिं तयणु संभरियदोहग्गा ॥८६॥**
**कुणइ नियाण इमेयं जइ मज्झ तवस्स किं पि होज्ज फलं । ता होज्ज पंचपुरिसाण पणइणी हिययदइया य ॥८७॥**
**मरिऊण समुप्पन्ना ईसाणं वाररमणिरूवेण । अणुहविउं विसयसुहं पंचपयारं सह सुरेहिं ॥८८॥**
**चविऊण तओ कंपिल्लपुरवरे दुवयपुहइपालस्स । धूया जाया वररूवसालिणी दोवई नाम ॥८९॥**
**नवजोव्वणमारूढाए तीए पंचण्ह पंडुपुत्ताण । पक्खित्ता वरमाला निययनियाणाणुभावेण ॥९०॥**
**जाया य ताण इट्ठा अहऽन्नया नारएण कुविएण । धायइसंडे भरहम्मि राइणो पउमनाहस्स ॥९१॥**
**कहिउं रूवाइगुणे हराविया दोवई तओ तत्थ । छट्ठतव कुणमाणी ठिया तहाऽऽयामपारणया ॥९२॥**

---

ततः सर्वथापि वरा मम भवतु आबालकालिका भिक्षा । मा सम्पद्यतां स्पर्शोऽनया धनर्द्धियुक्तोऽपि ॥ ७९ ॥
इति चिन्तयित्वा कृत्वा कट्यां कच्छोटकं ततः शीघ्रम् । निसृतो रुदन्तीं तृणमिव त्यक्त्वा तां द्रमकः ॥ ८० ॥
भणितश्च श्रेष्ठिना वत्स ! प्रथमप्रेमेऽपि रोषणारम्भः । किं तव ? ततः स भणति मम न खलु रोषणं किमपि ॥८१॥
किन्तु तवाङ्गजाङ्गसङ्गसन्तापमसहमानोऽहम् । गच्छामि न भोगैः प्रयोजनं ममैतस्याः ॥ ८२ ॥
यद्यभिलषामि विषयानेतस्यास्तदा भवति निस्तूलं मरणम् । जीवन्पुनः शीतलसलिलं सर्वत्रापि पिबामि ॥ ८३ ॥
ततः सहसा जीर्णतनं गृहीत्वा भ्रामयित्वा निजशीर्षे । प्रक्षिप्य तस्याः सम्मुखं विनिर्गतः शीघ्रं भवनात् ॥ ८४ ॥
द्रमकेनापि परित्यक्ता ततश्च सञ्जातगुरुकवैराग्या । प्रव्रजितातिघोरं चरित्वा सुचिरं तपश्चरणम् ॥ ८५ ॥
दृष्ट्वा गणिकां पञ्चभि विलासपुरुषैरालप्यमानी । परिहासचाटुवचनैस्तदनु स्मृतदौर्भाग्या ॥ ८६ ॥
करोति निदानमिमायंयदि मम तपसः किमपि भवेत्फलम् । ता भवेः पञ्चपुरुषाणां प्रणयिनी हृदयदयिता च ॥८७॥
मृत्वा समुत्पन्नेशाने वाररमणिरुपेन । अनुभूय विषयसुखं पञ्चप्रकारं सह सुरैः ॥ ८८ ॥
च्युत्वा ततः काम्पिल्यपुरवरे द्रुपदपृथिवीपालस्य । दुहिता जाता वररुपशालिनी द्रौपदी नाम ॥ ८९ ॥
नवयौवनमारुढया तया पञ्च पाण्डुपुत्राणाम् । प्रक्षिप्ता वरमाला निजनिदानानुभावेन ॥ ९० ॥
जाता च तेषामिष्टाऽथान्यदा नारदेन कुपितेन । धातकीखण्डे भरते राज्ञः पद्मनाभस्य ॥ ९१ ॥
कथयित्वा रूपादिगुणान्हारिता द्रौपदी ततस्तत्र । षष्टतपः क्रियमाणी स्थिता तथा चाम्लपारणका ॥ ९२ ॥

**अक्खंडियनियसीला छट्ठे मासम्मि वासुदेवेण । रहपहमणुजाणाविय देवं तरिऊण जलरासिं ॥९३॥**

**निज्जिणिय पउमनाहं पच्चाणीया य पंडुमहुराए । तत्थ ठिया बहुकालं उवभुंजंती विसयसोक्खं ॥९४॥**

**तो पंडुसेणकुमरे अहिसित्ते पंडवेहिं नियरज्जे । तेहिं सह गहियदिक्खा अकलंकं पालिऊण वयं ॥९५॥**

**मरिऊण बंभलोए उप्पन्ना तत्थ भुंजिउं भोए । चविउं महाविदेहे पव्वइउं पाविही सोक्खं ॥९६॥**

**॥ नागश्रीब्राह्मण्याख्यानकं समाप्तम् ॥१२॥**

**दिन्नं सुपत्तदाणं विहीए धण-धन्नायाइमणुयाण । भत्तिकलियाण जायं कल्लाणपरंपराजणयं ॥१॥**

**नागसिरिए संसारकारणं तं पि अविहिणा दिन्नं । तम्हा विहीए देयं दाणं सिवमोक्खकामेहिं ॥२॥**

**यत् प्राप्तवांस्त्रिदशसार्थपतित्वमिन्द्रः, पातालराज्यमपि शास्ति यदत्र शेषः ।**

**यच्चक्रवतिपदवीं परिपाति चक्री, तत् पात्रदानजनितं फलमामनन्ति ॥१॥**

**॥ इति श्रीमदाम्रदेवसूरिविरचितवृत्तावाख्यानकमणिकोशे सुपात्रदानवर्णनो नाम द्वितीयोऽधिकारः समाप्तः ॥२॥**

---

अखण्डितनिजशीला षष्टे मासे वासुदेवेन । रथपथमनुज्ञाप्य देवं तीर्त्वा जलराशिम् ॥ ९३ ॥

निर्जित्य पद्मनाभं प्रत्यानीता च पाण्डुमथुरायाम् । तत्र स्थिता बहुकालमुपभुञ्जन्ती विषयसौख्यम् ॥ ९४ ॥

ततः पाण्डुसेनकुमारेऽभिषिक्ते पाण्डवै निजराज्ये । तैः सह गृहीतदिक्षाऽकलङ्कं पालयित्वा व्रतम् ॥ ९५ ॥

मृत्वा ब्रह्मलोक उत्पन्ना तत्र भुक्त्वा भोगान् । च्युत्वा महाविदेहे प्रव्रज्य प्राप्स्यति सौख्यम् ॥ ९६ ॥

**॥ नागश्रीबाह्मण्याख्यानकं समाप्तम् ॥ १२ ॥**

दत्तं सुपात्रदानं विधिना धन-धान्यादिमनुष्याणाम् । भक्तिकलितानां जातं कल्याणपरम्पराजनकम् ॥ १ ॥

नागश्रियाः संसारकारणं तदप्यविधिना दत्तम् । तस्माद्विधिना देयं दानं शिवमोक्षकामिभिः ॥ २ ॥

● ● ●

## [ ३. शीलमाहात्म्यवर्णनाधिकारः । ]

व्यख्यातं विध्यविधिप्रकाराभ्यां शुभा-ऽशुभफलप्रदं दानम् । अधुना क्रमप्राप्तं शीलमाख्यायते । तच्चेह यद्यपि देश-सर्व-संवररुपं समये शीलं प्रसिद्धं तथापीह तदवयवभूतं स्त्रियोऽधिकृत्य परपुरुषपरिहार स्वरुपमेवाह -

**सीलं सुगइनिहाणं नमन्ति देवा वि सीलमंताणं ।**
**दवदंति-सीय-रोहिणि-मणोरमसुभद्दनाएणं ॥ ८ ॥**

व्याख्या - 'शीलं' करणनिग्रहस्वरूपं सुगतेः- सुदेवत्व सुमानुषत्वरुपाया निधानं-स्थानम् । 'नमन्ति' प्रणिपतन्ति देवा अपि आसतां मानवादयः, 'शीलवद्भ्यः' शीलसम्पन्नेभ्यः । दृष्टान्तानाह-दवदन्ती च -नलकलत्रं सीता च - रामदेवदयिता रोहिणी च श्रेष्ठिभार्या मनोरमा च - सुदर्शनपत्नी सुभद्रा च - वणिग्जाया दवदन्ती-सीता-रोहिणी-मनोरमा-सुभद्राः, ता एव ज्ञातम् तेन ॥ ८ ॥

**तत्र तावद् दवदन्त्याख्यानकमाख्यायते । तच्चेदम्-**

**अत्थि वियब्भादेसस्स मंडणा कुंडिणाभिहाणपुरी । निज्जिणियपुरंदरनयरिविब्भमा निययरिद्धीए ॥१॥**

**जत्थ अदब्भवियंभियभवणुब्भवनीलरयणकिरणेहिं । अहिणवजलहरसंका जायइ गिहिगयसिहंडीणं ॥२॥**

**जत्थ तिउरारिनयणानलाओ भीएण कामदेवेण । विहिया पुरंगणाणं नयणिंदीवरवणेसु ठिई ॥३॥**

**तं परिपालइ राया भीमरहो भीमसमरसंरंभो । बंदीकयारिकामिणिसंचालिज्जंतसियचमरो ॥४॥**

---

॥ ३. शीलमाहात्म्यवर्णनाधिकारः ॥

**तत्र तावद् दवदन्त्याख्यानकमाख्यायते ।**

अस्ति विदर्भदेशस्य मण्डना कुण्डिनाभिधानपुरी । निर्जितपुरन्दरनगरीविभ्रमा निजकर्द्धया ॥ १ ॥

यत्रादर्भविजृम्भितभवनोद्भवनीलरत्नकिरणैः । अभिनवजलधरशङ्का जायते गृहगतशिखण्डीनाम् ॥ २ ॥

यत्र त्रिपुरारिनयनानलाद्भीतेन कामदेवेन । विहिता पुराङ्गनानां नयनीन्दीवरवनेषु स्थितिः ॥ ३ ॥

तां परिपालयति राजा भीमरथो भीमसमरसंरम्भः । बन्दीकृतारिकामिनिसञ्चाल्यमानश्वेतचामरः ॥ ४ ॥

**तस्सऽत्थि पुप्फदंती सिंगारलयाविलासिपुप्फं व । हरिमुत्ति व्व पवित्ता भज्जा गउरि व्व [१] सुकुमारा ॥५॥**

**रइकेलिविसयसुहसारमणुहवंतस्स तस्स तीए समं । गच्छंति वासरा कमलचंचुणो पणइकमलाण ॥६॥**

**अह अन्नया य देवी रयणीए पच्छिमम्मि जामम्मि । दट्ठुं सुमिणं साहइ पहायसमयम्मि दइयस्स ॥७॥**

**जाणामि पेरिओ वणदवेण दंती सुरिंदकरिधवलो । संपत्तो पिययम ! तुज्झ मंदिरे तयणु भणइ निवो ॥८॥**

**दइए तुज्झ भविस्सइ कुमरो कुमरी व जे सगुणनियरा । भुवणमिणं रययसलायपंजरत्थं करिस्संति ॥९॥**

**जाव इमं भणइ निवो सो दंती ताव तत्थ संपत्तो । आरोवित्तु सखंधे देवीसहियं निवं तत्तो ॥१०॥**

**भमिऊण नयरिमज्झे उत्तारेऊण खंधदेसाओ । गेहम्मि दोन्नि वि तओ पत्तो आलाणखंभम्मि ॥११॥**

**पडिया तत्तो गयणाओ कुसुमवुट्ठी पयंपई लोओ । पुन्नेहिं निव्वुइदेवयाए इह एस आणीओ ॥१२॥**

**तप्पभिइं देवीए संजाओ गब्भसंभवो सुहओ । हियइच्छियपूरिज्जंत डोहला पसवसमयम्मि ॥१३॥**

**सोयामिणिम्व जलहरमाला जुण्हं व रयणिवरमुत्ती । दिणयरतणु व्व सुपहं सुहं पसूया सुयं देवी ॥१४॥**

**सह जम्मेणं तीए भालयले तरुणतरणिसच्छाओ । पाउब्भूओ तिलओ उदयधरे वालतरणि व्व ॥१५॥**

**अइगरुयविभूईए वद्धावणयं करित्तु नरवइणा । दवदंति त्ति कयं से नामं सुमिणाणुसारेण ॥१६॥**

**अणुदियहं वड्ढंती कलाकलावेण चंदलेह व्व । संपत्ता मयणविलासमंदिरं जोव्वणारंभं ॥१७॥**

---

तस्यास्ति पुष्पदन्ती शृङ्गारलताविलासिपुष्पमिव । हरिमूर्तिरिव पवित्रा भार्या गौरिरिव सुकुमारा ॥ ५ ॥

रतिकेलिविषयसुखसारमनुभवतस्तस्य तया समम् । गच्छन्ति वासराः कमलचञ्चुनः प्रणतिकमलानाम् ॥ ६ ॥

अथान्यदा च देवी रजन्यां पश्चिमे यामे । दृष्ट्वा स्वप्नं कथयति प्रभातसमये दयितस्य ॥ ७ ॥

जानामि प्रेरितो वनदेवेन दन्ती सुरेन्द्रकरिधवलः । संप्राप्तःप्रियतम ! तवमन्दिरे तदनुभणति नृपः ॥ ८ ॥

दयिते तव भविष्यति कुमारः कुमारी वा ये स्वगुणनिकरात् । भुवनमिदं रजतशलाकापञ्जरस्थं करिष्यन्ति ॥ ९ ॥

यावदिमं भणति नृपःस दन्ती तावत्तत्र सम्प्राप्तः । आरोप्य स्वस्कन्धे देवीसहितं नृपं ततः ॥ १० ॥

भ्रान्त्वा नगरीमध्ये उत्तार्य स्कन्धदेशाद् । गृहे द्वावपि ततः प्राप्त आलानस्तम्भे ॥ ११ ॥

पतिता ततो गगनात्कुसुमवृष्टिः प्रजल्पति लोकः । पुण्यैर्निर्वृत्तिदेवतयेहैष आनीतः ॥ १२ ॥

तत्प्रभृति देव्याः सञ्जातो गर्भसम्भवः सुभगः । हृदयेच्छितपूर्यमाणदोहदा प्रसवसमये ॥ १३ ॥

सौदामिनीव जलधरमाला ज्योत्स्नामिव रजनीवरमूर्तिः । दिनकरतनूरिव सुप्रभां सुखं प्रसूता सुतां देवी ॥ १४ ॥

सह जन्मना तस्या भालतलं तरुणतरणिसच्छायः । प्रादुर्भूतस्तिलक उदयधरे बालतरणिरिव ॥ १५ ॥

अतिगुरुकविभूत्या वर्द्धापनकं कृत्वा नरपतिना । दवदन्तीति कृतं तस्या नाम स्वप्नानुसारेण ॥ १६ ॥

अनुदिवसं वर्धमानी कलाकलापेन चन्द्रलेखेव । सम्प्राप्ता मदनविलाशमन्दिरं यौवनारम्भम् ॥ १७ ॥

---

१. मुपवित्ता रं०।

**सम्मोहणं व तिहुयणजणाण संतावणं व तरुणाण । उम्मायणं व एक्कग्गमाणसाणं मुणीणं पि ॥१८॥**
**निस्सेसलोयउवसमपल्लववेल्लीए सोसणं व इहं । संहारणं व परमं कामुयजणजीवियस्सावि ॥१९॥**
**जो पंचवाणमइयाए तीए विद्धो कडक्खभल्लीहिं । वच्छत्थलम्मि सो जियइ कामुओ कहवि किच्छेण ॥२०॥**
**तं दट्ठुं नरनाहो असरिसलायन्न-रूव-गुणजलहिं । चिंतइ कत्थ भविस्सइ एयाए वरो गुणेहिं समो ? ॥२१॥**
**ता एयाए निमित्तं सयंवरामंडवं करावेमि । तत्थ निवकुमरमज्झे वरेउ जो रोयइ मणस्स ॥२२॥**
**इय चिंतिय वाहरिया सव्वे वि नरेसरा नरिंदेण । निम्माविओ य नयरे सयंवरामंडवो रुइरो ॥२३॥**
**वेल्लहलधवलधयवडरणंतमणिकणयकिंकिणिकलावो । मंचाइमंचकलिओ निरुद्धरवितुरयसंचारो ॥२४॥**
**एगत्थ मेघडंबरवचूलमुत्ताकलावनियरेण । अणुहरइ सरयनिम्मलतारावलिसहियगयणस्स ॥२५॥**
**नीलमणिथंभनिणिहियनाणामणिकिरणजालसंवलिओ । अणुहरइ कहवि हरिचावजट्ठिजुयजलयपडलस्स ॥२६॥**
**अवरत्थ पंडुपट्टउलवत्थउल्लोयविहियगुरुसोहो । आगामिनलकुमारस्स पसरिओ कित्तिपडओ व्व ॥२७॥**
**थंभनिवेसिडज्झन्तधूमधडियासमुत्थधूमसिहो । भाविपरकुमरअवमाणकोवसिहिफुरियधूमो व्व ॥२८॥**
**परितुलियपुरंदरधामविब्भमो धाम रामणीयस्स । निस्सेसदेसलच्छीविलासरमणीयगेहं व ॥२९॥**
**आगंतुं पडिहारेण नमिय वद्धाविओ महीनाहो । रायाणो देव ! इहं पत्ता लेहारिएहिं समं ॥३०॥**
**समुहं गंतुं गुरुबलभारपकंपंतधरणिवीढेण । अइगरुयविभूईए तेसि पवेसो कओ रन्ना ॥३१॥**

---

सम्मोहनमिव त्रिभुवनजनानां सन्तापनमिव तरुणानाम् । उन्मादनमिवैकाग्रमानसानां मुनीनामपि ॥ १८ ॥
निःशेषलोकोपशमपल्लवल्ल्याशोषणमिवेह । संहारणमिव परमं कामुकजनजीवितस्यापि ॥ १९ ॥
यः पञ्चबाणमतिकया तया विद्धः कटाक्षभल्लीभिः । वक्षःस्थले स जीवति कामुकः कथमपि कृच्छ्रेण ॥ २० ॥
तां दृष्ट्वा नरनाथोऽसदृशलावण्य-रुप-गुणजलधिम् । चिन्तयति कुत्र भविष्यत्येतस्या वरो गुणैः समः ? ॥ २१ ॥
तत एतस्या निमित्तं स्वयंवरमण्डपं कारयामि । तत्र नृपकुमारमध्ये वरतु यो रोचते मनसः ॥ २२ ॥
इति चिन्तयित्वा व्याहृताः सर्वेऽपि नरेश्वरा नरेन्द्रेण । निर्मापितश्च नगरे स्वयंवरमण्डपो रुचिरः ॥ २३ ॥
धुर्णद्धवलध्वजपटरणन्मणिकनककिङ्किणिकलापः । मञ्चातिमञ्चकलितो निरुद्धरवितुरगसञ्चारः ॥ २४ ॥
एकत्र मेघडम्बरावचूलमुक्ताकलापनिकरेण । अनुहरति शरदनिर्मलतारकावलिसहितगगनस्य ॥ २५ ॥
नीलमणिस्तम्भविनिहितनानामणिकिरणजालसंवलितः । अनुहरति कथमपि हरिचापयष्टियुतजलदपटलस्य ॥ २६ ॥
अपरत्र पाण्डुपट्टकुलवस्त्रोल्लोचविहितगुरुशोभः । आगामिनलकुमारस्य प्रसृतः कीर्तिपट इव ॥ २७ ॥
स्तम्भनिवेशितदह्यमानधूम्रघटिकासमुत्थधूमशिखः । भाविपरकुमारापमानकोपशिखिस्फुरितधूम्र इव ॥ २८ ॥
परितोलितपुरन्दरधामविभ्रमो धाम रामणीयस्य । निःशेषदेशलक्ष्मीविलासरमणीयगेहमिव ॥ २९ ॥
आगत्य प्रतिहारेण नत्वा वर्धापितो महीनाथः । राजानो देव ! इह प्राप्ता लेखाचार्यैः समम् ॥ ३० ॥
सम्मुखं गत्वा गुरुबलभारप्रकम्पद्मानधरणिपीठेन । अतिगुरुकविभूत्या तेषां प्रवेशः कृतो राज्ञा ॥ ३१ ॥

उवविट्ठेसु महारिहमणिमयसिंघासणेसु निवईसु । तुलिया सयंवरेणं इंदसमा णियसहा सोही ॥३२॥
अह वेयब्भनिवसुया सव्वालंकारसुंदरावयवा । रमणईयसयंवरमंडवम्मि पत्ता निवाइन्ने ॥३३॥
उत्तत्तकणयगोरी कज्जलसामलकरेणुमारूढा । रेहंती नवजलहरमालंकगया तडिलय व्व ॥३४॥
अह करकलियसयंवरमाला बाला करेणुगइगमणी । निस्सेसनरिंदेहिं निरुविया साणुराएहिं ॥३५॥
तो तीए नरिंदाणं नयणेहिं समं गयाइं हिययाइं । सह कामवियारेहिं मणोरहा चिय पवड्ढन्ति ॥३६॥
अणुरायजुया रेहंति के वि दवदंतिचलणजुयलं व । अन्ने उण उव्वित्ता तीए च्चिय ऊरुखंभ व्व ॥३७॥
सारसणा संजाया इयरे तीए नियंबबिबं व । गंभीरा संजाया अन्ने तन्नाभिकूवो व्व ॥३८॥
तुच्छत्तं संपत्ता के वि निवा तीए मज्झदेसो व्व । साममुहा संजाया के वि हु तीए घणथण व्व ॥३९॥
अंगयकलिया जाया नरवइणो के वि तब्भूयलय व्व । के वि समुद्दासोहं तीए करकमलजुयलं व ॥४०॥
रेहंति तत्थ अन्ने वराहरा तीए वयणकमलं व । इयरे सरला तीए नासावंसो व्व सोहंति ॥४१॥
तरलत्तं संपत्ता के वि हु तन्नेत्तनलिणजुयलं व । के वि हु कुडिला जाया तीए कुंतलकलावो व्व ॥४२॥
परिमलमिलंतभमरउलरुणझुणारावमुहलियदियंतं । काऊण करे सियकुसुममालियं बालिया तयणु ॥४३॥
नवजोव्वणं पि सुकुलुग्गयं पि सूरं पि परिहरेऊण । निस्सेसरायमंडलमणुपत्ता नलकुमारम्मि ॥४४॥
सव्वंगसुंदरावयवमणहरं कुसुमबाणसमरूवं । दट्ठूण तयं पारूढपरमनवजोव्वणारंभं ॥४५॥

---

उपविष्टेषु महार्हमणिमयसिंहासनेषु नृपतिषु । तोलिता स्वयंवरेणेन्द्रसमा निजसभा शोधिन् ॥ ३२ ॥
अथ वैदर्भनृपसुता सर्वाऽलङ्कारसुन्दरावयवा । रमणीयस्वयंवरमण्डपे प्राप्ता नृपाकीर्णे ॥ ३३ ॥
उत्तप्तकनकगौरी कज्जलश्यामलकरेणुमारुढा । राजमानी नवजलधरमालाङ्कगता तडिल्लतेव ॥ ३४ ॥
अथ करकलितस्वयंवरमाला बाला करेणुगतिगामिनी । निःशेषनरेन्द्रै र्निरुपिता सानुरागैः ॥ ३५ ॥
ततस्तस्या नरेन्द्राणां नयनैः समं गतानि हृदयानि । सह कामविकारै र्मनोरथा एव प्रवर्धन्ते ॥ ३६ ॥
अनुरागयुता राजन्ते केऽपि दवदन्तिचरणयुगलमिव । अन्ये पुनरुद्विक्तास्तस्याश्चैवोरुस्तम्भमिव ॥ ३७ ॥
सारसनाः सञ्जाता इतरे तस्या नितम्बबिम्बमिव । गम्भीराः सञ्जाता अन्ये तन्नाभिकूप इव ॥ ३८ ॥
तुच्छत्वं सम्प्राप्ताः केऽपि नृपास्तस्या मध्यदेश इव । श्याममुखाः सञ्जाताः केऽपि खलु तस्याः घनस्तन इव ॥३९॥
अङ्गदकलिता जाता नरपतयःकेऽपि तद्भूजलतेव । केऽपि समुद्राशोभं तस्याः करकमलयुगलमिव ॥ ४० ॥
राजन्ते तत्रान्ये वराधरास्तस्या वदनकमलमिव । इतरे सरलास्तस्यानासावंशमिव शोभन्ते ॥ ४१ ॥
तरलत्वं सम्प्राप्ताः केऽपि खलु तन्नेत्रनलिनयुगलमिव । केऽपि खलु कुटिला जातास्तस्याः कुन्तलकलाप इव ॥४२॥
परिमलमिलद्भ्रमरकुलरुणझुणारावमुखरितदिगन्तम् । कृत्वा करे श्वेतकुसुममालिकां बालिका तदनु ॥ ४३ ॥
नवयौवनामपि सुकुलोद्गतमपि शूरमपि परिहृत्य । निःशेषराजमण्डलमनुप्राप्ता नलकुमारे ॥ ४४ ॥
सर्वाङ्गसुन्दरावयवमनोहरं कुसुमबाणसमरुपम् । दृष्ट्वा तकं प्रारुढपरमनवयौवनारम्भम् ॥ ४५ ॥

एएण मयणबाणेहिं[1] पीडिया हं ति जायकोवाए । बद्धो व्व जणसमक्खं कंठे घेत्तूण वरमालं ।।४६।।

एत्थंतरम्मि एगो समुट्ठिओ कोवदंतदट्ठोट्ठो । कन्हडदेवकुमारो जंपतो फरुसवयणाइं ।।४७।।

रयणाणि मही लच्छी कुलक्कमेणं न हुंति कस्साvि । खग्गेण वसीकाउं उवभुंजइ जो महासत्तो ।।४८।।

ता एसो मं जुज्झेण निज्जिउं कुणउ पाणिगहणं ति । नो एवं तो मुंचउ सह दवदंतीए महिवलयं ।।४९।।

तं निसुणित्तु पयंपइ फुरंतकोवारुणच्छिदुप्पेच्छो । आबद्धभिउडिभासुरभालयलो नलकुमारो वि ।।५०।।

किं रे ! इमिणा गलगज्जिएण जलवज्जिएण व घणस्स । वायाडंबरमेत्तेण जंपिएणं जणसमक्खं ।।५१।।

जइ का वि तुज्झ सत्ती फुरइ मणे ता भवेसु सन्नद्धो । अवणेमि तुज्झ जेणं रणकंडु बाहुदंडाणं ।।५२।।

इय जंपत्तो तत्तो समुट्ठिओ कोवभिउडिदुप्पेच्छो । पेच्छंताण निवाणं आयड्ढियनिसियकरवालो ।।५३।।

इयरो विमंडलग्गंगिण्हित्तु समुट्ठिओ समरधीरो । एत्थंतरम्मि दुण्ह वि सन्नद्धं चाउरंगवलं ।।५४।।

तरलतुरंगमखुरखुन्नखोणिउच्छलियबहलरयपसरं । उवसामिंतो गंडयलगलियमयजलपवाहेण ।।५५।।

उत्तुङ्गपयडपोओ कयलीवणराइरेहिरसरीरो । जंगमपव्वयपुञ्ज व्व सज्जिओ गयघडावीढो ।।५६।।

निट्ठुरखुरपहारकंपावियमहिहर-खोणिमंडलं, उवणियसेसरायगुरुमणहरु पसरिउ तुरयमंडलं ।
सेल्ल-मुसुंढि-कुंत-वावल्ल-सरासणभरियसंदणा, चोइय चडिय समरदप्पुद्धरकंधर रायनंदणा ।।५७।।

---

एतेन मदनबाणैः पीडिताहमिति जातकोपया । बद्ध इव जनसमक्षं कण्ठे गृहीत्वा वरमालाम् ॥ ४६ ॥

अत्रान्तर एकः समुत्थितः कोपदन्तदष्टौष्ठः । कर्नाटदेवकुमारो जल्पन्परुषवचनानि ॥ ४७ ॥

रत्नानि मही लक्ष्मीः कुलक्रमेण न भवन्ति कस्यापि । खड्गेनवशीकृत्वोपभुनक्ति यो महासत्त्वः ॥ ४८ ॥

तत एष मां युधेन निजीत्य करोतु प्राणिग्रहणमिति । नैवं तदा मुञ्चतु सह दवदन्त्या महिवलयम् ॥ ४९ ॥

तन्निश्रुत्य प्रजल्पति स्फुरत्कोपारुणाक्षिदुष्प्रेक्ष्यः । आबद्धभृकूटिभासुरभालतलो नलकुमारोऽपि ॥ ५० ॥

किं रे ! अनेना गलगर्जितेन जलवर्जितेनेव घनस्य । वाचाऽम्बरमात्रेण जल्पितेन जनसमक्षम् ॥ ५१ ॥

यदि कापि तव शक्तिः स्फुरति मनसि ततो भव सन्नद्धः । अपनयामि तव येन रणकण्डुं बाहुदण्डयोः ॥ ५२ ॥

इति जल्पंस्ततः समुत्तिष्ठत्कोपभृकूटिदुष्प्रेक्ष्यः । पश्यतां नृपाणामाकृष्टनिसितकरवालः ॥ ५३ ॥

इतरोऽपि मण्डलाग्रं गृहीत्वा समुत्थितःसमरधीरः । अत्रान्तरे द्वयोरपि सन्नद्धं चातुरङ्गबलम् ॥ ५४ ॥

तरलतुरङ्गमखुरक्षुण्णक्षोण्युच्छलितबहलरजःप्रसरम् । उपशामयन् गण्डतलगलितमदजलप्रवाहेण ॥ ५५ ॥

उत्तुङ्गप्रकटपोतः कदलीवनराजिराजमानशरीरः । जङ्गमपर्वतपुञ्ज इव सर्जितो गजघटापीठः ॥ ५६ ॥

निष्ठुरक्षुरप्रहारकम्पायितमहिधरक्षोणिमण्डलम्, उपनीतशेषराजगुरुमनोहरप्रसृततुरगमण्डलम् ।
शल्य-मुसुण्ढि-कुन्त-वावल्ल[2] शरासनभृतस्यन्दनाः, चोदितारोहितसमरदर्पोद्धुरकन्धरराजनन्दनाः ॥ ५७ ॥

---

१. नयण रं० । २. शास्त्रविशेषः ।

सुहडा परिफुरंतरणदुज्जयविक्कमबाहुपंजरा, संचलिय करालकरवालवियारियमत्तकुंजरा ।
कियअन्नोन्नबहलहलबोलसमाउलभुवणकंदरं, दलमब्भिट्टु समरि उद्धाइय पडिभडसुहडसुंदरं ॥५८॥
अब्भिट्ट गएहिं गया तुरया तुरएहिं रहवरेहिं रहा । सुहडा सुहडेहिं समं अन्नोन्नसमच्छरं जाव ॥५९॥
तत्तो दवदंतीए कंचणकलसं करेण जलभरियं । गिण्हित्ता उल्लवियं निव्वुइदेविं मणे काउं ॥६०॥
जइ हं जिणपवयणऽनन्नमाणसा निच्चला य सम्मत्ते । तो दोण्ह वि कुमरबलाणमुवसमं कुणसु तं देवि ॥६१॥
इय जंपिऊण तत्तो चुलुयतिगं कणयकलससलिलस्स । उभयबलेसुं पक्खिवइ जाव नवकारपुव्व-न्ति ॥६२॥
उवसमियवइरभावो कन्हडदेवो समागओ ताव । उम्मुक्कमंडलग्गो आसन्नं नलकुमारस्स ॥६३॥
चलणेसु निवडिऊणं आबद्धकरंजली भणइ एवं । सप्पुरिस ! मेऽवराहं खमसु तुमं जो कओ पुव्विं ॥६४॥
अज्जप्पभिइं तं मज्झ सामिओ किंकरो अहं तुज्झ । तं दट्ठूणं चरियं रायाणो विम्हिया सव्वे ॥६५॥
खणमेत्तं जा चिट्ठइ नरनाहो सिद्धपुत्तओ तत्थ । विमलो विमलसहावो आगंतुं सो इमं भणइ ॥६६॥
देव ! इमा दवदंतीपाणिग्गहणस्स वट्टए वेला । तो वच्च वेइयाए वीसत्थो एत्थ मा चिट्ठ ॥६७॥
निस्सेसजणो मिलिओ दोण्ह वि पक्खाण वेइयाए तहिं । वित्तं पाणिग्गहणं दिन्नं कुमरस्स नरवइणा ॥६८॥
दंतिसहस्सं पढमम्मि मंगले बीयए तुरयलक्खं । तइए सुवन्नकोडी तुरिए पट्टउलकोडिसयं ॥६९॥
धरिओ दस दिवसाइं कुमरो आबद्धकंकणो रन्ना । सम्माणिऊण अन्ने विसज्जिया निययदेसेसु ॥७०॥

---

सुभटाः परिस्फुरद्रणदुर्जयविक्रमबाहुपञ्जराः, सच्चलितकरालकरवालविदारितमत्तकुञ्जराः ।
कृतान्योन्यबहलसम्भ्रमसमाकुलभुवनकन्दरम्, दलं प्रवृत्तं समरोद्धातितप्रतिभटसुभटसुन्दरम् ॥ ५८ ॥
प्रवृत्ता गजैर्गजास्तुरगास्तुरगै रथवरै रथाः । सुभटाः सुभटैः सममन्योन्यसमत्सरं यावत् ॥ ५९ ॥
ततो दवदन्त्या कञ्चनकलशं करेण जलभृतम् । गृहीत्वोल्लपितं निर्वृत्तिदेवीं मनसि कृत्वा ॥ ६० ॥
यद्यहं जिनप्रवचनानन्यमानसा निश्चला च सम्यक्त्वे । तदा द्वयोरपि कुमारबलानामुपशमं कुरु त्वं देवि ! ॥ ६१ ॥
इति जल्पित्वा ततश्चुलुकत्रिकं कनककलशसलिलंस्तत्र । उभयबले प्रक्षिपति यावन्नवकारपूर्वमिति ॥ ६२ ॥
उपशमितवैरभावः कर्णाटदेवः समागतस्तावद् । उन्मुक्तमण्डलाग्र आसन्नं नलकुमारस्य ॥ ६३ ॥
चरणयोर्निपत्याबद्धकराञ्जलिं भणत्येवम् । सत्पुरुष ! मेऽपराधं क्षमस्व त्वं यः कृत पूर्वे ॥ ६४ ॥
अद्यप्रभृति त्वं मम स्वामी किङ्करोऽहं तव । तं दृष्ट्वा चरितं राजानो विस्मिताः सर्वे ॥ ६५ ॥
क्षणमात्रं यावत्तिष्ठति नरनाथः सिद्धपुत्रकस्तत्र । विमलो विमलस्वभाव आगत्य स इदं भणति ॥ ६६ ॥
देव ! इमा दवदन्तीपाणिग्रहणस्य वर्तते वेला । ततो गच्छ वेदिकायां विश्वस्तोऽत्र मा तिष्ठ ॥ ६७ ॥
निःशेषजनो मिलितो द्वयोरपि पक्षयो र्वेदिकायां तत्र । वृत्तं पाणिग्रहणं दत्तं कुमाराय नरपतिना ॥ ६८ ॥
दन्तिसहस्रं प्रथमे मङ्गले द्वितीये तुरगलक्षम् । तृतीये सुवर्णकोटिश्चतुर्थे पट्टकुलकोटिशतम् ॥ ६९ ॥
धृतो दशदिवसानि कुमार आबद्धकङ्कणो राज्ञा । सन्मान्यान्या विसर्जिता निजकदेशेषु ॥ ७० ॥

**अह वासरे पसत्थे जोकारेऊण ससुरवग्गं सो । दवदंतीए सहिओ संचलिओ नियपुराभिमुहं ॥७१॥**

**नलकुमारो सह पिउणा कुव्वंतो बलभरेण भूमितलं । विसमं पि समं असमं जलपूरेणेव जलरासी ॥७२॥**

**अणवरयपयाणेहिं संपत्तो कोसलाए नयरीए । चउरंगबलसमेओ दिन्नावासो य उज्जाणे ॥७३॥**

**तत्तो सोहणदिवसे दइयाए समं रहे समारूढो । अइगरुयविभूईए पविसइ जा निवइमग्गेण ॥७४॥**

**हल्लप्फलेण धावइ रमणियणो मिहुणमुस्सुओ दट्ठुं । हरिसाऊरियदेहो पयडियअन्नन्न[१]वावारो ॥७५॥**

**तथा हि-**

**अबला वियरइ एक्का अहरदले कज्जलं पवालनिभं । नयणजुयलम्मि अन्ना लायइ आलत्तयं रहसा ॥७६॥**

**अवरा बंधइ मुद्धा नियंबबिंबम्मि तारहारलयं । पक्खिवइ का वि कंठे रसणादामं सुवन्नमयं ॥७७॥**

**कलसिंजियरमणीयं पक्खिवइ करम्मि नेउरं का वि । फुरियमणिकिरणकंकणमवरा पायम्मि पक्खिवइ ॥७८॥**

**कडियलकयमज्जारा पुत्तं मोत्तुं विणिग्गया का वि । दरलिहियसहियसुहपत्तवल्लिया चल्लिया अवरा ॥७९॥**

**दरल्हसियपडियसंवरियपरिहणग्गहणवावडकरग्गा । अइरभसगमणकंपिरथण[२]वट्टलुलंतहारलया ॥८०॥**

**ओसरसु मज्झ पुरओ त्ति का वि कलहंतिया व णिक्खंता । पेल्लंती थणवट्टेण पहिजणं[३] का वि संचलिया ॥८१॥**

**रमणीओ रमणियणो परिचत्तसमग्गनिययवावारो । संपत्तो रायपहम्मि पभणए एवमन्नोन्नं ॥८२॥**

---

अथ वासरे प्रशस्ते जोत्कार्य श्वसुरवर्गं स: । दवदन्त्या सहित: सञ्चलितो निजपुराभिमुखम् ॥ ७१ ॥

नलकुमार: सह पित्रा कुर्वन्बलभरेण भूमितलम् । विसममपि सममसमं जलपूरेणेव जलराशि: ॥ ७२ ॥

अनवरतप्रयाणै: सम्प्राप्त: कोशलायां नगर्याम् । चतुरङ्गबलसमेतो दत्तावासश्चोद्याने ॥ ७३ ॥

तत: शोभनदिवसे दयितया समं रथे समारुढ: । अतिगुरुकविभूत्या प्रविशति यावन्नृपति मार्गेण ॥ ७४ ॥

औत्सुक्येन धावति रमणिजनो मिथुनमुत्सुको द्रष्टुम् । हर्षापूरितदेह: प्रकटितान्योन्यव्यापार: ॥ ७५ ॥

तथा हि -

अबला विरचयत्येकाऽधरदले कज्जलं प्रवालनिभे । नयनयुगलेऽन्या लिखत्यालक्तकं सहसा ॥ ७६ ॥

अपरा बध्नाति मुग्धा नितम्बबिम्बे तारहारलताम् । प्रक्षिपति काऽपि कण्ठे रसनादाम सुवर्णमयाम् ॥ ७७ ॥

कलशि[४]ञ्जितरमणीयं प्रक्षिपति करे नपुरं कापि । स्फुरितमणिकिरणकङ्कणमपरा पादे प्रक्षिपति ॥ ७८ ॥

कटितलकृतमार्जारा पुत्रं मुक्त्वा विनिर्गता कापि । ईषल्लिखितसखीसुखपत्रवल्लिकाचलितापरा ॥ ७९ ॥

ईषत्स्रंसितपतितसंवरितपरिधानग्रहणव्यापृतकराग्रा । अतिरभसगमनकम्पमानत्स्तनपट्टलुलद्धारलता ॥ ८० ॥

अपसर मम पुरत इति काऽपि कलहन्तीव निष्क्रान्ता । पीडन्ती स्तनपृष्टेन पथिजनं कापि सञ्चलिता ॥ ८१ ॥

रमणीयो रमणीजन: परित्यक्तसमग्रनिजकव्यापार: । सम्प्राप्तो राजपथि प्रभणत्यन्योन्यम् ॥ ८२ ॥

---

१. अन्नोन्न० रं० ॥ २. वट्टलुलंत० रं० ॥ ३. वट्टेण रं० ॥ ४. अस्फुट अवाज भाषायाम् ।

**धन्नो जए कुमारो जस्सेसा निवसुया लवणिमाए । उवहसियतियसमहिला महिलासद्दं समुव्वहइ ॥८३॥**
**एएसिं संजोगं अन्नोन्नमनन्नरूवसाराणं । कुव्वंतेणं विहियं चंगं भुवणे पयावइणा ॥८४॥**
**वीइज्जंतो वत्थंचलेहिमसरिसथुईहिं थुव्वंतो । झाइज्जंतो चित्तेण परममन्तो व्व रमणीहिं ॥८५॥**
**पिज्जंतो गुरुनयणंजलीहि सवणोयरे ( हि ) सुव्वंतो । दंसिज्जंतो अंगुलिसएहिं चरिएहिं गिज्जंतो ॥८६॥**
**पेच्छिज्जंतो सुमणोरहेहिं हियएहिं संभरिज्जंतो । अणुगमंतो संतो संपत्तो रायभवणम्मि ॥८७॥**
**संसारियविसयसुहं तिवग्गसारं समं पिययमाए । भुंजंतस्स कुमारस्स कोइ कालो अइक्कंतो ॥८८॥**
**अन्नम्मि दिणे पुहईसरेण पव्वइउमुज्जमंतेण । संसारविरत्तेणं आपुच्छित्ता समंतियणं ॥८९॥**
**रज्जाहिसेयपुव्वं निक्खित्तो नल कुमारबाहुम्मि । भुयदंडकंकणसमो समग्गविस्संभराभारो ॥९०॥**
**परिहरिय रायलच्छि सयं पुणो पालिऊण पव्वज्जं । नरनाहो सुहचित्तो संपत्तो देवलोगम्मि ॥९१॥**
**संजाओ पुहइवई सुरो सुरो व्व अखलियपयावो । रिवुवंसदाहदावानलोवमो नलकुमारो वि ॥९२॥**
**सोमत्तणेण ससिणा फुरियपयावत्तणेण दिणमणिणा । सेविज्जइ तस्स तणू धणवइणा धणनिहित्तेण ॥९३॥**
**जे न वि सिद्धा तप्पुव्वयाणमिह पत्थिवा अइदुगेज्झा । समरे निज्जिणिऊणं नियआणं कारिया ते वि ॥९४॥**
**सव्वगुणाणं निलयस्स पणइकमलायरस्स दिणमणिणो । परमत्थि जूयदोसो अहवा सव्वे गुणा दुलहा ॥९५॥**
**जुवरन्ना कुब्बरभाउणा समं रमइ निच्चमक्खेहिं । परिहरियरज्जकज्जो दुरोदरव्वसणरसियमणो ॥९६॥**

---

धन्यो जगतिकुमारो यस्यैषा नृपसुता लवणिमया । उपहसितत्रिदशमहिला महिलाशब्दं समुद्वहति ॥ ८३ ॥
अनयोः संयोगमन्योन्यरुपसारयोः । कुर्वता विहितं सुन्दरं भुवने प्रजापतिना ॥ ८४ ॥
वीज्यमानो वस्त्रांऽचलैरसदृशस्तुतिभिस्स्तुयमानो । ध्यायमानश्चित्तेन परममन्त्र इव रमणिभिः ॥ ८५ ॥
पीयमानोगुरुनयनाञ्जलिभिः श्रवणोदरैःश्रूयमानः । दर्श्यमाणोङ्गुलिशतैश्चरित्रैर्गीयमानः ॥ ८६ ॥
प्रेक्ष्यमानःसुमनोरथै र्हृदयैः स्मर्यमाणः । अनुगच्छन् सन् संप्राप्तो राजभवने ॥ ८७ ॥
सांसारिकविषयसुखं त्रिवर्गसारं समं प्रियतमया । भुनक्तः कुमारस्य कोऽपि कालोऽतिक्रान्तः ॥ ८८ ॥
अन्यस्मिन् दिने पृथिवीश्वरेण प्रव्रजितुमुद्यमता । संसारविरक्तेनापृच्छ्य समन्त्रिजनम् ॥ ८९ ॥
राज्याभिषेकपूर्वं निक्षिप्तो नलकुमारबाहौ । भुजदण्डकङ्कणसमः समग्रविश्वंभराभारः ॥ ९० ॥
परिहृतराजलक्ष्मीं स्वयं पुनः पालयित्वा प्रव्रज्याम् । नरनाथः शुभचितः संप्राप्तो देवलोके ॥ ९१ ॥
सञ्जातः पृथिवीपती शूर सूर्य इवास्खलितप्रतापः । रिपुवंशदाहदावानलोपमो नलकुमारोऽपि ॥ ९२ ॥
सौम्यत्वेन शशिना स्फुरितप्रतापत्वेन दिनमणिना । सेव्यते तस्य तनू र्धनपतिना धननिधित्वेन ॥ ९३ ॥
ये नापि सिद्धास्तत्पूर्वजानामिह पार्थिवा अतिदुर्ग्राह्याः । समरे निर्जित्य निजाज्ञां कारितास्तेऽपि ॥ ९४ ॥
सर्वगुणानां निलयस्य प्रणतिकमलाकरस्य दिनमणेः । परमस्ति द्युतदोषोऽथवा सर्वे गुणा दुर्लभाः ॥ ९५ ॥
युवराज्ञा कुबरभ्रात्रा समं रमते नित्यमक्षैः । परिहृतराज्यकार्यो द्युतव्यसनरसिकमनाः ॥ ९६ ॥

पइदिवसं कीलंतेण हारियं तेण सयलमहिवलयं । रज्जं रसाऽवरोहं चउरंगबलं सकोट्ठारं ॥९७॥
किं बहुणा ? निवसणयं मोत्तुं सव्वं पि हारियं अन्नं । जाव न थक्कइ तह वि हु तो भणियं कुब्बरेण इमं ॥९८॥
भो भो निवमंतियणा ! पच्चक्खं तुम्ह निज्जिओ एसो । जूएणमिमं भणिउं निस्सारेउं समाढत्तो ॥९९॥
चिंतइ मंतिवग्गो सबंधवाओ वि पाणिणो एत्थ । जूयवसणम्मि गिद्धा किं दुक्खं जं न पावंति ? ॥१००॥
अत्थविणासं नियकुलकलंकणं सयण-मित्तनासं च । माणमलणं पि पावंति पाणिणो जूयवसणेण ॥१०१॥
पावंति बंधणं गोत्ति[१]गोयरं भाररोवणं सिरसा । किं जंपिएण बहुणा ? अवि कत्तणमुत्तमंगस्स ॥१०२॥
कज्जाऽकज्जं न मुणंति नेयऽवेक्खंति दुक्खरिंछोलिं । जह मम कएण इमिणा होहि त्ति अणत्थपत्थारी ॥१०३॥
एसो वि महाराया समग्गनरनाहनमियपयकमलो । सव्वगुणाण निवासो अणन्नासामन्नवलकलिओ ॥१०४॥
रज्जाओ पब्भट्ठो जस्स पसाएण मलियमाहप्पो । दोससहस्सनिवासं ता धिद्धीधी ! इमं वसणं ॥१०५॥
नियबंधुणो वि जेणं कुणंति सत्तुत्तणं निरवसेसं । वज्जियकज्जाऽकज्जा ता धिद्धीधी ! इमं वसणं ॥१०६॥
गुरुदुहतरुणो वीयं सयलअणत्थाण मंदिरं विउलं । कुलकित्तिविणासकरं ता धिद्धीधी ! इमं वसणं ॥१०७॥
गुरुदारं नरयपुरस्स सच्चनलिणीवणस्स हिमपडणं । निस्सेसदोसगेहं ता धिद्धीधी ! इमं वसणं ॥१०८॥
इह-परलोयविरुद्धे अणत्थहेउम्मि को रमेज्ज इहं ? । इय नाउं सविवेया जूयस्स परम्मूहा जाया ॥१०९॥

---

प्रतिदिवसं क्रीडता हारितं तेन सकलमहिवलयम् । राज्यं रसावरोधं चतुरङ्गबलं सकोष्ठागारम् ॥ ९७ ॥
किं बहुना ? निवसनं मुक्त्वा सर्वमपि हारितमन्यत् । यावन्न* तिष्ठति तथापि खलु तदा भणितं कुबेरेणेदम् ॥९८ ॥
भो भो ! नृपमन्त्रिजना ! प्रत्यक्षं युष्माकं निर्जित एषः । द्युतेनेदं भणित्वा निसारितुं समारब्धः ॥ ९९ ॥
चिन्तयति मन्त्रिवर्गो सबान्धवा अपि प्राणिनोऽत्र । द्युतव्यसने गृद्धा किं दुःखं यन्न प्राप्नुवन्ति ? ॥ १०० ॥
अर्थविनाशं निजकुलकलङ्कनं स्वजनमित्रनाशं च । मानमलनमपि प्राप्नुवन्ति प्राणिनो द्युतव्यसनेन ॥ १०१ ॥
प्राप्नुवन्ति बन्धनं योक्त्रीगोचरं भाररोपणं शिरसा । किं जल्पितेन बहुना ? अपि कर्तनमुत्तमाङ्गस्य ॥ १०२ ॥
कार्याकार्यं न मुणन्ति नैवापेक्षन्ते दुःखपङ्क्तिम् । यथा मम कृतेनानेन भविष्यतीत्यनर्थप्रस्तारी ॥ १०३ ॥
एषोऽपि महाराजा समग्रनरनाथनमतपदकमलः । सर्वगुणानां निवासोऽनन्यसामान्यबलकलितः ॥ १०४ ॥
राज्यात्प्रभ्रष्टो यस्य प्रसादेन मलितमाहात्म्यः । दोषसहस्रनिवासं ततो धिग्धिगिदं व्यसनम् ॥ १०५ ॥
निजबन्धोरपि येन कुर्वन्ति शत्रुत्वं निरवशेषम् । वर्जितकार्याकार्यास्ततो धिग्धिगिदं व्यसनम् ॥ १०६ ॥
गुरुदुःखतरो बीजं सकलानर्थानां मन्दिरं विपुलम् । कुलकीर्त्तिविनाशकर ततो धिग्धिगिदं व्यसनम् ॥ १०७ ॥
गुरुद्वारं नरकपुरस्य सत्यनलिनीवनस्य हिमपतनम् । निःशेषदोषगृहं ततो धिग्धिगिदं व्यसनम् ॥ १०८ ॥
इह-परलोकविरुद्धेऽनर्थहेतौ को रमेतेह ? । इति ज्ञात्वा सविवेका द्युतस्य पराङ्मुखा जाताः ॥ १०९ ॥

---

*थक्कइ (दे.) (स्था) सि.हे.सू. ४/१६ तिष्ठति । १. गोत्ति (दे.) योक्त्री - 'धुंसरी' भाषायाम् ।

**नलनरनाहो वि तओ निवलच्छीमुज्झिऊण नीहरिओ । तयणु पयट्टा गंतुं दवदंती जाव तेण समं ॥११०॥**

**ता कुब्बरेण धरिया जूएणं हारिय त्ति कलिऊणं । जंपइ तो मंतिजणो मा मा असमंजसं कुणसु ॥१११॥**

**सीमा महासईणं ति तुज्झ जणणि त्ति सामिणि त्तिऽम्हं । पाणप्पिय त्ति रन्नो न हु जुत्तं तेणिमं धरिउं ॥११२॥**

**अन्नं च-**

**जोन्ह व्व चंदविरहे जलहरविरहे तडिल्लयसिरि व्व । चंदणतरुविरहे तल्लय व्व जाल व्व सिहिविरहे ॥११३॥**

**छाय व्व वच्छविरहे दिणयरविरहम्मि दिवसलच्छि व्व । वेल व्व जलहिविरहे सुह-दुहपंति व्व जियविरहे ॥११४॥**

**रिद्धि व्व पुन्नविरहे सुरगिरिविरहम्मि तस्स चूल व्व । घणसंगयगयणंगणविरहे हरिचावजट्ठि व्व ॥११५॥**

**पाणप्पियस्स मणवल्लहस्स विरहम्मि नलनरिंदस्स । खणमेत्तं पि न चिट्ठइ एसा वि महासई एत्थ ॥११६॥**

**सम्माणिऊण वत्थाइएहिं अवराहमवि खमावेउं । तत्तो इमं विसज्जसु तयणुवरोहेण एवं ति ॥११७॥**

**काऊण तयं सव्वं करुणाए समप्पिओ रहो एक्को । सो वि निसिद्धो रन्ना पउरजणो भणइ तो एवं ॥११८॥**

**विसमो मग्गो नरनाह ! कह णु चरणेहिं तरसि तं गंतुं ? । देवी सिरीससुकुमालतणुलया कह णु वच्चिहिही ? ॥११९॥**

**तम्हा गिण्हसु सामिय ! महापसायं करित्तु रहमेगं । उवरोहेणं नायरजणस्स तो रहवरारूढो ॥१२०॥**

**चंदो इव जोण्हाए फुरियपहाए सहस्सकिरिणो व्व । सुरनाहो व्व सईए लच्छीए वासुदेवो व्व ॥१२१॥**

**गउरीए वामदेवो व्व कामदेवो व्व कामघरिणीए । अमरकरि व्व वसाए हंसीए रायहंसो व्व ॥१२२॥**

---

नलनरनाथोऽपि ततो नृपलक्ष्मीमुज्झित्वा निस्सृतः । तदनु प्रवृत्ता गन्तुं दवदन्ती यावत्तेन समम् ॥ ११० ॥

तावत्कुबेरेण धृता द्युतेन हरितेति कलित्वा । जल्पति तदा मन्त्रिजनो मा माऽसमञ्जसं कुरु ? ॥ १११ ॥

सीमा महासतीनामिति तव जननीति स्वामीनीत्यस्माकम् । प्राणप्रियेति राज्ञो न खलु युक्तं तेनेमं धर्तुम् ॥ ११२ ॥

ज्योत्स्नेव चन्द्रविरहे जलधरविरहे तडिल्लताश्रीरिव । चन्द्रनतरुविरहे तल्लतेव ज्वालेव शिखिविरहे ॥ ११३ ॥

छायेव वृक्षविरहे दिनकरविरहे दिवसलक्ष्मीरिव । वेलेव जलधिविरहे सुखदुःखपङ्क्तिरिव जीवविरहे ॥ ११४ ॥

ऋद्धिरिव पुण्यविरहे सुरगिरिविरहे तस्य चूलैव । घनसङ्गतगगनाङ्गणविरहे हरिचापयष्टिरिव ॥ ११५ ॥

प्राणप्रियस्य मनोवल्लभस्य विरहे नलनरेन्द्रस्य । क्षणमात्रमपि न तिष्ठत्येषापि महासत्यत्र ॥ ११६ ॥

सन्मान्य वस्त्रादिभिरपराधमपि क्षामयित्वा । तत इमां विसर्जय तदनुपरोधेनैवमिति ॥ ११७ ॥

कृत्वा तकं सर्वं करुणया समर्पितो रथ एकः । सोऽपि निषिद्धो राज्ञा पौरजनो भणति तत एवम् ॥ ११८ ॥

विषमो मार्गो नरनाथ ! कथं नु चरणैशक्नोषि त्वं गन्तुम् ? । देवी शिरीषसुकुमालतनुलता कथं नु व्रजिष्यति ? ॥११९॥

तस्माद्गृहाण स्वामिन् ! । महाप्रसादं कृत्वा रथमेकम् । उपरोधेण नागरजनस्य ततो रथवरारूढः ॥ १२० ॥

चन्द्र इवज्योत्स्नया स्फुरितप्रभया सहस्रकिरण इव । सुरनाथ इव शच्या लक्ष्म्या वासुदेव इव ॥ १२१ ॥

गौर्या वामदेव इव कामदेव इव कामगृहिण्या । अमरकरीव वसया हंसया राजहंस इव ॥ १२२ ॥

गच्छंतो देवीए समं सकामाहिं नयणबाणेहिं । भिज्जंतो सव्वंगं नायरजणतरुणरमणीहिं ॥१२३॥
संपत्तो य कमेणं नयरीमज्झे अभिन्नमुहराओ । तम्मि पएसे दिट्ठो अइप्पमाणो महाथंभो ॥१२४॥
उत्तरिऊण रहाओ लीलाए चालिओ जणसमक्खं । जो पुरिससहस्सेण वि न तीरए चालिउं कह वि ॥१२५॥
उप्पाडियम्मि तम्मि तो पउरजणस्स पच्चओ जाओ । एसो होही भरहद्धसामिओ नमियसेसनिवो ॥१२६॥
एयस्स बालभावे उज्जाणगयस्स सह नरिंदेण । पुच्छावसरे चउनाणसूरिणा कहियमेयं ति ॥१२७॥
जो नयरीमज्झगयं थंमं उप्पाडिउं[१] पुणो ठविही । सो भरहद्धनरिन्दो होहि त्ति न एत्थ संदेहो ॥१२८॥
तोऽवस्सं एसो च्चिय होही तिक्खंडसामिओ जम्हा । मिलिओऽम्ह पच्चओ सो वयणं च न अन्नहा मुणिणो ॥१२९॥
इय वयणं निसुणंतो पत्तो य पुरीए परिसरपएसे । वेयब्भविसयसमुहो संचलिओ साहससहाओ ॥१३०॥
वणवासं वच्चंते नलम्मि नयरी पउत्थवइय व्व । पवसियजण व्व निज्जायसयलसोह व्व संजाया ॥१३१॥
परिहरियसमग्गाराममविविहकीलाविलासवावारा । उवरयविवित्तचच्चर-चउक्क-चउमूहजहिच्छकहा ॥१३२॥
विरमंतमंजुसिंजियमद्दलरवमुहलपेच्छणच्छणया । विणिवत्तियवेयालियसुललियकव्वाभिलासा य ॥१३३॥
अक्कीलिय व्व घडिय व्व चित्तलिहिय व्व कट्ठमइय व्व । अवहरियरयणसार व्व तह य सुन्न व्व वुन्न व्व ॥१३४॥
झाणट्ठिय व्व मोणट्ठिय व्व चिट्ठइ मणम्मि झायंती । मोक्खं व नलं गुरुदुक्खवारणं मुणिजणो व्व सया ॥१३५॥

---

गच्छन्देव्यासमं सकामैर्नयनबाणैः । भिद्यमानसर्वाङ्गं नागरजनतरुणरमणिभिः ॥ १२३ ॥
संप्राप्तश्च क्रमेण नगरीमध्ये अभिन्नमुखरागः । तस्मिन्प्रदेशे दृष्टोऽतिप्रमाणो महास्तम्भः ॥ १२४ ॥
उत्तीर्य रथाल्लीलया चालितो जनसमक्षम् । यः पुरुषसहस्रेणापि न शक्यते चालयितुं कथमपि ॥ १२५ ॥
उत्पातिते तस्मिंस्ततः पौरजनस्य प्रत्ययो जातः । एष भविष्यति भरतार्धस्वामी नतशेषनृपः ॥ १२६ ॥
एतस्य बालभाव उद्यानगतस्य सह नरेन्द्रेण । पृच्छावसरे चतुर्ज्ञानसूरिणा कथितमेवमिति ॥ १२७ ॥
यो नगरीमध्यगतं स्तम्भमुत्पाट्य पुनःस्थाप्यसि । स भरतार्धनरेन्द्रो भविष्यतीति नात्रसन्देहः ॥ १२८ ॥
ततोऽवश्यमेष भविष्यति त्रिखण्डस्वामी यस्मात् । मिलितोऽस्माकं प्रत्यय स वचनं नान्यथा मुनेः ॥ १२९ ॥
इदं वचनं निश्रुण्वन् प्राप्तश्च पूर्याः परिसरप्रदेशे । विदर्भविषयसंमुखः सञ्चलितः साहससहायः ॥ १३० ॥
वनवासं व्रजति नले नगरी प्रौषितपतिकेव । प्रोषितजन इव निर्यातसकलशोभैव सञ्जाता ॥ १३१ ॥
परिहृतसमग्रारामविविधक्रीडाविलासव्यापारा । उपरतविविक्तचर्चर-चतुष्क-चतुर्मुखयथेच्छकथा ॥ १३२ ॥
विरमन्मञ्जुशिञ्जितमर्दलरवमुखरप्रेक्षणक्षणदा । विनिवर्तितवैकालिकसुललितकाव्याभिलाषा च ॥ १३३ ॥
उत्कीलितेव घटितेव चित्रलिखितेव काष्टमयीव । अपहृतरत्नसारेव तथा च शून्येव दुःखितेव ॥ १३४ ॥
ध्यानस्थितेव मौनस्थितेव तिष्ठति मनसि ध्यायन्ती । मोक्षमिव नलं गुरुदुःखवारणं मुनिजन इव सदा ॥ १३५ ॥

---

१. उप्पाडियं-रं ।

**अन्नं च-**

**ससहररहिया रयणि व्व गयणमुत्ति व्व विगयरविबिंबा । सुत्ति व्व गलियमुत्ता गयहंसउला सुरसरि व्व ॥१३६॥**

**सरसि व्व कमलमुक्का सुरपरिचत्ता विमाणलच्छि व्व । परिगलियजोव्वणा कामिणि व्व सेण व्व निवरहिया ॥१३७॥**

**उप्पाडियकप्पतरु व्व वाडिया चुयमणि व्व हत्थलया । नलनिवरहिया नयरी न सोहए गुणसमग्गा वि ॥१३८॥**

**नलराया वि वयंतो वेयब्भपहेण अडविमइभीमं । पत्तो य तत्थ भिल्ला समुट्ठिया सत्थवग्गकरा ॥१३९॥**

**रे रे ! गिण्हह गिण्हह इय जंपंते नलो वि ते दट्ठुं । दवदंति-खग्गसहिओ ओयरिउं रहवराओ ठिओ ॥१४०॥**

**जा जुज्झिउं पवत्तो ता दवदंती विमुक्कहुंकारा । जंपइ सीलपहावा मह हुंतु इमे हयपयावा ॥१४१॥**

**नट्ठा उत्तट्ठमणा ते भिल्ला रहवरं गहेऊण । राया देवीए समं पाएहिं गंतुमारद्धो ॥१४२॥**

**निट्ठुर खोणियलेऽदब्भदब्भसूईहि भिन्नचरणा सा । अंगम्मि अमायंतं रुहरिमिसा वमइ निवरायं ॥१४३॥**

**किच्छेणं गच्छंती वच्छच्छायाए सुइरमच्छंती । तह गंतुमणिच्छंती पेच्छंती रिच्छरिंछोलिं ॥१४४॥**

**तो गंतुमचायंती नेइ नलो करयलम्मि धरिऊणं । पुरिस्स दुक्खहेऊ सव्वावत्थासु जं नारी ॥१४५॥**

**उवरिं तवेइ सूरो हेट्ठा धरणी मणम्मि संतावो । वच्चंति जत्थ व खणमेत्तसुहं न पावंति ॥१४६॥**

**एत्थंतरम्मि मित्तो तेसिं दट्ठूणमावइं पउरं । मित्तत्तमकुणमाणो लज्जाए अदंसणं पत्तो ॥१४७॥**

**अह पत्थियम्मि कत्थइ रविसिंहे गयणकाणणं मोत्तुं । अप्फुन्नं भवणवणं तमिस्सगयरायवंद्रेहिं ॥१४८॥**

---

अन्यच्च -

शशधररहिता रजनीव गगनमूर्तिरिव विगतरविबिम्बा । शुक्तिरिव गलितमुक्ता गतहंसकुला सुरसरिदिव ॥ १३६ ॥

सर इव कमलमुक्ता सुरपरित्यक्ता विमानलक्ष्मीरिव । परिगलितयौवना कामिनीव सेनेव नृपरहिता ॥ १३७ ॥

उत्क्षिप्तकल्पतरुरिव वाटिका च्युतमणिरिव हस्तलता । नलनृपरहिता नगरी न शोभते गुणसमग्रापि ॥ १३८ ॥

नलराजापि व्रजन्वैदर्भपथाटविमतिभीमाम् । प्राप्तश्च तत्र भिल्लाः समुत्थिताः शस्त्रव्यग्रकराः ॥ १३९ ॥

रे रे ! गृह्णीत गृह्णीतेति जल्पतो नलोऽपि तान्दृष्ट्वा । दवदन्तीखड्गसहितोऽवतीर्य रथवरात् स्थितः ॥ १४० ॥

यावद्योद्धुं प्रवृतस्तावद्दवदन्ती विमुक्तहुंकारा । जल्पति शीलप्रभावान्मम भवन्त्विमे हतप्रतापाः ॥ १४१ ॥

नष्टा उत्तार्थमनास्ते भिल्ला रथवरं गृहीत्वा । राजा देव्या समं पादैर्गन्तुमारब्धः ॥ १४२ ॥

निष्ठुरक्षोणितलेऽदर्भदर्भसुचिभि भिन्नचरणा सा । अङ्गेऽमायन्तं रुधिरमिषाद्वमति नृपरागम् ॥ १४३ ॥

कृच्छ्रेण गच्छन्ती वृक्षच्छायायां सुचिरमासीना । तथा गन्तुमनिच्छन्ती प्रेक्षमाणी ऋक्षपङ्क्तिम् ॥ १४४ ॥

ततो गन्तुमपार्यन्तीं नयति नलः करतले धृत्वा । पुरुषस्य दुःखहेतु सर्वावस्थासु यन्नारी ॥ १४५ ॥

उपरि तपति सूर्योऽधो धरणी मनसि सन्तापः । गच्छतो यत्र तत्र वा क्षणमात्रसुखं न प्राप्नुतः ॥ १४६ ॥

अत्रान्तरे मित्रस्तयो र्दृष्ट्वापत्तिं प्रचूराम् । मित्रत्वमक्रियमाणो लज्जयादर्शनं प्राप्तः ॥ १४७ ॥

अथ प्रस्थिते कुत्रचिद्रविसिंहे गगनकाननं मुक्तवा । आपूर्णं भवनवनं तमिस्रगजराजवृन्दैः ॥ १४८ ॥

**सप्पंतसप्प कीलंतकोलकुल-संचरंतमहिसेहिं । बहलतरं संजायं तमपडलं तह तमालेहिं ॥१४९॥**

**दुहसंतत्तो राया राएणं चेव निव्ववेयव्वो । इय चिंतिउं व राया समुग्गओ तं सुही काउं ॥१५०॥**

**गाहंतो गयणसरं तारागणकुमुयदंतुरमगाहं । रेहइ रयणीनाहो हरधवलो रायहंसो व्व ॥१५१॥**

**मग्गपरिस्समिएणं रन्ना तरुपल्लवेहिं रइयाए । सेज्जाए निसन्नेणं पयंपिया पिययमा एवं ॥१५२॥**

**सुवसु पिए ! तमिह जओ घणसावयभीसणं अरन्नमिमं । जग्गेमि जेण भणियं नत्थि भयं जग्गमाणस्स ॥१५३॥**

**इय जंपिय आयड्ढियखग्गकरो पहरए ठिओ राया । मग्गपरिस्समपरिसंतरुइरकोमलसरीरा य ॥१५४॥**

**रन्नो पावरणपडस्स पत्थरेऊण एगदेसम्मि । सुत्ता भीमरहसुया नलो वि अह चिंतिउं लग्गो ॥१५५॥**

**धिद्धी ! जूयव्वसणे धिरत्थु भोगाण जेसि कज्जम्मि । पुरिसो सहोयरम्मि वि सत्तुत्तेणं व ववहरइ ॥१५६॥**

**धन्ना ते जियलोए भरहनरिंदाइणो महासत्ता । जेहिं अगंजियमाणेहिं दो वऽवत्थाओ पत्ताओ ॥१५७॥**

**अणवज्जा रज्जसिरी पव्वज्जसिरी अणउत्तरा चेव । अम्हे पुणो अहन्ना चुक्का दोण्ह वि अवत्थाणं ॥१५८॥**

**सेवा अहिमाणधणस्स काउमिण्हिं न संगया मज्झ । पव्वज्जा वि न जुज्जइ विसयपिवासापरवसस्स ॥१५९॥**

**एयाए समं मज्झं परिब्भमंतस्स जायइ विणासो । एसा वि हु पाविस्सइ[1] मुक्का एगागिणी मरणं ॥१६०॥**

**अहवा महासईमिममुवद्दवेउं न सक्कए कोइ । नियसीलपहावेणं पभायसमयम्मि पडिवुद्धा ॥१६१॥**

---

सर्पत्सर्प-क्रीडत्कोलकुल-सञ्चरन्महिषैः । बहलतरं सञ्जातं तमःपटलं तथा तमालैः ॥ १४९ ॥

दुःखसंतप्तो राजा रागेण चैव निर्वाप्तव्यः । इति चिन्तयित्वैव राजा समुद्गतस्तं सुखी कर्तुम् ॥ १५० ॥

गाह्यङ्गगनसरस्तारागणकुमुददन्तुरमगाधम् । राजते रजनीनाथो हरधवलो राजहंस इव ॥ १५१ ॥

मार्गपरिश्रान्तेन राज्ञा तरुपल्लवै रचितायाम् । शय्यायां निषण्णेन प्रजल्पिता प्रियतमैवम् ॥ १५२ ॥

स्वपिहि प्रिये त्वमिह यतो घनश्वापदभीषणमरण्यमिदम् । जागर्मि येन भणितं नास्ति भयं जागर्यमाणस्य ॥ १५३ ॥

इति जल्पित्वाकृष्टखड्गकरः प्रहरिके स्थितो राजा । मार्गपरिश्रमपरिश्रान्तरुचिरकोमलशरीरा च ॥ १५४ ॥

राज्ञः प्रावरणपटस्य प्रस्तार्यैकदेशे । सुप्ता भीमरथसुता नलोऽप्यथ चिन्तयितुं लग्नः ॥ १५५ ॥

धिग्धिग्द्युतव्यसनं धिगस्तु भोगानां येषां कार्ये । पुरुषः सहोदरेऽपि शत्रुत्वेनेव व्यवहरति ॥ १५६ ॥

धन्यास्ते जीवलोके भरतनरेन्द्रादयो महासत्त्वाः । यैरखण्डितमानै द्वे एवावस्थे प्राप्ते ॥ १५७ ॥

अनवद्या राज्यश्रीः प्रव्रज्याश्रीरनुत्तरैव । वयं पुनरधन्या भ्रष्टा द्वाभ्यामप्यवस्थाभ्याम् ॥ १५८ ॥

सेवाऽभिमानधनस्य कर्तुमीदानीं न सङ्गता मम । प्रव्रज्यापि न युज्यते विषयपिपासापरवशस्य ॥ १५९ ॥

एतया समं मम परिभ्रमतो जायते विनाशः । एषापि खलु प्राप्स्यसि मुक्तैकाकिनी मरणम् ॥ १६० ॥

अथवा महासतीमिमामुपद्रोतुं न शक्यते कोपि । निजशीलप्रभावेन प्रभातसमये प्रतिबुद्धा ॥ १६१ ॥

---

१. इ धिरत्थु एगा-रं० ।

**एसा ममपेच्छंती सत्थं लद्धूण कं पि तेण समं । वच्चिस्सइ नियपिउणो भवणं एयाओ रन्नाओ ॥१६२॥**

**अहयं तु कम्मि वि पुरे गंतूणऽज्जेमि लच्छिविच्छड्डं । पुणरवि संगोविस्सं एयं माहप्पसंपत्तो ॥१६३॥**

**इय चिंतिऊण रन्ना अंगुलिरुहिरेण पडयपज्जंते । लिहियं गाहाजुयलं सम्मं ललियक्खरेहिमिमं ॥१६४॥**

**नग्गोहतरुतलेणं वेयब्भं वच्चए पहो एस । वामेण कोसलपुरिं जत्थिच्छा तत्थ गंतव्वं ॥१६५॥**

**अहयं वसणऽभिभूओ रज्जसिरीवज्जिओ नरिंदाण । सेवं काउमसत्तो तेण विएसम्मि वच्चामि ॥१६६॥**

**कड्ढिज्जंते वत्थे इमीए देहेण चंपिए सहसा । मा जग्गउ त्ति एसा छेत्तुं छुरियाए पडमद्धं ॥१६७॥**

**नीहरिओ तरुगहणं लंघंतो मम अजुत्तमेयं ति । भज्जामुयणं मन्ने चिंतेउमदंसणं पत्तो ॥१६८॥**

**अह वेयब्भनिवसुया पहायसमयम्मि विगयनिद्दा सा । नलरायमपेच्छंती धसक्किया उट्ठिया जाव ॥१६९॥**

**ता पेच्छइ पडयद्धं छुरियाछिन्नं तदेगदेसम्मि । रुहिरेण लिहियमेगं गाहाजुयलं च संभंता ॥१७०॥**

**तं घेत्तुं परिभावइ जाव तयत्थं मणम्मि जवजंती । मुच्छानिमीलियच्छी ता झत्ति महीयले पडिया ॥१७१॥**

**संपाविऊण कहमवि चेयन्नं सिसिरवाउणा तत्तो । कलुणसरेण पलावे सुदुक्खिया काउमारद्धा ॥१७२॥**

**हा नाह ! हिययवल्लह ! हा सामिय ! हा विसालवच्छयल ! । हा पिययम ! जंपंती निक्करुणं हणइ वच्छयलं ॥१७३॥**

**एगागिणीमहन्नं मोत्तुमणाहं गओ तुमं कत्थ ? । जीवामि नाह ! खणमवि नाहमरन्नम्मि तुह विरहे ॥१७४॥**

**जावऽज्ज वि न हु विदलइ हिययं मे सामि ! तुज्झ विरहम्मि । ता धरसु तमागंतुं तुरियं तं दुक्खियमणाए ॥१७५॥**

---

एषा मामपश्यन्ती सार्थं लब्ध्वा कमपि तेन समम् । व्रजिष्यति निजपितुर्भवनमेतस्मादरण्यात् ॥ १६२ ॥

अहं तु कस्मिन्नपि पुरे गत्वार्जयामि लक्ष्मीनिवहम् । पुनरपि सङ्गोपयिष्याम्येनां माहात्म्यसम्प्राप्तः ॥ १६३ ॥

इति चिन्तयित्वा राज्ञाङ्गुलिरुधिरेण पटकपर्यन्ते । लिखितं गाथायुगलं सम्यग्ललिताक्षरैरिदम् ॥ १६४ ॥

न्यग्रोधतरुतलेन वैदर्भं व्रजति पन्था एषः । वामेन कोशलापुरिं यत्रेच्छा तत्र गन्तव्यम् ॥ १६५ ॥

अहं व्यसनाभिभूतो राज्यश्रीवर्जितो नरेन्द्राणाम् । सेवां कर्तुमशक्तस्तेन विदेशे व्रजामि ॥ १६६ ॥

कृष्यमाणे वस्त्रे एतस्या देहेन लग्ने सहसा । मा जागर्त्विति एषा छित्वा छूरिकया पटमर्धम् ॥ १६७ ॥

निहृतस्तरुगहनं लङ्घयन्ममायुक्तमेतदिति । भार्यामोचनं मन्ये चिन्तयित्वादर्शनं प्राप्तः ॥ १६८ ॥

अथ वैदर्भनृपसुता प्रभातसमये विगतनिद्रा सा । नलराजामपश्यन्ती अतिभीतोत्थिता यावत् ॥ १६९ ॥

तावत्प्रेक्षते पटकार्द्धं छूरिकाच्छिन्नं तदेकदेशे । रुधिरेण लिखितमेकं गाथायुगलं च सम्भ्रान्ता ॥ १७० ॥

तद्गृहीत्वा परिभावयति यावत्तदर्थं मनसि दवदन्ती । मूर्च्छानिमिलिताक्षी तावच्छीघ्रं महितले पतिता ॥ १७१ ॥

सम्प्राप्य कथमपि चैतन्यं शिशिरवायुना ततः । करुणस्वरेण प्रलापान् सुदुःखिता कर्तुमारब्धा ॥ १७२ ॥

हा नाथ ! हृदयवल्लभ ! हा स्वामिन् ! हा विशालवक्षःस्थल ! । हा प्रियतम ! जल्पन्तीनिष्करुणं हन्ति वक्षः स्थलम् ॥१७३॥

एकाकिनीमधन्यां मुक्त्वानाथां गतस्त्वं कुत्र ? । जीवामि नाथ ! क्षणमपि नाहमरण्ये तव विरहे ॥ १७४ ॥

यावदद्यापि न खलु विदलति हृदयं मे स्वामिन् ! तव विरहे । ता धर तमागत्य त्वरितं त्वं दुःखितमनसः ॥१७५॥

इच्चाइ विलविऊणं चिंतइ चित्तम्मि कम्मि दिसिभाए। वच्चामि संपयमहं? पियभवणं[१]? अहव सासुरयं? ॥१७६॥
पइ-पुत्तविरहियाणं नारीणं दुसहदुक्खकलियाणं। मोत्तूण जणयभवणं विस्सामो नत्थि अन्नत्थ ॥१७७॥
इय चिंतिय दवदंती गंतुं लग्गा वियब्भदेसस्स। मग्गो जो दइएणं कहिओ गाहादुगेणं ति ॥१७८॥
सरिऊण पुणो पइणओ सिणेहसारं गुणाण पब्भारं। अइकलुणसरं रोयइ तत्तो अच्चंतदुहदुहिया ॥१७९॥
हा हा करुणासायर! हा सुहयसिणेह! हा महाधीर!। हा वीर! पुहइवच्छल! हा पिययम! कत्थ दीसिहसि? ॥१८०॥
पंथाओ पब्भट्ठा वच्चंती जणयदेसमडवीए। अलहंती तं मग्गं तत्थेव ठिया बहुं कालं ॥१८१॥
परिगलियसोयभावा अपुव्वपरिणामभावमणुपत्ता। चिंतइ मोहविनडिओ किं सरसि न जीव! अप्पाणं? ॥१८२॥
जत्तिय मेत्तो नेहो दुक्खाण गणो वि तत्तिओ चेव। ता दुक्खकारणम्मि पडिबंधो तत्थ को तुज्झ[२]? ॥१८३॥
केत्तियमेत्तं एयं इट्ठविओयस्स संतियं दुक्खं? जीवा पावंति अणुत्तराइं दुक्खाइं नरएसु ॥१८४॥
किं तुह दुक्खमपुव्वं संजायं जीव! जं समुव्वियसि?। पियसंजोगविओगा अणंतसो पत्तपुव्व त्ति ॥१८५॥
जं पुण अपत्तपुव्वं सम्मत्तं कप्पपायवऽब्भहियं। तं इण्हि संपत्तं ता पालसु तं चिय विसुद्धं ॥१८६॥
इय संठविय नियमणं गुहाए जिण-साहुवंदणुज्जुत्ता। जा चिट्ठइ ता कइया (वि) सुमरियं[३] जणणिजणयाणं ॥१८७॥
जइ कह वि हु पंथमहं लभामि रन्नम्मि सुत्थसत्थं वा। नियजणयगिहं गंतुं निव्वयहियया करेमि तवं ॥१८८॥

---

इत्यादि विलप्य चिन्तयति चित्ते कस्मिन् दिग्भागे। व्रजामि साम्प्रतमहं? पितृभवनमथवा श्वासुरकम्? ॥ १७६ ॥
पति-पुत्रविरहितानां नारीणां दुःसहदुःखकलितानाम्। मुक्त्वा जनकभवनं विश्रामो नास्त्यन्यत्र ॥ १७७ ॥
इति चिन्तयित्वा दवदन्ती गन्तुं लग्ना विदर्भदेशस्य। मार्गो यो दयितेन कथितो गाथाद्विकेनेति ॥ १७८ ॥
स्मृत्वा पुनः पत्युः स्नेहसारं गुणानां प्राग्भारम्। अतिकरुणस्वरं रोदिति ततोऽत्यन्तदुःखदुःखिता ॥ १७९ ॥
हा हा करुणासागर! हा सुभगस्नेह! हा महाधीर!। हा वीर! पृथिवीवत्सल! हा प्रियतम! कुत्र दर्शयिष्यसे? ॥१८०॥
पथात्प्रभ्रष्टा व्रजन्ती जनकदेशमटव्याम्। अलभमाना तं मार्गं तत्रैव स्थिता बहुकालम् ॥ १८१ ॥
परिगलितशोकभावापूर्वपरिणामभावमनुप्राप्ता। चिन्तयति मोहविनटितः किं स्मरसि न जीव! आत्मानम् ॥ १८२ ॥
यावन्मात्रः स्नेहो दुःखानां गणोऽपि तावत एव। ततो दुःखकारणे प्रतिबन्धस्तत्र कस्तव? ॥ १८३ ॥
कतिपयमात्रमेतदिष्टवियोगस्य सत्कं दुःखम्?। जीवा प्राप्नुवन्त्यनुत्तराणि दुःखानि नरकेषु ॥ १८४ ॥
किं तव दुःखमपूर्वं सञ्जातं जीव! समुद्वेयि[४]?। प्रियसंयोगवियोगा अनन्तशः प्राप्तपूर्वेति ॥ १८५ ॥
यत्पुनरप्राप्तपूर्वं सम्यक्त्वं कल्पपादपभ्यधिकम्। तमिदानीं सम्प्राप्तं ततः पालय तच्चैव विशुद्धम् ॥ १८६ ॥
इति संस्थाप्य निजमनो गुहायां जिन-साधुवन्दनोद्यता। यावत्तिष्ठति तावत्कदापि स्मृत्वा जननीजनकयोः ॥ १८७ ॥
यदि कथमपि खलु पन्थानमहं लभेऽरण्ये सुस्थसार्थं वा। निजजनकगृहं गत्वा निर्वृत्तहृदया करोमि तपः ॥ १८८ ॥

---

१. पिउभवणं रं० । २. जीव ! रं० । ३. सुमरिउं रं० । ४. खेद करना ।

**इय चिंतिय पुव्वदिसाभाए जा जाइ ताव संजाओ । उदयप्पयावसहिओ सूरो सुयणो व्व मज्झत्थो ॥१८९॥**
**दिणयरखरकिरणगलंतसेयबिंदू तमालमूलम्मि । निद्दं काऊण पुणो पडिबुद्धा जाव दवदंती ॥१९०॥**
**तह वि हु वच्छच्छाया तं मुत्तूणं न अन्नओ सरइ । पेच्छइ य दुट्ठसावयसमूहमह सम्मुहं इंतं ॥१९१॥**
**तं दट्ठुमखुहियमणा मणहरसद्देण भणिउमारद्धा । जइ मज्झ सीलरयणं अगंजियं ता इमे सव्वे ॥१९२॥**
**गच्छंतु नियावासं तं वयणं अमयसन्निहं सोउं । तिपयाहिणीकरेउं सट्ठाणं ते गया सिग्घं ॥१९३॥**
**पुणरवि सुत्तविउद्धा नियचलणं पेच्छए अयगरेण । अइकसिणदारुणेणं खज्जंतं भणइ तो एवं ॥१९४॥**
**भो भो निट्ठुर अइगर ! जइ होमि पइव्वया अहं लोए । ता मुयसु मं महाबल ! निस्सरणमरन्नमज्झम्मि ॥१९५॥**
**इय जंपिऊण हत्थेण आहओ मत्थए अयगरो सो । सीलस्स पहावेणं सो वि गओ सिग्घमन्नत्थ ॥१९६॥**
**अन्नतो वच्चंती पत्ता सीहेण जंपए एवं । सीह ! तए पत्ताए सरणं मे नत्थि किं पि इहं ॥१९७॥**
**मोत्तुण सीलरयणं ता जइ मणयं पि खंडियं एयं । ता खायसु ममम्हिं अह न वि तो वयसु सट्ठाणं ॥१९८॥**
**इय निसुणिऊण वयणं मुक्का हरिणा पयाहिणीकाउं । एवं हिंडंतीए पभूयकालो वइक्कंतो ॥१९९॥**
**नवरं कंदफलाइं आहारंतीए सयलमवि देहं । जाव विणट्ठं तत्तो मणम्मि सा चिंतए एवं ॥२००॥**
**गिण्हिस्सं जिणदिक्खं गंतुं किर जणयमंदिरं अइरा । इण्हिं पुण कहमेयं मज्झ सरीरं विणट्ठं ? ति ॥२०१॥**
**इहलोय-पारलोइयसुहाण ता वंचिया धुवं अहयं । पढमं सरीरमिह होइ साहणं जेण कज्जाणं ॥२०२॥**

---

इति चिन्तयित्वा पूर्वदिग्भागे यावद्याति तावत्सञ्जातः । उदयप्रतापसहितः सूर्यः सुजन इव मध्यस्थः ॥ १८९ ॥
दिनकरखरकिरणगलत्स्वेदबिन्दु तमालमूले । निद्रां कृत्वा पुनः प्रतिबुद्धा यावद्दवदन्ती ॥ १९० ॥
तथापि खलु वृक्षच्छाया तां मुक्त्वा नान्यतः सरति । पश्यति च दुष्टश्वापदसमूहमथ सम्मुखमेन्तम् ॥ १९१ ॥
तद्दृष्ट्वाक्षुब्धमना मनोहरशब्देन भणितुमारब्धा । यदि मम शीलरत्नमखण्डितं तदेमे सर्वे ॥ १९२ ॥
गच्छन्तु निजावासं तद्वचनममृतसन्निभं श्रुत्वा । त्रिःप्रदक्षिणीकृत्य स्वस्थानं ते गताःशीघ्रम् ॥ १९३ ॥
पुनरपि सुप्तविबुद्धा निजचरणं प्रेक्षतेऽजगरेण । अतिकृष्णदारुणेन खाद्यमानं भणति तत एवम् ॥ १९४ ॥
भो भो निष्ठुराजगर ! यदि भवामि प्रतिव्रताहं लोके । तदा मुञ्च मां महाबल ! निःशरणामरण्यमध्ये ॥ १९५ ॥
इति जल्पित्वा हस्तेनाहतो मस्तकेऽजगरः सः । शीलस्य प्रभावेन सोऽपि गतः शीघ्रमन्यत्र ॥ १९६ ॥
अन्यतो व्रजन्ती प्राप्ता सिंहेन जल्पत्येवम् । सिंह ! तव प्राप्तायाः शरणं मम नास्ति किमपीह ॥ १९७ ॥
मुक्त्वा शीलरत्नं ततो यदि मनागपि खण्डितमेतत् । तदा खाद मामेदानीमथ नापि तदा व्रज स्वस्थानम् ॥१९८॥
इति निश्रुत्य वचनं मुक्ता हरिणा प्रदक्षिणीकृत्य । एवं हिण्डन्त्याः प्रभूतकालो व्यतीक्रान्तः ॥ १९९ ॥
नवरं कन्दफलान्याहरन्त्याः सकलमपि देहम् । यावद्विनष्टं ततो मनसि सा चिन्तयत्येवम् ॥ २०० ॥
ग्रहिष्यामि जिनदिक्षां गत्वा किल जनकमन्दिरमचिरात् । ईदानीं पुनः कथमेतन्मम शरीरं विनष्टम् ? इति ॥ २०१ ॥
इहलोक-पारलौकिकसुखेभ्यस्तावद्वञ्चिता ध्रुवमहम् । प्रथमं शरीरमिह भवति साधनं येन कार्याणाम् ॥ २०२ ॥

**ता जइ माहप्पं पालियस्स सीलस्स अत्थि भुवणम्मि । ता होउ मम सरीरं पुणन्नवं तप्पभावाओ ॥२०३॥**

**इय जंपिऊण तीए निट्ठुयणं गिण्हिऊण वयणाओ । उव्वट्टियं सरीरं संजायं कंचणच्छायं ॥२०४॥**

**अन्नत्थ पज्जलंतं पेच्छइ जालाकलावदुप्पेच्छं । वणदावं दहमाणं सव्वत्तो सत्तसंघायं ॥२०५॥**

**तं दट्ठूणं निस्सेससत्तसंहारकारिणं तीए । सीलेण साविऊणं विज्झविओ सो समग्गो वि ॥२०६॥**

**अन्नत्तो गच्छंती कोइलकुलकंठकालमरुणच्छं । विसमविसपुन्नवयणं नियइ भुयंगममरन्नम्मि ॥२०७॥**

**दट्ठूणमखुहियमणा जंपइ चित्तेण वंछिओ न मए । जइ परपुरिसो एसो सट्ठाणं जाउ तो भुयगो ॥२०८॥**

**तं वयणं सोऊणं भुयगो अन्नत्थ नासिऊण गओ । दवदंती पुण पंथं गवेसमाणी भमइ रन्ने ॥२०९॥**

**एगम्मि तरुतलम्मि संझासमयम्मि चिट्ठए जाव । ताव अइदीहकाओ निल्लालियदीहजीहमुहो ॥२१०॥**

**अट्टट्टहासपूरियदियंतरो धूमधूसरसरीरो । पिंगलनयणो कन्नावलंबियासियभुयंगदुगो ॥२११॥**

**अइनिसिय-दीहदाढो करालवयणो गलंतमुहलालो । निस्साणंतो कत्तियमणवरयं हड्डुखंडम्मि ॥२१२॥**

**रुहिरारुणकरजुयलो बीडच्छो जणियजणमणुत्तासो । पायडियसिराजालो संपत्तो रक्खसो एगो ॥२१३॥**

**नियसीलपहावेणं पसन्नवयणेहिं कूरहियओ वि । उवसमिओ तह कहवि हु जह जंपइ रक्खसो एवं ॥२१४॥**

**तुट्ठो हं तुह भद्दे ! पत्थेसु वरं मणिच्छियं किं पि । जेण जयम्मि अमोहं देवाणं दंसणं होइ ॥२१५॥**

**सा जंपइ मह संपइ पओयणं नत्थि पत्थियवरेण । पभणइ पुणो वि रक्खो तहा वि मग्गेसु किं पि तुमं ॥२१६॥**

---

तावद्यदि माहात्म्यं पालितस्य शीलस्यास्ति भुवने । तदा भवतु मम शरीरं पुनर्नवं तत्प्रभावात् ॥ २०३ ॥

इति जल्पित्वा तथा निष्ठिवन गृहीत्वा वदनाद् । उद्वर्तितं शरीरं सञ्जातं कञ्चनच्छायम् ॥ २०४ ॥

अन्यत्र प्रज्वलन्तं पश्यति ज्वालाकलापदुष्प्रेक्ष्यम् । वनदवं दह्यमानं सर्वतः सत्त्वसङ्घातम् ॥ २०५ ॥

तं दृष्ट्वा निःशेषस्सत्त्वसंहारकारिणं तया । शीलेन शप्त्वा विध्यातः स समग्रोऽपि ॥ २०६ ॥

अन्यतो गच्छन्ती कोकिलकुलकण्ठकालमरुणाक्षम् । विषमविषपूर्णवदनं पश्यति भुजङ्गमरण्ये ॥ २०७ ॥

दृष्ट्वाऽक्षुब्धमना जल्पति चित्तेन वाञ्छितो न मया । यदि परपुरुष एष स्वस्थानं यातु तदा भुजगः ॥ २०८ ॥

तद्वचनं श्रुत्वा भुजगोऽन्यत्र नंष्ट्वा गतः । दवदन्ती पुनः पथं गवेषमाणा भ्रमत्यरण्ये ॥ २०९ ॥

एकस्मिंस्तरुतले सन्ध्यासमये तिष्ठति यावत् । तावदतिदीर्घकायो निर्लालितदीर्घजिव्हामुखः ॥ २१० ॥

अट्टाट्टहास्यपूरितदिगन्तरो धूम्रधूसरशरीरः । पिङ्गलनयनः कर्णावलम्बितासितभुजङ्गद्विकः ॥ २११ ॥

अतिनिसितदीर्घदंष्ट्रः करालवदनो गलन्मुखलालः । अपवादयन् कर्त्तितमनवरतमस्थिखण्डान् ॥ २१२ ॥

रुधिरारुणकरयुगलो बीभत्सो जनितजनमनोत्त्रासः । प्राकटितशिराजालः संप्राप्तो राक्षस एकः ॥ २१३ ॥

निजशीलप्रभावेन प्रसन्नवचनैः कुरहृदयोऽपि । उपशमितस्तथा कथमपि खलु यथा जल्पति राक्षस एवम् ॥ २१४ ॥

तुष्टोऽहं तव भद्रे ! प्रार्थय वरं मनइच्छितं किमपि । येन जगत्यमोघं देवानां दर्शनं भवति ॥ २१५ ॥

सा जल्पति मम सम्प्रति प्रयोजनं नास्ति प्रार्थितवरेण । प्रभणति पुनरपि राक्षसस्तथापि मार्गय किमपि त्वम् ? ॥२१६॥

तो जंपइ दवदंती जइ एवं ता तुमं मह कहेसु । मह दइएणं सद्धिं समागमो होहिही कइया ? ॥२१७॥
तो भणइ रक्खसो बारसम्मि वरिसम्मि तुज्झ जणयस्स । पासे नलेण सद्धिं होहि त्ति समागमो भद्दे ! ॥२१८॥
पणमित्तु गओ देवो सट्ठाणं सा वि सत्थियनरेहिं । दिट्ठो तत्थुवविट्ठा नीया निययम्मि सत्थम्मि ॥२१९॥
आसन्ने संपत्ता तत्थ वि धणदेवसत्थवाहेण । पुट्ठे तीए कहिओ नियओ सव्वो वि वुत्तंतो ॥२२०॥
संचलिओ सो सत्थो दवदंती वि य गया समं तेण । संपत्तो य कमेणं वच्चंतो अयलपुरनयरं ॥२२१॥
नयराभिमुहं चलिया गच्छंती सलिलपुन्नवावीए । पत्ता तत्थ पविट्ठा सलिलकए कह वि दवदंती ॥२२२॥
पक्खालियकर-चरण सीयलजलविहियतण्हवुच्छेया । उवविट्ठा वावीए तडम्मि जावऽच्छए एसा ॥२२३॥
एत्थंतरम्मि तन्नयरवासिरिउवन्नपुहइपालस्स । दासीओ संपत्ता जलकीलत्थं इमा ताहिं ॥२२४॥
दिट्ठा तो सप्पणयं नीया नियसामिणीसयासम्मि । विहियपणामा देवीए नाइदूरम्मि उवविट्ठा ॥२२५॥
भणिया चंदजसाए संभासेऊण कोमलगिराहिं । वच्छे ! तुमं पि धूया मह चंदमईए सहिय त्ति ॥२२६॥
तम्हा चंदमईए गिहम्मि अच्छसु सुहेण तं वच्छे ! । तीए वि विणयदाणाइणा जणो रंजिओ सव्वो ॥२२७॥
तम्मि पुरे देवीए सत्तागारं करावियं तत्थ । दीणाईणं दाणं अणवरयं दिज्जइ जहिच्छं ॥२२८॥
जइ कहवि कुओ वि नलो आगच्छइ तत्थ इय विचिंतेउं । देवीए सम्मएणं दाणं सा देइ तत्थ ठिया ॥२२९॥
एत्तो वेयब्भनराहिवेण निसुओ नलस्स वुत्तंतो । रज्जब्भंसाईओ जाव अरन्नम्मि संपत्तो ॥२३०॥

---

ततो जल्पति दवदन्तीत्येव तावत्त्वं मम कथय । मम दयितेन सार्धं समागमो भविष्यति कदा ? ॥ २१७ ॥
ततो भणति राक्षसो द्वादशे वर्षे तव जनकस्य । पार्श्वे नलेन सार्धं भविष्यतीति समागमो भद्रे ! ॥ २१८ ॥
प्रणम्य गतो देवो स्वस्थानं सापि सार्थिकनरैः । दृष्टा तत्रोपविष्टा नीता निजके सार्थे ॥ २१९ ॥
आसन्ने सम्प्राप्ता तत्रापि धनदेवसार्थवाहेन । पृष्टे तया कथितो निजकः सर्वोऽपि वृत्तान्तः ॥ २२० ॥
सञ्चलितः स सार्थो दवदन्त्यपि च गता समं तेन । सम्प्राप्तश्च क्रमेण गच्छन्नचलपुरनगरे ॥ २२१ ॥
नगराभिमुखं चलिता गच्छन्ती सलिलपूर्णवाप्याः । प्राप्ता तत्र प्रविष्टा सलिलकृते कथमपि दवदन्ती ॥ २२२ ॥
प्रक्षालितकर-चरणा शीतलजलविहिततृष्णव्युच्छेदा । उपविष्टा वाप्यास्तटे यावदास्त एषा ॥ २२३ ॥
अत्रान्तरे तन्नगरवासिऋतुपर्णपृथिवीपालस्य । दास्यः सम्प्राप्ता जलक्रीडार्थमिमा ताभिः ॥ २२४ ॥
दृष्टा ततः सप्रणयं नीता निजस्वामिनिसकाशे । विहितप्रणामा देव्या नातिदूर उपविष्टा ॥ २२५ ॥
भणिता चन्द्रयशसा सम्भाष्य कोमलगीर्भिः । वत्से ! त्वमपि दुहिता मम चन्द्रमत्याः सखीति ॥ २२६ ॥
तस्माच्चन्द्रमत्या गृहे आस्स्व सुखेन त्वं वत्से ! । तयापि विनयदानादिना जनो रञ्जितः सर्वः ॥ २२७ ॥
तस्मिन्पुरे देव्या सत्रागारं कारितं तत्र । दीनादीनां दानमनवरतं दीयते यथेच्छम् ॥ २२८ ॥
यथा कथमपि कुतोऽपि नल आगच्छति तत्रेति विचिन्त्य । देव्या सम्मतेन दानं सा ददाति तत्र स्थिता ॥ २२९ ॥
इतो वैदर्भनराधिपेन निश्रुतो नलस्य वृत्तान्तः । राज्यभ्रंशादिको यावदरण्ये सम्प्राप्तः ॥ २३० ॥

**जीवंतस्स मयस्स व कुसलपउत्ती वि जाव नो लद्धा । काऊण महासोयं तत्तो रिउवन्नामस्स ॥२३१॥**

**नरवइणो रहमित्तं विप्पं पेसेइ नलकुमारस्स । कुसलपउत्तिनिमित्तं संपत्तो रायपासम्मि ॥२३२॥**

**पुट्ठो सो नरवइणा सव्वं रज्जाइकुसलवुत्ततं । तेण वि रन्नो कहियं सकलत्तनलस्स निस्सरणं ॥२३३॥**

**तं सोऊणं सयलं पि राउलं सोयदुक्खियं जायं । सो भोयणमलहंतो तत्थ गओ दाणसालाए ॥२३४॥**

**तेण तहिं सा दिट्ठा जायं दोन्हं पि पच्चभिन्नाणं । तत्तो सदुक्खमेसा वुत्ततं पुच्छिया सव्वं ॥२३५॥**

**तं मुणिऊणं विप्पो चंदजसादेविअंतियं पत्तो । मा खिज्जसु देवि ! जओ लद्धा एत्थेव दवदंती ॥२३६॥**

**सा कत्थ ? तेण भणियं जा दाणं देइ दाणसालाए । इय सुणिऊणं पत्ता चंदजसा तीए पासम्मि ॥२३७॥**

**दवदंतीए कहिओ रज्जब्भंसाइसयलवुत्तंतो । चंदजसादेवीए संपत्ता जाव एत्थ अहं ॥२३८॥**

**तीए वि हु सप्पणयं दवदंति निययमंदिरे नीया । सम्माणिया सहरिसं वत्थाऽलंकारमाईहि ॥२३९॥**

**रहमित्तेणं भणिओ नरनाहो अन्नवासरे नमिउं । देव ! इमा दवदंती पेसिज्जउ जणयभवणम्मि ॥२४०॥**

**दवदंतिविओयदुहाउराण भीमरह-पुप्फदंतीणं । संपज्जउ परमसुहं नियतणयादंसणेणं ति ॥२४१॥**

**एवं पयंपिऊणं पसत्थदिवसम्मि नरवरिंदेण । चउरंगबलं दाउण पेसिया जणयपासम्मि ॥२४२॥**

**अक्खंडपयाणेहिं गच्छंती जणयसन्तियं नयरिं । संपत्ता भीमरहो वि णिग्गओ सम्मुहो तीए ॥२४३॥**

**अइगरुयविभूईए पवेसिया नियपुरम्मि दवदंती । पणया य पुप्फदंतीपमुहाणं नियजणणीणं ॥२४४॥**

---

जीवतो मृतस्य वा कुशलप्रवृत्तिरपि यावन्न लब्धा । कृत्वा महाशोकं तत ऋतुपर्णनामस्य ॥ २३१ ॥

नरपते रथमित्रं विप्रं प्रेष्यति नलकुमारस्य । कुशलप्रवृत्तिनिमित्तं संप्राप्तो राजपार्श्वे ॥ २३२ ॥

पृष्टः स नरपतिना सर्वं राज्यादिकुशलवृत्तान्तम् । तेनापि राज्ञः कथितं सकलत्रनलस्य निस्सरणम् ॥ २३३ ॥

तच्छ्रुत्वा सकलमि राजकुलं शोकदुःखितं जातम् । स भोजनमलभमानस्तत्र गतो दानशालायाम् ॥ २३४ ॥

तेन तत्र सा दृष्टा जातं द्वयोरपि प्रत्यभिज्ञानम् । ततः सदुःखमेषा वृत्तान्तं पृष्टा सर्वम् ॥ २३५ ॥

तं मुणित्वा विप्रश्चन्द्रयशोदेव्यन्तिकं प्राप्तः । मा खिद्यस्व देवि ! यतो लब्धात्रैव दवदन्ती ॥ २३६ ॥

सा कुत्र ? तेन भणितं या दानं ददाति दानशालायाम् । इति श्रुत्वा प्राप्ता चन्द्रयशा तस्याः पार्श्वे ॥ २३७ ॥

दवदन्त्या कथितो राज्यभ्रंशादिसकलवृत्तान्तः । चन्द्रयशोदेव्याःसम्प्राप्ता यावदत्राहम् ॥ २३८ ॥

तथापि खलु सप्रणयं दवदन्ती निजकमन्दिरे नीता । सन्मानिता सहर्षं वस्त्रालङ्कारादिभिः ॥ २३९ ॥

रथमित्रेण भणितो नरनाथोऽन्यावसरे नत्वा । देव ! इमा दवदन्ती प्रेष्यतां जनकभवने ॥ २४० ॥

दवदन्ती वियोगदुःखातुरयोर्भीमरथ-पुष्पदन्त्योः । संपद्येतां परमसुखं निजतनयादर्शनेनेति ॥ २४१ ॥

एवं प्रजल्प्य प्रशस्तदिवसे नरवरेन्द्रेण । चतुरङ्गबलं दत्वा प्रेषिता जनकपार्श्वे ॥ २४२ ॥

अखण्डप्रयाणै र्गच्छन्ती जनकसत्कां नगरीम् । संप्राप्ता भीमरथोऽपि निर्गतःसम्मुखस्तस्याः ॥ २४३ ॥

अति गुरुकविभूत्या प्रवेशिता निजपुरे दवदन्ती । प्रणता च पुष्पदन्तीप्रमुखाणां निजजननीनाम् ॥ २४४ ॥

पुट्ठाए नियचरियं रहमित्तमुहेण साहियं सव्वं । अंतेउरमज्झगया वहुविहकीला-विणोएहिं ॥२४५॥

दवदंती तत्थ ठिया मणयं संपन्नमणसमाहाणा । मणचिंतियपूरिज्जंतवत्थुनियरा जणयभवणे ॥२४६॥

(ग्रन्थाग्रम् २०००॥)

एत्तो य नलनरिंदो भमडंतो विडविसंकडं अडविं । जा गच्छइ ता पेच्छइ मसिकसिणं भीसणं भुयगं ॥२४७॥

कीलाविऊण अक्खुहियमाणसो विसहरं बहुपयारं । पक्खिवइ पुरओ दिट्ठिं जाव तओ पेक्खए एक्कं ॥२४८॥

केऊर-कडय-कुंडलविभूसियं जच्चकंचणच्छायं । तियसं नियकंतिपहाए भासयंतं दिसावलयं ॥२४९॥

जंपइ देवो नलकुमार ! तुज्झ जणओ अहं निसढराया । जेण तुह रायलच्छि दाउं तव-चरणमणुचिन्नं ॥२५०॥

मरिऊण समुप्पन्नो तियसो तियसालयम्मि दिव्वम्मि । तत्थ निविट्ठेण मए दिट्ठो तं रज्जपब्भट्ठो ॥१५१॥

हिंडंतो अडवीए गुरुनेहवसा समागओ एत्थ । तुह सत्तपरिक्खत्थं विसहररूवं मए विहियं ॥२५२॥

नियदेहरक्खणकए इण्हिं बहुवइरिओ तुमं जम्हा । ता गिण्ह मह सयासा रूवपरावत्तिणिं गुडियं ॥२५३॥

एवं ति मन्निऊणं गहिया गुडिया नलेण देवो वि । सट्ठाणं संपत्तो हिंडंतो नलध[ न ]रिंदो वि ॥२५४॥

गुडियकयखुज्जवेसो संपत्तो सुंसुमारनयरम्मि । रायपहं जाव गओ ता दिट्ठो गयवरो एक्को ॥२५५॥

वियरंतो सच्छंदं निरंकुसो मयजलोल्लियकवोलो । आमूलं उम्मूलियनिच्चलआलाणगुरुखंभो ॥२५६॥

पाडेंतो हट्टाइं भंजंतो मंदिराइं सव्वत्तो । कोलाहलो पयट्टो चूरिज्जंतम्मि लोगम्मि ॥२५७॥

---

पृष्टाया निजचरितं रथमित्रमुखेन कथितं सर्वम् । अन्तःपुरमध्यगता बहुविधक्रीडा-विनोदैः ॥ २४५ ॥

दवदन्ती तत्र स्थिता मनाक् सम्प्राप्तमनःसमाधाना । मनश्चिन्तितपूर्यमाणवस्तुनिकरा जनकभवने ॥ २४६ ॥

इतश्च नलनरेन्द्रो भ्रमन् विटपिसङ्कीर्णामटवीम् । यावद्गच्छति तावत्पश्यतिमसीकृष्णं भीषणं भुजगम् ॥ २४७ ॥

क्रीडयित्वाक्षुब्धमानसो विषधरं बहुप्रकारम् । प्रक्षिपति पुरतो दृष्टिं यावत्ततः प्रेक्षत एकम् ॥ २४८ ॥

केयूर-कटक-कुण्डलविभूषितं जात्यकञ्चनच्छायम् । त्रिदशं निजकान्तिप्रभया भासमानं दिग्वलयम् ॥ २४९ ॥

जल्पति देवो नलकुमार ! तव जनकोऽहं निषधराजा । येन तुभ्यं राजलक्ष्मी दत्वा तपश्चरणमनुचीर्णम् ॥ २५० ॥

मृत्वा समुत्पन्नस्त्रिदशालये दिव्ये । तत्र निविष्टेन मया दृष्टस्त्वं राज्यप्रभ्रष्टः ॥ २५१ ॥

हिण्डमानोऽटव्यां गुरुस्नेहवशात्समागतोऽत्र । तव सत्त्वपरीक्षार्थं विषधररुपं मया विहितम् ॥ २५२ ॥

निजदेहरक्षणकृते इदानीं बहुवैरिणस्त्वं यस्मात् । तावद्गृहाण मम सकाशाद्रुपपरावर्तिनिं गुटिकाम् ॥ २५३ ॥

एवमिति मत्वा गृहीता गुटिका नलेन देवोऽपि । स्वस्थानं संप्राप्तो हिण्डमानो नलध[न]रेन्द्रोऽपि ॥ २५४ ॥

गुटिकाकृतकुब्जवेशः संप्राप्तः सुंसुमारनगरे । राजपथं यावद्गतस्तावद्दृष्टो गजवर एकः ॥ २५५ ॥

विचरन् स्वच्छन्दं निरङ्कुशो मदजलार्द्रीतकपोलः । आमूलमुन्मूलितनिश्चलालानगुरुस्तम्भः ॥ २५६ ॥

पातयन् हट्टानि भञ्जन्मन्दिराणि सर्वतः । कोलाहलः प्रवृत्तश्चूर्यमाणे लोके ॥ २५७ ॥

**हलबोलं सुणिऊणं नाणासिक्खाहिं खुज्जयनरेण । काऊण वसे हत्थी नीओ आलाणखंभम्मि ॥२५८॥**
**लोएणऽणुगम्मंतो पत्तो दहिवन्नरायपासम्मि । दट्ठुं खुज्जयरूवं नरनाहो विम्हओ चित्ते ॥२५९॥**
**विन्नाणं तुह अन्नं पि अत्थि रन्ना पयंपिओ भणइ । देवऽत्थि रसवइं निम्मवेमहं सूरपागेणं ॥२६०॥**
**दंसेसु मज्झ रविपागरसवई कोउयं भणइ राया । तेण विहियं तह च्चिय संजाओ गोरवट्ठाणं ॥२६१॥**
**कत्तो तुह आगमणं ? पुट्ठो रन्ना पुणो वि सो भणइ । नलरन्नो सूयारो हुंडियनामो अहं आसि ॥२६२॥**
**बाहत्तरी कलाओ तस्स सयासम्मि सिक्खिया य मए । नियविन्नाणगुणेणं संजाओ वल्लहो रन्नो ॥२६३॥**
**वणवासं संपत्ते नलम्मि जूएण हारिउं वसुहं । कत्थ गओ स न नज्जइ अहं तु तुह पासमल्लीणो ॥२६४॥**
**अह अन्नया कयाई दहिवन्ननरिंदसंतिओ दूओ । भीमरहस्स सयासं केणइ कज्जेण संपत्तो ॥२६५॥**
**तत्थगएणं तेणं कहिओ सूयारसंतिओ सव्वो । वुत्तंतो नरवइणो दवदंतीए समेयस्स ॥२६६॥**
**भणियं दवदंतीए रविपागं रसवइं मुणइ नऽन्नो । मोत्तूण नलनरिंदं ता होज्ज अवस्स मज्झ पिओ ॥२६७॥**
**ता केण उवाएणं आणेयव्वो इहं स सूयारो । नवरं दहिवन्ननराहिवेण समयं जइ समेइ ॥२६८॥**
**अलियसयंवरमंडवकवडेणं एत्थ पत्थिवो सो वि । हक्कारिज्जउ इय मंतिऊण बालाए सह रन्ना ॥२६९॥**
**तो पट्ठविओ दूओ तेणावि सयंवरो समक्खाओ । जह दिणपंचगमज्झे आगंतव्वं तए सिग्घं ॥२७०॥**
**अह जंपइ दहिवन्नो दूरे देसो त्ति कहणु गंतव्वं । पच्चासन्नो दिवसो तो भणिओ हुंडिएण इमं ॥२७१॥**

---

हलबोलं श्रुत्वा नानाशिक्षाभिः कुब्जकनरेण । कृत्वा वशे हस्ती नीत आलानस्तम्भे ॥ २५८ ॥
लोकेनानुगच्छन्प्राप्तो दधिपर्णराजपार्श्वे । दृष्ट्वा कुब्जकरुपं नरनाथो विस्मितश्चित्ते ॥ २५९ ॥
विज्ञानं तवान्यदप्यस्ति राज्ञा प्रजल्पितो भणति । देवास्ति रसवतीं निर्मापयाम्यहं सूर्यपाकेन ॥ २६० ॥
दर्शय मम रविपाकरसवतीकौतुकं भणति राजा । तेन विहितं तथा चैव सञ्जातो गौरवस्थानम् ॥ २६१ ॥
कुतस्तवागमनं ? पृष्टो राज्ञा पुनरपि स भणति । नलराज्ञः सूपकारो हुण्डिकनामोऽहमासीत् ॥ २६२ ॥
द्वासप्ततिः कलास्तस्य सकाशे शिक्षिताश्च मया । निजविज्ञानगुणेन सञ्जातो वल्लभो राज्ञः ॥ २६३ ॥
वनवासं संप्राप्ते नले द्युतेन हारित्वा वसुधाम् । कुत्र गतः स न ज्ञायतेऽहं तु तव पार्श्वमालीनः ॥ २६४ ॥
अथान्यदा कदाचिद्दधिपर्णनरेन्द्र सत्को दूतः । भीमरथस्य सकाशं केनचित्कार्येण सम्प्राप्तः ॥ २६५ ॥
तत्र गतेन तेन कथितः सूपकारसत्कः सर्वः । वृत्तान्तो नरपते र्दवदन्त्याः समेतस्य ॥ २६६ ॥
भणितं दवदन्त्या रविपाकारसवतीं मुणोति नान्यः । मुक्त्वा नलनरेन्द्रं ततो भवेदवश्यं मम प्रियः ॥ २६७ ॥
ततः केनोपायेनानेतव्य इह स सूपकारः । नवरं दधिपर्णनराधिपेन समकं यदि समैति ॥ २६८ ॥
अलिकस्वयंवरमण्डपकपटेनात्र पार्थिवः सोऽपि । आकार्यतु इति मन्त्रयित्वा बालया सह राज्ञा ॥ २६९ ॥
ततो प्रस्थापितो दूतस्तेनापि स्वयंवरः समाख्यातः । यथा दिनपञ्चकमध्ये आगन्तव्यं त्वया शीघ्रम् ॥ २७० ॥
अथ जल्पति दधिपर्णो दूरे देश इति कथं नु गन्तव्यम् । प्रत्यासन्नो दिवसस्ततो भणितो हुण्डिकेनेदम् ॥ २७१ ॥

**देव ! विसन्नो मा होसु नेमि तं तत्थ पहरमेत्ते वि । पभणइ राया कहमाह सो वि सज्जं करेऊण ॥२७२॥**
**संजमिय तुरयसंदणमारुहसु सहस्सजोहचउसहिओ । एवं ति कए रन्ना सूयारेणं पयत्तेणं ॥२७३॥**
**अस्सावहारविज्जाए कन्नजावो कओ तुरंगाणं । तो ते निसायकरवालसामलं गयणमुप्पइया ॥२७४॥**
**अह गच्छंतस्स नरेसरस्स मणपवणजवणरहरयणे । धरणीयलम्मि पडियं वरुत्तरीयं सिरग्गाओ ॥२७५॥**
**तं जोयंतो उ तरललोयणो हुंडिएण पडिसिद्धो । जोयणसयं सवायं जम्हा तं देव ! परिचत्तं ॥२७६॥**
**पत्तो य कुंडिणपुरिं पवेसिओ महरिहाए रिद्धीए । सम्माणिओ समाणो पयंपिओ भीमरहरन्ना ॥२७७॥**
**काउं सयंवरमिमं मए तुमं कोउएण वाहरिओ । सूयारदंसणकए विसेसकज्जं न उण अन्नं ॥२७८॥**
**ता रविपागरसवईकरणे आइससु निययसूयारं । तो दहिवन्नाएसाणंतरमिमिणा वि सा विहिया ॥२७९॥**
**भोयविओ भीमरहो सपरियणो तो तयं पलोएउं । उब्भूयभूरिपणया दवदंती चिंतिउं लग्गा ॥२८०॥**
**नूणमिमो मज्झ पिओ नज्जइ रविपागरसवईकरणा । तह दंसणमेत्तेग वि विप्फुरणाओ सिणेहस्स ॥२८१॥**
**किंतु न रूवं तारिसमिमस्स इय चिंतिऊण । सा साहइ तं सोउं तेणुत्तमिमं पि संभवइ ॥२८२॥**
**सा भणइ न रोमं पि हु भिज्जइ परपुरिसफंसओ मज्झ । नलकरफंसेण पुणो पुलइज्जइ सव्वमवि अंगं ॥२८३॥**
**ता ताय ! परिक्खिज्जउ करयलफंसेणिमस्स तह विहिए । संजाओ सव्वंगं तीए सिणेहेण रोमंचो ॥२८४॥**
**एसो स एव इय चिंतिऊण चलणेसु लग्गिउं तीए । तह कह वि पभणिओ सो जह नियरूवं कयं तेण ॥२८५॥**

---

देव ! विष्णणो मा भव नयामि त्वां तत्र प्रहरमात्रेणापि । प्रभणति राजा कथमाह सोऽपि सज्जं कृत्वा ॥ २७२ ॥
संयमिततुरगस्यन्दनमारुह सहस्रयोधचतुर्सहितः । एवमिति कृते राज्ञा सूपकारेण प्रयतेन ॥ २७३ ॥
अश्वापहारविद्यया कर्णजापः कृतस्तुरङ्गाणाम् । ततस्ते निषादकरवालश्यामलं गगनमुत्पतिताः ॥ २७४ ॥
अथ गच्छतो नरेश्वरस्य मनःपवनजवनरथरत्ने । धरणितले पतितं वरोत्तरीयं शिरोऽग्रात् ॥ २७५ ॥
तं पश्यंस्तु तरललोचनो हुण्डिकेन प्रतिषिद्धः । योजनशतं सपादं यस्मात्तद् देव ! परित्यक्तम् ॥ २७६ ॥
प्राप्तश्च कुण्डिनपुरिं प्रवेशितो महार्ह्यार्द्धया । सन्मानितस्सन् प्रजल्पितो भीमरथराज्ञा ॥ २७७ ॥
कृत्वा स्वयंवरमिमं मया त्वं कौतुकेन व्याहृतः । सूपकारदर्शनकृते विशेषकार्यं न पुनरन्यत् ॥ २७८ ॥
ततो रविपाकरसवतीकरण आदिश निजकसूपकारम् । ततो दधिपर्णादेशानन्तरमनेनापि सा विहिता ॥ २७९ ॥
भोजितो भीमरथः सपरिजनस्ततस्तकं प्रलोक्य । उद्भूतभूरिप्रणया दवदन्ती चिन्तयितुं लग्ना ॥ २८० ॥
नूनमयं मम प्रियो ज्ञायते रविपाकरसवतीकरणात् । यथा दर्शनमात्रेणापि विस्फुरणात्स्नेहस्य ॥ २८१ ॥
किन्तु न रुपं तादृशमेतस्येति चिन्तयित्वा जनकस्य । सा कथयति तच्छ्रुत्वा तेनोक्तमिममपि सम्भवति ॥ २८२ ॥
सा भणति न रोममपि खलु भिद्यते परपुरुषस्पर्शतो मम । नलकरस्पर्शेन पुनः पुलकायति सर्वमप्यङ्गम् ॥ २८३ ॥
ततस्तात ! परीक्ष्यते करतलस्पर्शेनैतस्य तथा विहिते । सञ्जातः सर्वाङ्गं तस्याः स्नेहेन रोमाञ्चः ॥ २८४ ॥
एष स एवेति चिन्तयित्वा चरणयोर्लगित्वा तया । कथमपि प्रभणितः स यथा निजरुपं कृतं तेन ॥ २८५ ॥

**तो भीमरहनिवेणं वद्धावणयं कयं विभूईए । दहिवन्ननरिंदेणावि खामिओ सकयमवराहं ॥२८६॥**
**वेयब्भवइप्पभिईहिं रायविंदेहिं विहियपरिवारो । संजाओ पुहइवई पुव्वं व नमंतसामंतो ॥२८७॥**
**अक्कंतेसु दुवालसवासेसु अहऽन्नया नलनरिंदो । नियबलभरभरियमहीवलओ पत्तो नियं नयरिं ॥२८८॥**
**आवासिओ पुरीए परिसरधरणीयले तओ तेण । पट्ठविउं नियदूयं भणाविओ कुब्बरो एवं ॥ २८९ ॥**
**मोत्तूणं महरज्जं वच्चसु अहवा पुणोरमसु जूयं । तो खेल्लियम्मि जूए जिणिऊण वसीकयं रज्जं ॥२९०॥**
**कुब्बरजुवरायस्स वि दिन्नो देसो नलेण नरवइणा । सव्वे वि सुहं भुंजंति रायलच्छि सुइरकालं ॥२९१॥**
**अन्नम्मि दिणे उज्जाणपालपुरिसेहिं पणमिउं राया । विन्नत्तो संपत्तो चउनाणी देव ! उज्जाणे ॥२९२॥**
**नामेणं जिणसेणो सूरी दूरीकयंतरारिगणो । सोऊण तयं दाऊण ताण निययंगआभरणं ॥२९३॥**
**पगलंतमयजलोहं आरुहिउं वारणं महीनाहो । संतेउरो सकुमरो सकुव्बरो पउरपरियरिओ ॥२९४॥**
**नीहरिओ नयरीओ संपत्तो सूरिपायपासम्मि । पणमियमुणिकमकमलो उवविट्ठो उचियदेसम्मि ॥२९५॥**
**धम्मकहापज्जंते पत्थावं पाविउं पुहइपालो । पुच्छइ पणामपुव्वं सूरिं सिररइयकरकमलो ॥२९६॥**
**किं पुव्वभवे भयवं ! मए कयं ? जेण एत्तियं कालं । दवदंतीए समयं संजाओ दुस्सहो विरहो ॥२९७॥**
**तो पभणइ मुणिनाहो आयन्नसु पुहइपाल ! सम्मं ति । एत्तो पंचमजम्मे अट्ठावयपव्वयसमीवे ॥२९८॥**
**अक्खायखग्गनिज्जिणियसंगरो सव्वसंगरो राया । संगरपुरनयरम्मी अहेसि तं मम्मणो नाम ॥२९९॥**
**वीरमईनामेणं एसा वि हु तुज्झ पणइणी आसि । गच्छंतेणं अह अन्नया य आहेडयम्मि तए ॥३००॥**

---

ततो भीमरथनृपेन वर्धापनकं कृतं विभूत्या । दधिपर्णनरेन्द्रेणापि क्षामित: स्वकृतमपराधम् ॥ २८६ ॥
वैदर्भपतिप्रभृतै राजवृन्दै विहितपरिवार: । सञ्जात:पृथिवीपति: पूर्वमिव नमत्सामन्त: ॥ २८७ ॥
आक्रान्तेषु द्वादशवर्षेष्वथान्यदा नलवरेन्द्र: । निजबलभरभृतमहीवलय: प्राप्तो निजां नगरीम् ॥ २८८ ॥
आवासित: पूर्या: परिसरधरणीतले ततस्तेन । प्रस्थाप्य निजदूतं भाणित: कुबर एवम् ॥ २८९ ॥
मुक्त्वा मम राज्यं व्रजाथवा पुना रमस्व द्युतम् । तत: क्रीडति द्युते जित्वा वशीकृतं राज्यम् ॥ २९० ॥
कुबरयुवराज्ञेऽपि दत्तो देशो नलेन नरपतिना । सर्वेऽपि सुखं भुञ्जन्ति राजलक्ष्मीं सुचिरकालम् ॥ २९१ ॥
अन्यस्मिन् दिन उद्यानपालपुरुषै: प्रणम्य राजा । विज्ञप्त: संप्राप्तश्चतुर्ज्ञानी देव ! उद्याने ॥ २९२ ॥
नाम्ना जिनसेन: सूरि दूरीकृतान्तरारिगण: । श्रुत्वा तकं दत्त्वा तेभ्यो निजाङ्गाभरणम् ॥ २९३ ॥
प्रगलन्मदजलौघमारुह्य वारणं महीनाथ: । सान्त:पुर: सकुमार: सकुबर: पौरपरिवारित: ॥ २९४ ॥
नि:सृतो नगर्या: सम्प्राप्त: सूरिपादपार्श्वे । प्रणतमुनिक्रमकमल उपविष्ट उचितदेशे ॥ २९५ ॥
धर्मकथापर्यन्ते प्रस्तावं प्राप्य पृथिवीपाल: । पृच्छति प्रणामपूर्वं सूरिं शिरोरचितकरकमल: ॥ २९६ ॥
किं पूर्वभवे भगवन् ! मया कृतं ? येनैतावन्तं कालम् । दवदन्त्या समकं सञ्जातो दु:सहो विरह: ॥ २९७ ॥
तदा प्रभणति मुनिनाथ आकर्णय पृथिवीपाल ! सम्यगिति । इत: पञ्चमजन्मनि अष्टापदपर्वतसमीपे ॥ २९८ ॥
उत्खातखङ्गनिर्जितसङ्गर: सर्वसङ्गरो राजा । सङ्गरपुरनगरे आसीत्त्वं मम्मणो नाम ॥ २९९ ॥
वीरमतीनाम्नैषाऽपि खलु तव प्रणयिन्यासीत् । गच्छताथान्यदा चाखेटके त्वया ॥ ३०० ॥

दिट्ठो मलमलिणंगो उवसंतो मुणिवरो समुहमिंतो । अवसउणो त्ति विचिंतिय बंधित्तु समंदिरे नीओ ॥३०१॥

धरिओ तओ दुवालस घडियाओ तओ कयाणुतावेणं । छोडेऊणं मुक्को पयंपिओ तं कुओ ? कहसु ॥३०२॥

सो जंपइ रोहेडयनयराओ समागओ इह पुरम्मि । गंतव्वं पुण अट्ठावयम्मि जिणवंदणनिमित्तं ॥३०३॥

पडिलाभिओ य दोहिं वि जणेहिं तुब्भेहिं भत्तिकलिएहिं । तस्स समीवे दोन्नि वि सावगधम्मं पवन्नाइं ॥३०४॥

कइया वि हु वीरमई संपत्ता देवयाणुभावेण । अट्ठावयम्मि सव्वे वि जिणवरा पूइया तीए ॥३०५॥

दट्ठूण तत्थ जत्तं कीरंतिं नमिरअमरनियरेण । तत्तो पहिट्ठहियया समागया नियनयरम्मि ॥३०६॥

काराविया य तीए झलकिरहीरावलीहिं रेहंता । चउवीसं कणगमया तिलया मुत्तावलीकलिया ॥३०७॥

एक्केक्कं उज्जमिउं कमेण आयंबिलाण वीसाए । दिन्ना गंतुं अट्ठावयम्मि तीए जिणिंदाणं ॥३०८॥

भुवणगुरुणो विभूसिय भत्तीए तत्थ तिलयरयणेहिं । नियगेहमागयाए निसुयं निम्मलतवस्स फलं ॥३०९॥

तहा हि-

तवेण उत्तमो जम्मो कंती लायण्णमुत्तमं । तवेण रूव-सामिद्धी तवेण सुहसंपया ॥३१०॥

तवेण वित्थडा कित्ती तवेण सुहगत्तणं । सुरा वि पज्जुवासंति तवोगुणरयं सया ॥३११॥

तवेणं हुंति लद्धीओ सग्गा मोक्खा तवेण य । तं नत्थि एत्थ कल्लाणं तवाओ जं न जायए ॥३१२॥

इय निसुणिऊण तीए भद्द-महाभद्दमाइया विविहा । विहिया तवोविसेसा उज्जमिया जिणमयविहीए ॥३१३॥

---

दृष्टो मलमलिताङ्ग उपशान्तो मुनिवरः संमुखमायान् । अपशकुन इति विचिन्त्य बद्ध्वा स्वमन्दिरे नीतः ॥ ३०१ ॥

धृतस्ततो द्वादश घटिकास्ततः कृतानुतापेन । छोटयित्वा मुक्तः प्रजल्पितस्त्वं कुतः ? कथय ॥ ३०२ ॥

स जल्पति रोहेटकनगरात्समागत इह पुरे । गन्तव्यं पुनरष्टापदे जिनवन्दननिमित्तम् ॥ ३०३ ॥

प्रतिलाभितश्च द्वाभ्यामपि जनाभ्यां युवाभ्यां भक्तिकलिताभ्याम् । तस्य समीपे द्वावपि श्रावकधर्मं प्रपन्नौ ॥ ३०४ ॥

कदापि खलु वीरमती सम्प्राप्ता देवानुभावेन । अष्टापदे सर्वेऽपि जिनवराः पूजितास्तया ॥ ३०५ ॥

दृष्ट्वा तत्र यात्रां क्रियमाणां नमदमरनिकरेण । ततः प्रहृष्टहृदया समागता निजनगरे ॥ ३०६ ॥

कारिताश्च तया दीप्यद्भिरकावलिभी राजमाणाः । चतुर्विशतिः कनकमयास्तिलका मुक्तावलिकलिताः ॥ ३०७ ॥

एकैकमुद्यम्य क्रमेणाचाम्लानां विंशत्या । दत्ता गत्वाष्टापदे तया जिनेन्द्रेभ्यः ॥ ३०८ ॥

भुवनगुरुन् विभूष्य भक्त्या तत्र तिलकरत्नैः । निजगृहमागतया निश्रुतं निर्मलतपसः फलम् ॥ ३०९ ॥

तथा हि -

तपसोत्तमजन्म कान्ति र्लावण्यमुत्तमम् । तपसा रुपसमृद्धिस्तपसा सुखसम्पत् ॥ ३१० ॥

तपसा विस्तृताकीर्तिस्तपसा सुभगत्वम् । सुरा अपि पर्युपासन्ते तपोगुणरतं सदा ॥ ३११ ॥

तपसा भवन्ति लब्धयः स्वर्गो मोक्षस्तपसा च । तन्नास्त्यित्र कल्याणं तपसो यन्नजायते ॥ ३१२ ॥

इति निःश्रुत्य तया भद्र-महाभद्रादिका विविधाः । विहिता तपोविशेषा उद्यमिता जिनमतविधिना ॥ ३१३ ॥

**आउक्खयम्मि मरिउं उप्पन्ना मज्झमाऽऽउया देवी । सोहम्मे सुहभावा नामेणं खीरडिंडीरा ॥३१४॥**

**पुव्वनिबद्धायुत्तेण पाविउं पत्थिवो वि पंचत्तं । बहलीदेसे पोयणपुरम्मि नयरम्मि उप्पन्नो ॥३१५॥**

**आभीरधम्मिलाभस्स भारिया रेणुयाए गब्भम्मि । पुत्तत्ताए जायस्स धन्नओ से कयं नामं ॥३१६॥**

**परिहरियबालभावो अंगीकयजोव्वणो पुरजणस्स । चारेइ सेरहीओ पियपीऊसो सुरो व्व सया ॥३१७॥**

**अह अन्नया य यमलियनहंगणे नवधणम्मि संपत्ते । गलगज्जंते आसारवारिधाराहिं वरिसंते ॥३१८॥**

**उत्तत्तकणयसमविज्जुपुंजउज्जोयमाणभुवणयले । विप्फुरियफारमणिकिरणबंधुरं सक्कचावम्मि ॥३१९॥**

**जाए कद्दमिलपहे नीलंकुररेहिरे धरावलए । दिसिदिसिरडंतदद्दुरकडुरवपरिपूरिए भुवणे ॥३२०॥**

**मंडियउद्दंडसिहंडिमंडलीतंडवम्मि मणहरणे । नवइंदगोवराईविरायमाणे महीवलए ॥३२१॥**

**वियसियकयंबमहुपाणमत्तपरिभमिरभमिरनिउरुंबे । फुट्टंतकेयईगंधवासियासेसदिसिचक्के ॥३२२॥**

**एवंविहधणसमए महिसिसमूहस्स चारणगएणं । दिट्ठो उस्सग्गठिओ साहू नमिऊण भत्तीए ॥३२३॥**

**भणियं च तेणं भयवं ! सेरहमारुहिय वसिममल्लियह । पभणइ मुणी न कप्पइ साहूणं वाहणारुहणं ॥३२४॥**

**तो पंकिलम्मि मग्गे मंदं मंदं मुणी समं तेण । इरियावहं नियंतो पत्तो पुरपरिसरुद्देसे ॥३२५॥**

**भणिओ य तेण भयवं ! वीसमसु खणंतरं तरुतलम्मि ! । जाव कुडुंबनिमित्तं नियवावारं करेमि अहं ॥३२६॥**

**दुद्धासु सेरहीसुं हिययम्मि पवड्ढमाणपरिणामो । स कयत्थंमन्नंतो अप्पाणं पुलइयसरीरो ॥३२७॥**

---

आयुःक्षये मृत्वोत्पन्ना मध्यमायुष्या देवी । सौधर्मे शुभभावान्नाम्ना क्षीरडिण्डिरा ॥ ३१४ ॥

पूर्वनिबद्धायुस्त्वेन प्राप्य पार्थिवोऽपि पञ्चत्वम् । बहलीदेशे पोतनपुरे नगर उत्पन्नः ॥ ३१५ ॥

आभीरधर्मिलाभस्य भार्याया रेणुकाया गर्भे । पुत्रत्वेन जातस्य धन्यकस्तस्य कृतं नाम ॥ ३१६ ॥

परिहृतबालभावोऽङ्गीकृतयौवनः पुरजनस्य । चारयति शैरभीः पीतपियुषः सुर इव सदा ॥ ३१७ ॥

अथान्यदा च यमलितनभोङ्गणे नवघने सम्प्राप्ते । गलगर्जति आसारवारिधाराभि र्वर्षति ॥ ३१८ ॥

उत्तप्तकनकसमविद्युत्पुञ्जोद्योतमानभुवनतले । विस्फुरितस्फारमणिकिरणबन्धुरे शक्रचापे ॥ ३१९ ॥

जाते कर्दमिलपथे नीलाङ्कुरराजमाने धरावलये । दिशोदिशरटन्तदर्दुरकटुरवपरिपूरिते भुवने ॥ ३२० ॥

मण्डितोद्दण्डसिंहमण्डलिताण्डवे मनोहरणे । नवेन्द्रगोपराजीविराजमाणे महीवलये ॥ ३२१ ॥

विकसितकदम्बमधुपानमत्तपरिभ्रमन्निकुरुम्बे । स्फुटत्केतकीगन्धवासिताशेषदिक्चक्रे ॥ ३२२ ॥

एवंविधघनसमये महिषिसमूहस्य चारणगतेन । दृष्ट उत्सर्गस्थितः साधुर्नत्वा भक्तया ॥ ३२३ ॥

भणितं च तेन भगवन् ! शैरभमारुह्य वसिममुपसर्पत । प्रभणति मुनि र्न कल्पते साधूनां वाहनारोहणम् ॥ ३२४ ॥

ततः पङ्किले मार्गे मन्दं मन्दं मुनिः समं तेन । इर्यापथं पश्यन्प्राप्तः पुरपरिसरोद्देशे ॥ ३२५ ॥

भणितश्च तेन भगवन् ! विश्रामय क्षणान्तरं तरुतले । यावत्कुटुम्बनिमित्तं निजव्यापारं करोम्यहम् ॥ ३२६ ॥

दुग्धासु शैरभिषु हृदये प्रवर्धमानपरिणामः । स कृतार्थं मन्यमानात्मानं पुलकितशरीरः ॥ ३२७ ॥

सुसिणिद्धदुद्धपूरियपारिं[1] कलिऊण करयले भणइ । भयवं ! महापसायं काऊणमिमं अणुग्गहह ॥३२८॥
तो भयवया वि दव्वाइचउहसुद्धीए सुद्धमेयं ति । गिण्हित्तु तयं उवविसिय थंडिले पीयममयसमं ॥३२९॥
तत्तो तिकालवुद्धीए पत्तमाहप्पगुणविसेसेण । मुणिदाणेणं बद्धं भोगफलं धन्नएण तया ॥३३०॥
तयणु अइक्कन्ते केत्तियम्मि कालम्मि सुद्धपरिणामो । मरिऊणं हेमवए संजाओ मिहुणभावम्मि ॥३३१॥
उवभुंजिय मिहुणसुहं मरिउं सोहम्मदेवलोयम्मि । उप्पन्नो पुन्नवसा नामेणं खीरडिंडोरो ॥३३२॥
तत्तो चुओ समाणो निसढनरिंदस्स नलनरिंद ! तुमं । पुत्तत्तेणुप्पन्नो नमंतनिस्सेसनरनाहो ॥३३३॥
वीरमई वि हु चविऊण देवलोगाओ पणइणी तुज्झ । संजाया दवदंती धूया वैयब्भनरवइणो ॥३३४॥
बारसघडियामेत्तं आसि मुणी जे तए पुरा रुद्धो । तं तिव्वकम्मबंधाणुभावओ तुज्झ नरनाह ! ॥३३५॥
बारसवरिसपमाणो संजाओ दुस्सहो इहं[2] विरहो । नवनेहनिब्भराए सद्धिं दवदंतिदेवीए ॥३३६॥
जं साहुणो विइन्नं दुद्धं तुमए चउत्थजामम्मि । निस्साधारणरिद्धीकलिया तुह तेण रज्जसिरी ॥३३७॥
एईए वीरमईभवम्मि जं जिणवराण वरतिलया । दिन्ना तं भालयले तिलयो अरुणारुणो जाओ ॥३३८॥
जं पुण ताणुज्जमणं विहियं आयंबिलेहिं तेणेसा । दित्तिजुया संजाया महासइत्तेण संजुत्ता ॥३३९॥
एयं निसामिऊणं वियाणिउं तह य जाइसरणेण । पभणइ राया पणओ पुत्तं रज्जे निवेसेउं ॥३४०॥

---

सुस्निग्धदुग्धपूरितपारिं कलयित्वा करतले भणति । भगवन् ! महाप्रसादं कृत्वेममनुगृह्णीत ॥ ३२८ ॥
ततो भगवतापि द्रव्यादि चतुःशुद्ध्या शुद्धमेतदिति । गृहीत्वा तकमुपविश्य स्थण्डिले पीतममृतसमम् ॥ ३२९ ॥
ततस्त्रिकालवृद्धया प्राप्तमाहात्म्यगुणविशेषेण । मुनिदानेन बद्धं भोगफलं धन्यकेन तदा ॥ ३३० ॥
तदन्वतिक्रान्ते कतिपये काले शुद्ध परिणामः । मृत्वा हेमवति सञ्जातो मिथुनभावे ॥ ३३१ ॥
उपभुज्य मिथुनसुखं मृत्वा सौधर्मदेवलोके । उत्पन्नः पुण्यवशान्नाम्ना क्षीरडिण्डीरः ॥ ३३२ ॥
ततश्च्युतस्सन्निषधनरेन्द्रस्य नलनरेन्द्र ! त्वम् । पुत्रत्वेनोत्पन्नो नमन्निशेषनरनाथः ॥ ३३३ ॥
वीरमत्यपि खलु च्युत्वा देवलोकात्प्रणयिनी तव । सञ्जाता दवदन्ती दुहिता वैदर्भनरपतेः ॥ ३३४ ॥
द्वादशघटिकामात्रमासीन्मुनिर्यत्त्वया पुरा रुद्धः । तत्तीव्रकर्मबन्धानुभावात्तव नरनाथ ! ॥ ३३५ ॥
द्वादशवर्षप्रमाणः सञ्जातो दुःसह इह विरहः । नवस्नेहनिर्भरया सार्द्धं दवदन्तीदेव्या ॥ ३३६ ॥
यत्साधवे वितीर्णं दुग्धं त्वया चतुर्थयामे । निःसाधारणर्द्धिकलिता तव तेन राज्यश्रीः ॥ ३३७ ॥
अनया वीरमतीभवे यज्जिनवरेभ्यो वरतिलकाः । दत्तास्तद्भालतले तिलकोऽरुणारुणो जातः ॥ ३३८ ॥
यत्पुनस्तेषामुद्यापनं विहितमाचाम्लैस्तेनेषा । दीप्तियुता सञ्जाता महासतीत्वेन संयुक्ता ॥ ३३९ ॥
एतन्निशम्य विज्ञाय तथा च जातिस्मरणेन । प्रभणति राजा प्रणतः पुत्रं राज्ये निवेश्य ॥ ३४० ॥

---

१. सुस्निग्धदुग्धभृतद्रोणीम् ॥ २. इमो विरहो रं० ॥

पव्वज्जं गिण्हिस्सं तुज्झ सयासम्मि सामि ! संविग्गो । गंतूण तओ नियमंदिरम्मि सुपसत्थदिवसम्मि ॥३४१॥
पुक्खलकुमरं रज्जे निवेसिउं पणइणीए संजुत्तो । गंतुं सूरिसमीवे पव्वइओ फुरियपरिणामो ॥३४२॥
समहिज्जियसुत्त-ऽत्थो गीयत्थो नायसयलपरमत्थो । विहरइ गुरूहिं सद्धिं नलरायरिसी पहयपावो ॥३४३॥
परिपालियपव्वज्जो अणसणविहिणा विसुद्धपरिणामो । आउयखयम्मि मरिऊणुप्पन्नो तियसलोगम्मि ॥३४४॥
अज्जा वि हु दवदंती समुवज्जियपउरपुन्नपब्भारा । तस्सेव य संजाया देवी दइयाणुरत्तमणा ॥३४५॥
तत्तो वि हु चविऊणं पव्वज्जं पालिऊणमकलकं । खविऊण कम्मसेसं पत्ताइं सासयं सोक्खं ॥३४६॥

॥ दवदन्त्याख्यानकं समाप्तम् ॥१३॥

इदानीं सीताख्यानकमारभ्यते-

तच्च यथा भरतजनन्या निजवरं याचितस्य निजजनकस्य वचनं प्रमाणयन् दीर्घवियोगवशसमुच्छलद्बहलनयनाश्रुजल- प्लुतनयनयुगलेन भरतप्रमुखपौरजनेन निर्वार्यमाणोऽपि वसुन्धराभारधरणधौरेयो रूप-सौभाग्यादिगुणमणिरोहणगिरिः प्रशस्त-कलम-कलश-कलिशा-दिलक्षणलाञ्छितविग्रहः समग्रसुकुमार-शरीरावयवः पादविहारेण लक्ष्मणकुमार-जानकीसमन्वितो रामचन्द्रो नगरीतो निर्जगाम । यथा च नगरीपरिसर-जिनायतनप्रतिष्ठितं भव्यजनकमलप्रबोधनाभिनवभानुमन्तं भगवन्तं समस्तव्यसनसन्दोहसमुद्रपतितजन्तु-निस्तारणसमर्थं यानपात्रमिव प्रणम्य स्तुत्वा च 'स्वामिन् ! त्वत्पादपङ्कजं मम शरणम्' इति प्रार्थनां विधाय वनवासाय प्रतस्ते । गच्छंश्च क्रमेण गोकुलपल्लीषु 'हलाः ! हलाः ! पश्यत पश्यत शीघ्रमिमौ कौचिन्मनुष्यकौ कामदेवाकारधारिणौ पृष्ठप्रदेशसंयमिततोणीरयुगौ करकलितनिबिडकोदण्डदण्डौ, इयं च रूप-सौभाग्य-निर्जितामरसुन्दरी काचिदनयोरेवैकतरस्य कस्यचित् कान्ता भविष्यति' इति जल्पन्तीभिः प्रादुर्भवदभिनव-यौवनाभिः कौतुकाक्षिप्तमानसाभिर्वेगवशकम्पमानसमुन्नमद्घनस्तनीभिर्गोपवधूभिरवलोक्यमानः, साधर्मिक-वात्सल्यद्वारेण वज्रकर्णादीनामुपकुर्वन् कल्याणमाल-वनमालादीनां समाधानमुत्पादयन् कुलचन्द्रकेवलिपार्श्वे-प्राप्तजिनधर्मः, दण्डकारण्य-माससाद । यथा च तत्र त्रिगुप्त-विचित्र-चित्रगुप्तभिधान दर्शनप्रतिलाभनावाप्तपुण्य-वशाद् मनाक् स्वास्थ्येन तस्थुषो दिवसा निजग्मुः । यथा च शम्बकुमारपरासुतप्रापण-खड्गपहारकारण-प्रकुपितखर-दूषणाभ्यां[1] सह युध्यमानस्य लक्षणकुमारस्य सिंहनादव्याजेन रणभूमिं प्राप्तस्य रामदेवस्य 'हा तात ! हा दयितार्यपुत्र ! महापराक्रम ! भ्रातृजायावत्सल ! लक्षणकुमार ! अपह्रियेऽहं केनचित् कृतान्तभीषणेनामुना केशरिणेव कुरङ्गकान्ता' इति प्रलपन्ती रावणेन सीताऽर्तुमुपचक्रमे । यथा च-

---

प्रव्रज्यां ग्रहीष्यामि तव सकाशे स्वामिन् ! संविग्नः । गत्वा ततो निजमन्दिरे सुप्रशस्तदिवसे ॥ ३४१ ॥
पुष्कलकुमारं राज्ये निवेश्य प्रणयिन्याः संयुक्तः । गत्वा सूरिसमीपे प्रव्रजितः स्फुरितपरिणामः ॥ ३४२ ॥
समधीतसूत्रार्थो गीतार्थो ज्ञातसकलपरमार्थः । विहरति गुरुभिः सार्द्धं नलराजर्षिः प्रहतपापः ॥ ३४३ ॥
परिपालितप्रव्रज्योऽनशनविधिना विशुद्धपरिणामः । आयुःक्षये मृत्वोत्पन्नस्त्रिदशलोके ॥ ३४४ ॥
आर्यापि खलु दवदन्ती समुपार्जितप्रचूरपुण्यप्राग्भारा । तस्यैव च सञ्जाता देवी दयितानुरक्तमना ॥ ३४५ ॥
ततोऽपि खलु च्युत्वा प्रव्रज्यां पालयित्वाकलङ्कम् । क्षपयित्वा कर्मशेषं प्राप्तौ शाश्वतं सौख्यम् ॥ ३४६ ॥

॥ दवदन्त्याख्यानकं समाप्तम् ॥ १३ ॥

---

१. भ्यां चतुर्दशसहस्रसुभटैः सह-रं ।

मा भैषीः पुत्रि सीते ! व्रजति मम पुरो नैष दूरं दुरात्मा, रे रे रक्षः ! क्व दारान् रघुकुलतिलकस्यापहृत्य प्रयासि ?

चञ्च्वाक्षेपप्रहारत्रुटितधमनिभिर्दिक्षु विक्षिप्यमाणमाशापालोपहारं दशभिरपि भृशं त्वच्छिरोभिः करोमि ॥१॥

इति तामाभाषयता–

स्फूर्जद्वज्रकठोरचञ्चुनखरं प्रान्तप्रहारस्फुटद्भालश्रेणिगलत्कदुष्णरुधिरच्छन्नेक्षणाऽम्बरः ।

अन्धीभूय विहङ्गराजहृदयप्रत्तप्रहाराकुलस्तस्थावुज्झितविक्रमो दशमुखः खड्गं परिभ्रामयन् ॥१॥

इति नियुध्यमानेन सता जटायुपक्षिणा तादृशोऽपि रावणो विलक्षीकृतः । यथा च तेन प्रकुपितेन दृढपार्ष्णि-प्रहारेण वराकोऽसौ पञ्चत्वं प्रापितः । यथा च ततः स्थानात् कुररीव सकरुणं क्रन्दन्ती कालरात्रिरिव स्वकुलस्य कालपाशवशीकृतेन तेनापहृत्य लङ्कां प्रापिता । यथा च 'यावद् भर्तृवार्तां नोपलभे तावद् न भोक्ष्येऽहम्' इति विहितनियमा जिन-गुरुचरणकमलबहुमानपरायणा प्रत्यहं पञ्चपरमेष्ठिनमस्कारवासितान्तःकरणा नानाप्रकार-पिशिताशनप्रचुरप्रार्थनप्रवणवचनैः पवनैरिव कनकगिरिचूडा निष्प्रकम्पा पुरीपरिसरो[२]पवनपादपस्याधः पिशाचपतिप्रणयिनीभिः परिवृता तस्थौ । यथा च वलितेन रामदेवेन लतागृहे सीतामपश्यता म्रियमाणं जटायुपक्षिणमवलोक्य 'केनाप्यपहृता सीता निश्चिक्ये आः ! पापीयान् कुलपांशनः श्वेव परोक्षापकर्ता मदीयकान्तामपहृत्य क्व यास्यति ?' इत्यहङ्कृत्याऽनन्तरं हृदयसंघट्टेन मुमूर्च्छ, लब्धचेतनश्च शोकवशविलुप्त-विशिष्टविवेको यत् किञ्चित् पशु-तरु-लतादिकं पश्यति तत् 'सीता सीता' इति व्याहरन् एकदा गिरिगुहागह्वरमशिश्रियत् । तत्र च कुलिशशिखरखरनखरचरणचपेटापाटितकरटिविकटकुम्भस्थलविगलन्निस्तुल-स्थूलामलमुक्ताफलप्रकरापहारविच्छुरितगिरितटं प्रज्वलज्ज्वलनज्वालाकलापकपिलविकटकेसरसटासङ्कट-स्कन्धपीठं सुखसुप्तोत्थितं सिंहमेकमद्राक्षीदप्राक्षीच्च-सखे कण्ठीरव ! कच्चित् तदीयतनूदरदेशेनोपमितत्वदीयोदर-देशां स्वनितम्बबिम्बवितत्वदीयविकटकटीभागां मन्दभाग्यदुर्लभां भुवोभूषणभूतां भामिनीमेकामुपलब्धवानसि ?' इत्यापृच्छ्य पुरो व्रजन् सुस्निग्धदलपटलावलुप्तप्रतपच्छससप्तिकिरणकलापं प्रादुर्भवदपरापरारुणारुणप्रवाल-परम्पराकिरणनिकररञ्जितदिक्चक्रवालं तदीयकुसुमस्तबककिञ्जल्कभ्रान्तिभ्रमद्भ्रमरनिकररणत्कार-बधिरितदिगन्तरं तरुणतरमेकमशोकतरुमपश्यदलपच्च-

'रिक्तस्त्वं नवपल्लवैरहमपि श्लाध्यैः प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे ! मामपि ।

कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः, सर्वं तुल्यमशोक ! केवलमहं धात्रा सशोकः कृतः ॥१॥

तद् यदि तदीयकर-चरणानुकृतनवदिनकरकिरणकरम्बितत्वदीयबालप्रवालां बालामस्मिन्नरण्ये सञ्चरद्-दुष्टश्वापदभीषणेभ्रमन्ती भवान् क्वचिदैक्षिष्ट ततो विस्पष्टमाचष्टां मह्यमदृष्टदुष्टकर्मकृतकष्टाय' इति तमशोकं पप्रच्छ । अथो अतुच्छस्वच्छपयःसम्भाररङ्गत्तरङ्गावलीविलसत्कलकूजितकलहंस-कुरर-कारण्डव-चक्रवाक-प्रभृतिपतत्त्रिचक्रवालविराजत्कमलसरोवरावतंसायमानाऽमन्दमकरन्दरसलुभ्यद्भ्रमरमालालेलिह्यमानमेकं नीलोत्पलमदर्शदवादीच्च-

---

२. वनदेवरमणोद्यानपादपस्याधः पिशाचपतिप्रणयिनीभिः त्रिजटाराक्षसीपरिवृता-रं० ।

अरे रामाहस्ताभरण ! भसलश्रेणिशरण !, स्मरक्रीडाव्रीडाशमन ! विरहिप्राणिदमन ! ।

सरोहंसोत्तंस ! प्रवरदल ! नीलोत्पल ! सखे ! सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना ? ॥१॥

इत्यादि बहुविधं प्रलपन् यावदास्ते तावत् सम्बकुमारमरणप्रादुर्भवत्पराभवमहासमरसंरम्भपराजिता-परराजखरदूषणत्रिमुण्डराजगजघटासंघट्टनिर्भयप्रादुर्भवत्सुभटभण्डनप्रभविष्णुजिष्णुभटपरम्परा-[ परा ]-भवोपलब्धजयश्रीसमालिङ्गितविग्रहः पर्यन्तितविग्रहो लक्ष्मणकुमारस्तंप्रदेशं प्रापत् । अथतदवस्थं रामदेवं समालोक्य 'धिक् कष्टम्, किममुष्यासह्यं दुःखमजनि येनायं विह्वलो विलोक्यते ?' इति परिभावयतस्तस्य रामदेवः सोत्कण्ठं कृत्वा 'हा वत्स ! हता हतविधिना, मुषिता मन्दभाग्या वयम्, यतो भवद्भ्रातृजाया केनाप्यपहृता' इति मुक्तमहासूत्कारमरोदीत् । लक्ष्मणोऽपि तत् श्रुत्वा शोकवशाद् ध्रियमाणोऽपि रामदेवेन बलाद् मूर्च्छया भुवः पृष्ठे पपात । पुनरप्युपलब्धचेतनोऽनेकधा प्रलप्य स्वयमेव सत्त्वमेव सत्त्वमवलम्व्य 'स्वामिन् ! मा व्रज विषादम्, ईदृशमेवास्य संसारस्य स्वरूपमसारमिति ।

अपरं च—

गतं मृतमतिक्रान्तं न शोचन्ति विपश्चितः । गतं गतमतिक्रान्तमतिक्रान्तं मृतंमृतम् ॥१॥

तथा च—

संसारे वसतामिह कुशलं किं पृच्छ्यते शरीरभृताम् ? । पतितस्य दहनराशौ दग्धोऽसि न वेति कः[1] प्रश्नः ? ॥२॥'

इति चिरन्तनमुनिवचनै रामदेवं स्वस्थयाञ्चकार । ततश्च जन्मान्तरसम्बन्धविटसुग्रीवविनाशनोपकाराभ्यां मिलितसुग्रीवादिसमग्रवानरसैन्यः सीतान्वेषणाय हनूमन्तं लङ्कायां प्राहिणोत् । यथा च तेन सुभटशिरोमणिना आसालीव विनाशनेन प्रकटितात्मना सानन्दरावणकान्तापरिवृता कृशतनुर्निष्कलङ्का तारान्विता द्वितीयाशशिकलेव सीताऽवलुलोके । समाश्वासिता[2] च रामदेव-लक्ष्मण-कुमारकुशलवार्तानिवेदनेन । भणिता च 'मातर् ! आरोह मम पृष्ठे, किं करिष्यति मम रावणः ? नयामि निजस्वामिपार्श्वे त्वम्' इति । अभिहितं च तया-'नाहं वत्स ! एवमागमिष्यामि, त्वं पुनः शीघ्रं गत्वा आर्यपुत्रादीनां निवेदय कुशलोदन्तम्, अक्षताऽहं देहशीलाभ्यां तिष्ठामि' इति सीतया प्रेषितः[3] । तदनु च तेन समुत्पत्य गगने विधूय बाहुपञ्जरं 'कथमहं पवनाङ्गजो हनूमानिहायातो ज्ञास्ये ?' इति मनसि विचिन्त्य उपवनतरुभञ्जनेन तद्रक्षःकुमारादिगञ्जनेन तैस्तैः प्रकारैः सीतामनोरञ्जनेन नागपाशत्रोटनेन रावणपराभवसम्पादनेन विजजृम्भे यथा च प्रासादतोरणानि भंक्त्वा राक्षसभटानां मुखे धूलीं दत्त्वा पश्यतामपि लङ्कानगरीतो निर्गत्य रामदेवं प्रति प्रत्याववृते । प्रत्यावृत्त्य च तथा तेनहनूमता गगनचारिणा दीर्घसन्तापहारिणी विशिष्टसम्पत्तिकारिणा समुन्नतेन घनेनेव विलसत्कलापं परमुत्कं केकिकुटुम्बमिव रामदेवादिनृपवृन्दममृतवर्षिणेव सीतावृत्तान्तनिवेदनेनाऽऽनन्दितम् । यथा च तंश्रुत्वा त्रिवलीतरङ्गभीषणललाट-पट्टैनैकैकेनाहङ्कुर्वता सम्भूय रामदेवादिभटसमूहेनापारपारावारमतिक्रम्य हंसद्वीपे सेनां निवेश्य रावणेन सह योद्धुमारेभे । यथा च महासमरसंरम्भसम्मर्देन विनाश्य रावणम्, अभिषिच्य लंकाया राज्ये बिभीषणम्, स्थित्वा

---

१. किं-रं० । २. ता. मुद्रार्पणेन च राम० रं० । ३. प्रेषितः चूडारत्नः । तदनु-रं० ।

कियन्तमपि कालम्, मत्वा च नारदवचनाद् मात्रादिवर्गं बहुवर्षसमुद्भूतप्रभृतवियोग[ दुःख ]दुःखितम्, निर्वाहितनिजप्रतिज्ञः सार्धं च राक्षसराज-वानरेन्द्रचमूचक्रेण, समारुह्य च सह जानक्या रणन्मणिघटितघण्टार-वाडम्बरं पुष्पकविमानम्, 'प्रिये ! पश्य समुद्रोऽयम्' इत्यादि वस्तुजातं दर्शयन्, तेनैव यथा बिभीषणपुनर्नवीकृतां शत्रुभिरयोध्यामयोध्यामाजगाम । तत्र च बन्धुजनपरिवृतः सुग्रीवादि समस्तभटविभाजितदेशो निष्कण्टकं राज्यसुखमनुभवन् महाजनात् सीतापवादमाकर्ण्य वज्राभिहत इव-

अकार्ये तथ्यो वा भवतु वितथो वा किमपरं, तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः ।

तुलोत्तीर्णस्यापि प्रकटनिहताशेषतमसो, रवेस्तादृक् तेजो नहि भवति कन्यां गत इति ॥१॥

माहात्म्यभ्रंशभीतो जानन्नपि निर्दोषां सीतामरण्यान्यां त्याजितवान् । तस्यां च दुष्टश्वापदायामटव्यामेकाकिनी सुकुमारसर्वावयवा गर्भभारालसा भयभीतमानसा मूर्च्छामगमत् । तदुपरमे च 'हा तात ! हा मातः ! हा भ्रातः !' इति बहुप्रकारं प्रलप्य [१]मनाग् विवेकवशादेवं चिन्तितवती-जीव ! क्व ते देव-गुरवः ? क्व ते जनकादयः स्वजनाः ? क्व तद् राज्यसुखम् ? इति, ईदृश एव चायं लोकः ।

यतः—

जन्म-जरा-मरणभयैरभिद्रुते व्याधि-वेदनाग्रस्ते । जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥१॥

तथा—

पुनरपि सहनीयः कर्मपाकस्तवायं, न खलु भवति नाशः कर्मणां सञ्चितानाम् ।

इति सह गणयित्वाद्यद् यदायाति सम्यक्, सदसदिति विवेकोऽन्यत्र भूयः कुतस्ते ? ॥१॥

किञ्च रे जीव ! विपत्प्रचुरे संसारे वर्तमानः किं विपद्भ्यो बिभेषि ? तथा हि—

संसारवर्त्यपि समुद्विजते विपद्भ्यो यो नाम मूढमनसां प्रथमः स नूनम् ।

अम्भोनिधौ निपतितेन शरीरभाजा संसृज्यतां किमपरं सलिलं विहाय ? ॥१॥

पुनरपि मोहवशाद् 'आः पाप जीव ! किं न म्रियसे ? कियदद्यापि जन्मान्तरनिर्वर्तितं पापमनुभवनीयमस्ति येनैवं निर्दोषोऽपि दुःसहं स्वजनतः पराभवं सहसे ? । तथा हि—

दृष्टा बन्धुविपत्तयः परिजने सीदत्यपि प्राणितं यातं भग्नमनोरथैः प्रणयिभिर्याच्ञागिरः शिक्षिताः ।

यद्यद्यापि न तोषमेषि भगवन् । धातस्तदादिश्यतां शक्ताऽहं प्रियजीविता स्वजनतः सोढुं निकारानपि ॥१॥

इति दैवमुपालभमाना दृष्टा तदनुकूलकर्मोदयात् सर्पक्रीडकपुरुषेणेव नागसंयमनाय समागतेन स्वकीयपितृस्वसृजनेन वज्रजङ्घनरपतिना । नीता च तेन सगौरवं निजनगरीम् । स्थिता च तत्र मनाक् सुखिता नीतिरिवार्थ-कामौ, धर्मपरिणतिरिव स्वर्गाऽपवर्गौ, सद्गुरुसेवेव समयपाठ-परमार्थौ, कुलीनसङ्गतिरिव विनय-वर्णौ, पात्रदानपरिणतिरिवेहलोक-परलोकौ, समस्तलक्षणोपेतौ पुत्रौ सुषुवे । तौ च क्रमेण निरुपद्रव-निरपायगिरिनिकुञ्जालीनौ चम्पकपादपाविव प्रवर्धमानौ क्रमेणचाभ्यस्तकलाकलापौ रमणीमनोमोहनं

१. मानाद् विवे० रं० ।

यौवनमनुप्राप्तौ । परिणायितौ मातुलेन रतिरूपा: कन्यका: । साधिताश्च ताभ्यां स्वपराक्रमेण दु:साधा अपि देशा: । कालेनाशीर्वाददानपुर:सरं नारदेन योधितौ जनकाभ्यां सह पुनरपि तेनैव निवेदितवृत्तान्तौ प्रणतौ प्रणयप्रधानं पादयो: । प्रवेशितौ च प्रवरजयवारणस्कन्धसमारूढौ ध्रियमाणश्वेतातपत्रौ दोधूयमानशरच्चन्द्रचन्द्रिका-रुचिरचामरयुगौ तदीयलावण्यामृतरसं नयनाञ्जलीभि: पिबन्तीभि: पौरवनिताभिर्वर्ण्यमानौ 'हला हला: ! पश्यत पश्यत ताविमौ सीतापुत्रौ, यकाभ्यामुदरस्थिताभ्यां सीतादेवी वने मुक्ता' इति प्रजल्पन्तीभिर्नागरकवधूभिर्वर्ण्यमानौ सदाख्यातकृत्प्रकरण-चतुष्कालङ्कृतं शब्दव्याकरणमिव राजभवनम् । अथादृष्टपूर्वं गुणवत्प्रियपुत्रसमाग-मजनितमनाख्येयमानन्दमनुभवन् रामदेवो विज्ञप्तो बिभीषणादिभि:-देव ! धर्मक्रियेव करुणाविकला, सुगुरुकुलावस्थितिरिव भक्तिरहिता, राज्यस्थितिरिव नीतिविनाकृता, तनुरिव दृगपाकृता, रसवतीव लवणरसवत्तां त्याजिता, शास्त्रसम्पत्तिरिव प्रशमपरिणतिपरित्यक्ता, महिलेव अपत्यसन्ततित्यक्ता, विभवसम्पत्तिरिवाहृ-तिनिर्मुक्ता, गन्धर्व-विद्येव तालमानक्रियारहिता, शेषगुणसमन्विताऽपि नगरी इयं देवीं विना न शोभते तत् प्रसादं विधायाऽऽनीयतामिति । ततस्तदुपरोधेन प्रेषिता: प्रधानपुरुषा: तैरपि सविनयं प्रणम्य भणिता सीता । यथा-देवि ! त्वदानयनाय देवेन रामदेवेन वयं प्रेषिता:; तथाऽप्यभिहितम्-कोऽयं रामदेव: ? पर्याप्तं मम तन्नाम्ना, रामदेवतरुच्छायायामपि नाहं विश्राम्यामि, किमहमद्यापि न लभे सुखेन स्थातुम् ? इति । तैरप्याग्रहं विधाय समानीता । भणिता च रामदेवेन-देवि ! क्षमस्व ममैकमपराधम्, पालय सह पुत्राभ्यां राज्यम्, अनुभव पञ्चप्रकारं विषयसौख्यं विधाय शुद्धिमात्मनो जनसमक्षम्, सर्वं भवदीयमिदं हस्त्यश्वरथादीनि । तयाप्यभिहितम्-आ:न्मायाविन् ? कियदद्यापि सन्तापयसि, भवतु भवत्वमीभिरधरान्तरजल्पितै:, पर्याप्तं मम विषयसौख्येन यत् पुनरवादी: 'शुद्धि विधाय' इति तत्र प्रगुणाऽहम्, किं मम सकलङ्कया जीवितेन ? येन केनचिद् दिव्येन जन: प्रत्येति तदहमङ्गीकरोमि, परं किमन्यै: शरीरसापेक्षै: कातरजनाचरितैदिव्यै: ? मम तावदयमभिप्राय:-प्रविशामिज्वलज्ज्वालाकलापजटिले महति विभावसौ, यदि ततोऽहं शुद्धा सार्धषोडशकवर्णिकावर्णनीय-स्वर्णमयशलाकेव निर्गता तत: प्राणान् धारयामि । ततो जनेन प्रतिपन्ने खानिता हस्तशतत्रयप्रमाणा चतुरस्रा वापी । पूरिता निरन्तरं निविरीशसारश्रीषण्डादिप्रधानकाष्ठै: । तदनु च स्नाता स्वच्छश्रीषण्डविलेपनविलिप्त-तनुर्निवसितधवलवसना सरस्वतीव विद्वज्जनमान्या महासती सीता समागता चितासमीपे । श्राविता च तया स्मृत्वा भगवन्तं व्यसन-शतनीरनिधिनीरनिमग्नजन्तुसन्ताननिस्तारणसमर्थं सबहुमानं निजमानसे पञ्चपरमेष्ठिनमस्कारं कौतुकवशागतसबालवृद्धनगरीजनसमक्षम्-'भो भो लोकपाला: शृण्वन्तु भवन्त:,श्रूयतां प्रतिपन्नसर्वज्ञ-शासनसत्त्वसन्तानत्राणरसिके शासनदेवि ! यदि मया रामदेवप्रभुं निजपतिं स्वजनकजनकदत्तं मुक्त्वा मनसाऽप्यपरं पुरुषान्तरमभिलषितं ततोऽयं भगवान्कृशानुर्यदुचितं तत् करोतु इति वदन्ती स्वकी[ य ]-शुचिशीलभरवस[ न ]केन भयरहिता सरभसमुपसृत्य सीता समारूढा पश्यतां पौराणां द्वादशकल्पप्रभुपदवीमिव परमप्रभावकाष्ठां पुण्यचिताम् । दृष्टा च कृतपद्मासना पद्मेन पद्मासना पौरजनेन । तदनु च भणितं पुरवृद्धै:-अहो ! केनाप्युपायेन सुखतरेणापि शुद्धिरभविष्यत् किमनया एवमध्यवसितम् ? यदि वा सुकरमेवैतद् मिथ्यारोपितकलङ्कानां महासत्त्वानां सत्त्वानाम् । भणितं च—

लज्जां गुणौधजननींजननीमिवार्यामत्यन्तशुद्धहृदयामनुवर्तमाना: ।

तेजस्विन: सुखमसूनपि सन्त्यजन्ति सत्यस्थितिव्यसनिनो न पुन: प्रतिज्ञाम् ॥१॥

अभिहितमपरैर्मध्यमवयोभि:-राजान: खल्वेते मस्तकमध्येन वर्तिनीं कुर्वन्ति, किं केनापि करी कर्णे ध्रियते ? करभो वा करण्डके क्रियते ? अन्यथा किमेवंविधं पात्रमेवं विडम्ब्यते ? । अभाणि च तरुणनरै:- नूनमयं राजा मूर्खो य एवविधं देवानामपि दुर्लभं भोगयोग्यं च कलत्रं विनाशयति । प्रोक्तं च पौरवृद्धाभि:- भगवन् वैश्वानर ! शोधय सीताम्, अस्मज्जीवितेनापि चिरं जीवतु, निजभर्तुर्भोगभाजनं भवत्विति । अवादि चमध्यममहेलाभि-आ मात: ! किमनया मूर्त्या एवंविधं पापं क्रियते ? । जल्पितमुच्छृङ्खलतरुणीभि:-हला हला: ? पश्यत सीतासदृशी नान्या नारी रूपवती, तत् किमेषा जनापवादभीता म्रियते ? वञ्चयत्यात्मानं खादन- पानेभ्य:, मृता मृतैरपि न दृष्टा: ।

सर्वथा स्वहितमादरणीयं, किं करिष्यति जनो बहुजल्प: ? ।

विद्यते हि न स कश्चिदुपाय:, सर्वलोकपरितुष्टिकरो य: ॥१॥

अत्रान्तरे सीतावचनेन दत्त: समन्तादग्नि: । तदनु च सीताशोकेनेव श्याममुखैर्मेघपटलैरिव वाप्या परित: पीयूषपायिपदवी धूमनिवहै: । पश्चाच्च विद्युच्चमत्कारैरिव कृतान्तजिह्वाकरालैर्व्यानशे अनिमिषवर्त्म ज्वलज्ज्वलनजटिलैर्ज्वालाकलापै: । अत्रान्तरे समुत्थितो हाहारव:-'हा ? मन्दभाग्या वयं क्व पुनरपि सर्वज्ञप्रतिमाया इव शान्तनयनायास्तव मुखं देवि ! द्रक्ष्याम: ?' इति प्रलपितुं लग्ना: पौरजना: । 'हा वत्से ! पुण्यविकला वयं किल वृद्धभावं त्वत्साहाय्येन गमिष्याम:' इति मनोरथा विफला अभूवन्निति बहुप्रकारं प्रलपितुं लग्ना अपराजितादय: । 'हा मातमात: ! किलाहं तव यावज्जीवं विनयं करिष्यामि, रावणमारणप्रयासो निष्फल: सञ्जात:' इति सदु:खं सराजचक्रश्चक्रन्द सुचिरं चक्रधरो लक्ष्मणकुमार: । किं बहुना ? तत्र प्रस्तावे स कोऽपि नास्ति यो न तद्दु:खेन दु:खितो मुक्त्वैकं वज्रकठोरहृदयं रामदेवमिति । एवं यावद् आक्रन्दन्ति तावत् क्षणेन दृष्टा वापी पुण्यवत्पुरुषभवनपरम्परेव कमलालया, क्वचिन्महाराजसभेव राजहंससमन्विता, क्वचिद् रम्यरामा- कटिस्थलीव सारसनादितगुणरमणीया, क्वचिद् गगनवीथीव विलसन्मकराकीर्णा, क्वचिद् महाराजसेनेव यन्त्ररथविराजिता, क्वचित् स्वर्गपुरीव हरिशोभिता । यावत् क्षणाद् दृष्टं पद्ममेकं ईश्वरभवनमिव विलसत्पत्रम् गगनाङ्गणमिव सन्मकरन्दराजितारकविलासरमणीयं, मुनिवृन्दमिव विभ्रमरहितं, सिंहस्कन्धपृष्ठमिव विलसत्केसरम् । दृष्टा च तदुपरि सुखसमासीना मन्दभाग्यानां दुर्लभा सकलजननयनानन्ददायिनी लक्ष्मीरिव सीता । ततश्च 'अहो ? शुद्धा शुद्धा' इति समुच्चशब्दमुच्चारयद्भि: सानन्दं दत्ता: समकालं जनैर्हस्तताला: [1]समुत्तीर्णा सीता तदारूढा । ततो रामदेवोऽपि सीतामागच्छन्तीं सरास्त्रियमिव विलसत्कमलाध्यासितां विस्फुरद्धारतारपयोधरां निर्वर्ण्यमाननिर्मलाधरां समानन्दितराजहंसां समालोक्य भविष्यतीयं तथैव मे प्रणयपात्र- मित्यनुरागवशात् शृङ्गारवान्, तथा मामनुचितकर्मकारिणं विशिष्टजना उपहसिष्यन्तीति सविलक्षहास्यसहाय:, कथमियं मया निर्दयेन शिरीषकुसुमसुकुमारशरीरा कष्टमेवंविधं कारितेति सकरुण:, तथा कदाचिन्मामपराधका-

१. ०त्तीर्णा तीरं तदा रं० ।

रिणमभिनिवेशादवगणय्य कश्चिजनकादि: यदि स्वीकरिष्यति ततस्तमुपमर्द्यापि ग्रहीष्यामीति रौद्ररसाविष्ट:, तथा अत एव कारणाद् यद्यसौ जनकादि: मया सह संग्रामयिष्यति तत: खड्गबलेनापि तं पराजित्यामुमङ्गीकरिष्यामीति वीररसप्रवर:, तथा निष्करुण ! भवतु त्वया सह सङ्गमेन दृष्टं मया तव स्नेहमध्यं को म्रियमाणानां मरिष्यतीति स्त्रीजनसुलभमाग्रहमवलम्ब्य मम प्रार्थयमानस्यापि वचनमवमंस्यत इति सभय:, तथा धिक् त्वां जीव ! विषयपरवशेयमात्मनो विशुद्धिनिमित्तमेवमध्यवस्यति त्वं पुनरद्याप्येतन्निमित्तं रणादिकं करोषि किमेतस्य श्यामलजम्बालपूर्णशरीराया मध्ये त्वया दृष्ट[ म् ? इति ] बीभत्सरसपरवश:, तथा पश्य शीलमाहात्म्यमस्या येन तत्प्रभावाज्ज्वलज्ज्वालाकलापजटि[ ल ]ज्वलनादप्यक्षतशरीरा निर्गतेत्यद्भुतरसानुगत:, तथा धन्या: पुण्यवन्तस्ते केचन ये एवंविधं विषमस्वभावं प्रेमापहाय प्रव्रज्यां प्रतिपद्य शान्तमूर्त्तय: तप: समाचरन्तीत्यभिनवनवरससङ्कीर्णतामनुभवन् यावन्न किञ्चिद् जल्पति तावत् सर्वजनसमक्षं विधाय शिरसि कराञ्जलिं भणितं सीतया प्रभो ! त्वत्प्रसादान्मयाऽनुभूतं राज्यसुखम्, आरूढा पुष्पकविमानम्, पूरितानि कौतुकानि, यत् पुनरीदृशानि व्यसनानि तत्र न तेऽपराधो नाप्यन्यस्य कस्यचित्, ममैव जन्मान्तरजनितस्य कर्मणो विलसितम्, साम्प्रतं भीताऽमुतो व्यसनशतभीमाद्भववासात्, मुञ्च माम्, प्रव्रजामि, मदीयं भवतो निखिलनागरिकनरनारीनिकरस्य च मिथ्या दुष्कृतमिति [१]प्रशस्तपरिणतिरूपं तद्वच: श्रुत्वा प्रत्यागतचित: पूरितगलसरणिर्विगलिताश्रुलोचन: संस्मृत्य तया सह विलसितं संस्तम्भितमूर्तिर्मूर्च्छित: । यावत् तं चेतना लम्भयन्ति तावत् सीताऽनुकूलकर्मपरिपाट्या तत्र प्रस्तावे पूर्वमेव समवसृत: सार्वभूतिसूरि: । तेन च प्रव्राज्य समर्पिता सुप्रभप्रवर्तिन्या: । तत्र चासौ षष्ठा-ऽष्टमादितपश्चरणशोषितशरीरा परिपाल्याऽऽत्मानमिव निष्कलङ्कं प्रव्रज्यापर्यायं पर्यन्ते सम्यक्प्रतिपन्नप्रायश्चित्ता पञ्चपरमेष्ठिनमस्कारस्मरणपरायणा प्रतिपद्यानशनं प्रवर्धमानप्रशमपरिणामा मृत्वा प्राप्ता द्वादशकल्पपीयूषपायिप्रभुपदवीमिति । यथा च शेषं बिभीषणपृष्टं तस्या: कलङ्ककारणं राम-रावणयोर्वैरनिमित्तं सुग्रीव-रामदेवयोस्तु प्रतिबन्धकारणं तत् सर्वं रामदेवचरिताद् इहैव वा किञ्चिद् भणिष्यमाणनमस्कारफलप्रतिपादनपरगोकथानकादवसेयम् ।

### इदानीं रोहिण्याख्यानकमारभ्यते । तच्चेदम्-

पाडलिपुत्तम्मि पुरे कामिणिमणकमलमहुयरजुवाणो । नन्दो नरिंदो तिव्वपयावो दिणमणि व्व ।।१।।

तत्थ नरेसरपज्जंतपउरसम्माणमंदिरं आसि । चंदो इव समयजुओ धणावहो नाम वरसेट्ठी ।।२।।

विप्फुरियकंतिजुत्ता वरचित्ता तरलतारया कंता । तस्स मयलंछणस्स व नामेणं रोहिणी भज्जा ।।३।।

---

इदानीं रोहिण्याख्यानकमारभ्यते ।

पाटलिपुत्रे पुरे कामिनिमन:कमलमधुकरयुवा । नन्दो नाम नरेन्द्रस्तीव्रप्रतापो दिनमणिरिव ।। १ ।।

तत्र नरेश्वरपर्यन्तप्रचूरसन्मानमन्दिरमासीत् । चन्द्र इव समृगयुतो धनावहो नाम वरश्रेष्ठी ।। २ ।।

विस्फुरत्कान्तियुक्ता वरचित्ता तरलतारका कान्ता । तस्य मृगलाञ्छनस्येव नाम्ना रोहिणी भार्या ।। ३ ।।

---

१. प्रशमपरि-रं० ।

**अवरं च तस्स आबालकालपरिपालियं हिययदइयं । मज्जार-सालहीणं जुवलं भवणम्मि संवसइ ॥४॥**
**अह अन्नया निसाए संजाया सेट्ठिणो मणे चिंता । उवभुंजिउं न जुज्जइ जणस्स जणणि व्व जणयसिरी ॥५॥**
**ते च्चिय जियंतु भुवणेक्कभूसणा माणवा गुणगरिट्ठा । जे नियविढत्तदविणेण दिंति दाणं अणाहाण ॥६॥**
**खज्जन्ती परिवद्धइ कंडू न उणो कयाइ धणरिद्धी । ता दविणज्जणकज्जे उज्जमियव्वं सुपुरिसेहिं ॥७॥**
**इय चिंतिऊण पउणीकाऊण कयाणगाणि बहुयाणि । दविणज्जणिक्कचित्तो पयंपए पणइणिं एवं ॥८॥**
**ससिवयणि ! मज्झ गमणं होही देसंतरम्मि दविणकए । तुमए अपमत्ताए भवणं परिरक्खियव्वमिणं ॥९॥**
**अवरं च सुयणु ! मज्जार-सालहीजुयलमिममईवपियं । संभालेज्जसु तिक्कालमेव संभासणाईहिं ॥१०॥**
**छणहरिणलंछणामलसीलं रमणीयणस्स निच्चं पि । मंडणमकित्तिमं ता पालेयव्वं पयत्तेण ॥११॥**
**तो सालहीए भवणं भलाविउं पणइणिं विसेसेण । मज्जारं पि हु नियकरयलेण अंगे परामुसिउं ॥१२॥**
**सम्माणिऊण सव्वाणि ताणि सेट्ठी पसत्थनक्खत्ते । भरिए कयाणगाणं वहणम्मि तओ समारूढो ॥१३॥**
**तरिउं तरंगिणीणं नाहं रंगंतलहरिसंदोहं । पत्तो कमेण सिंहलदीवे एत्तो य णंदनिवो ॥१४॥**
**आरूढो जयवारणखंधे दोधुव्वमाणसियचमरो । धवलायवत्तवारियतरणिकरुक्केरसंतावो ॥१५॥**
**पिहुवच्छत्थलघोलंतथूलमुत्ताकलावकयसोहो । सव्वंगरइयसिंगारसुन्दरो दरियरिउदलगो ॥१६॥**
**कुणमाणो परिहासं सद्धिं रइकेलिणा विडनरेण । बहुकामसत्थसंकहपरिकहणक्खणियहियएण ॥१७॥**

---

अपरं च तस्याबालकालपरिपालितं हृदयदयितम् । मार्जार-सारिकयो र्युगलं भवने संवसति ॥ ४ ॥
अथान्यदा निशि सञ्जाता श्रेष्ठिनो मनसि चिन्ता । उपभोक्तुं न युज्यते जनस्य जननीव जनकश्रीः ॥ ५ ॥
ते चैव जीवन्तु भुवनैकभूषणा मानवा गुणगरिष्ठाः । ये निजार्जितद्रविणेन ददाति दानमनाथेभ्यः ॥ ६ ॥
खाद्यमाना परिवर्धते कण्डू न पुनः कदाचिद्धनर्द्धिः । ततो द्रविणार्जनकार्ये उद्यमितव्यं सुपुरुषैः ॥ ७ ॥
इति चिन्तयित्वा प्रगुणीकृत्वा क्रयाणकानि बहूनि । द्रविणार्जनैकचित्तः प्रजल्पति प्रणयिनिमेवम् ॥ ८ ॥
शशिवदने ! मम गमनं भविष्यति देशान्तरे द्रविणकृते । त्वयाप्रमत्तया भवनं परिरक्षितव्यमिदम् ॥ ९ ॥
अपरं च सुतनु ! मार्जार-सारिकायुगलमिदमतिवप्रियम् । सम्भालय त्रिकालमेव सम्भाषणादिभिः ॥ १० ॥
क्षणहरिणलाञ्छनामलशीलं रमणीजनस्य नित्यमपि । मण्डनमकृत्रिमं ता पालयितव्यं प्रयतेन ॥ ११ ॥
ततः सारिकाया भवनं भलायित्वा प्रणयिनीं विशेषेण । मार्जारमपि खलु निजकरतलेनाङ्गे परिस्पृश्य ॥ १२ ॥
सन्मान्य सर्वांस्तान् श्रेष्ठी प्रशस्तनक्षत्रे । भृते क्रयाणकानां वाहने ततः समारुढः ॥ १३ ॥
तीर्त्वा तरङ्गिणीनां नाथं रङ्गतलहरिसन्दोहम् । प्राप्तः क्रमेण सिंहलद्वीपे इतश्च नन्दनृपः ॥ १४ ॥
आरुढो जयवारणस्कन्धे दोधूयमानश्वेतचामरः । धवलातपत्रवारिततरणिकरोत्केरसन्तापः ॥ १५ ॥
पृथुवक्षःस्थलधूर्णत्स्थूलमुक्ताकलापकृतशोभः । सर्वाङ्गरचितशृङ्गारसुन्दरो दारितरिपुदलकः ॥ १६ ॥
क्रियमाणः परिहासं सार्द्धं रतिकेलिना विटनरेण । बहुकामशास्त्रसङ्कथापरिकथनाक्षणितहृदयेन ॥ १७ ॥

**मयगंधलुद्धरुणुझुणिरभमरदोघट्टथट्टसंजुत्तो । खणखणिरकणयनिम्मियखलीणहयनियरपरियरिओ ॥१८॥**
**रणझणिरकणयकिंकिणिरहरयणारूढरायनियरेण । अणुगम्मंतो संतो नीहरिओ रायवाडीए ॥१९॥**
**पत्तो य धणावहसेट्ठिधवलपासायभित्तिभायम्मि । तब्भवणमत्तवारणपरिट्ठिया नरवरिंदेण ॥२०॥**
**पारूढपढमजोव्वणमणोहरा तत्तकणयगोरंगी[1] । पच्चक्खकामघरणि व्व विरहिया कामएवेण ॥२१॥**
**दिट्ठा मयंकवयणी रोहिणिरमणी तओ अणंगेण । कयकोवेण व बाणावलीहिं सो तक्खणे विद्धो ॥२२॥**
**दट्ठूण तयं तव्वयणकमलमवलोयणेक्ककयचित्तो । तत्थेव मत्तकुजरकीलं काउं समारद्धो ॥२३॥**
**वारं वारं आवलियखंधरो ठाइ सम्मुहो तीए । पक्खिवइ य तव्वयणे नियनयणे नंदनरनाहो ॥२४॥**
**सा वि हु महाणुभावा महासई पेच्छिउं पुहइपालं । नयणेहिं समयणेहिं पेच्छंतमतुच्छवंछाए ॥२५॥**
**गिहमत्तवारणाओ ओयरिऊणं समंथरगईए । अन्नत्थ गया तत्तो नरेसरो तं अपेच्छन्तो ॥२६॥**
**तव्विरहजलणजालावलीहिं पज्जलियमाणसो तत्तो । काउं सरीरकारणछउमं रायउलमणुपत्तो ॥२७॥**
**तीए विरहे सरीरे संजाओ मुम्मुरग्गिसमदाहो । न लहइ खणं पि सुक्खं तल्लोविल्लिं करेमाणो ॥२८॥**
**मयणमहागहगहिओ परव्वसो सव्वहा वि संजाओ । पहसइ गायइ रोयइ एमेव य सो परिब्भमइ ॥२९॥**
**तो मंति-मंडलेसर-सामंतप्पभिइपउरजणनियरो । अवलोइय नरनाहं तदवत्थं आउलीहूओ ॥३०॥**

---

मदगन्धलुब्धरणझणद्भ्रमरहस्तिसमूहसंयुक्तः । खणखणत्कनकनिर्मितखलिन[2]हयनिकरपरिवारितः ॥ १८ ॥
रणझणत्कनककिङ्किणिरथरत्नारुढराजनिकरेण । अनुगच्छन्सन् निःसृतो राजवाट्याम् ॥ १९ ॥
प्राप्तश्च धनावहश्रेष्ठिधवलप्रासादभित्तिभागे । तद्भवनमत्तवारणपरिस्थिता नरवरेन्द्रेण ॥ २० ॥
प्रारब्धप्रथमयौवनमनोहरा तप्तकनकगौराङ्गी । प्रत्यक्षकामगृहिणीव विरहिता कामदेवेन ॥ २१ ॥
दृष्टा मृगाङ्कवदनी रोहिणिरमणी ततोऽनङ्गेन । कृतकोपेनेव बाणावलिभिः स तत्क्षणे विद्धः ॥ २२ ॥
दृष्टा तकं तद्वदनकमलमवलोकनैककृतचित्तः । तत्रैव मत्तकुञ्जरक्रीडां कर्तुं समारब्धः ॥ २३ ॥
वारं वारमावलितस्कन्धरस्तिष्ठति सम्मुखस्तस्याः । प्रक्षिपति च तद्वदने निजनयने नन्दनरनाथः ॥ २४ ॥
साऽपि खलु महानुभावा महासती प्रेक्ष्य पृथिवीपालम् । नयनाभ्यां समदनाभ्यां प्रेक्षमाणमतुच्छवाञ्छया ॥ २५ ॥
गृहमतवारणादवतीर्य समन्थरगत्या । अन्यत्र गता ततो नरेश्वरस्तामपश्यन् ॥ २६ ॥
तद्विरहज्वलनज्वालावलिभिः प्रज्वलितमानसस्ततः । कृत्वा शरीरकारणच्छद्मं राजकुलमनुप्राप्तः ॥ २७ ॥
तस्या विरहे शरीरे सञ्जातो मुर्मुराग्निसमदाहः । न लभते क्षणमपि सुखं व्याकुलतां कुर्वन् ॥ २८ ॥
मदनमहाग्रहगृहीतः परवशः सर्वथापि सञ्जातः । प्रहसति गायति रोदिति एवमेव च स परिभ्रमति ॥ २९ ॥
ततो मन्त्रि-मण्डलेश्वर-सामन्त प्रभृतिप्रचूरजननिकरः । अवलोक्य नरनाथं तदवस्थमाकूलीभूतः ॥ ३० ॥

---

१. पारंभपढम० रं० । २. 'लगाम' इति भाषायाम् ।

तो तेण विज्जवाइय-जोइसिया आणिया नरिंदपुरो । जंपंति य विज्जा उब्भसन्निवाओ इमो जाओ ॥३१॥
ओयरयमज्झयारे कुणह नरिंदं निवायठाणम्मि । पिहिऊण दुवाराइं विहेह पच्छायणपयत्तं ॥३२॥
पियउ तहाऽऽवट्टजलं कुणउ तओ लंधणाणि नरनाहो । जह अइरेण वि जायइ निरुयसरीरो पडुयकरणो ॥३३॥
जंपंति वाइया पुण गहिओ राया महागहेण जओ । रोयइ गायइ पहसइ नियइ करालाए दिट्ठीए ॥३४॥
रइउं महीए मंडलयमुब्भडं भूयनासणं जंतं आलिहिऊणं कणवीरकुसुमनियरेण पूएउं ॥३५॥
पूयप्फल-पत्त-कणिक्क-दीवियापमूहपूयउवगरणं । पत्तेयं चउसट्ठिं काउं तह जोइणीपीढं ॥३६॥
अवयारिऊण डज्झन्तगुग्गुलुच्छलियधूमगंधम्मि । मंडलए उववेसिय नरनाहं परममंतेहिं ॥३७॥
सरसवुडिल्लयअक्खयपरिपूरियमुट्ठिविहियघाएहिं । अच्छोडिओ समाणो पउणीहोही न संदेहो ॥३८॥
जोइसिया वि हु एवं वयंति संतीए समइ दोसोऽयं । गहपूयणं च सेयं बारसिदाणं च सुपसत्थं ॥३९॥
एत्थंतरम्मि पत्तो रइकेली रायपायनमणत्थं । दट्ठूं तहावत्थं नरेसरं पणमिउं भणइ ॥४०॥
किं देव ! तुज्झ दुक्खं मह कहसु करोमि तस्स पडियारं । एवं वुत्तो वि न जाव किंपि जंपइ तओ तेण ॥४१॥
नायं निउणत्तणओ रोहिणिरमणीए एस नरनाहो । अवहरियमणो जह मुयइ उण्ह-अइदीहरुस्सासे ॥४२॥
तो भणियं नूणं पहु ! तुज्झ मणं कामिणीए अवहरियं । ता मज्झ कहसु तं झत्ति जेण एत्थेव आणेमि ॥४३॥
तं निसुणिउं नरिंदेण जंपियं किह तए इमं नायं ? । भणियं च तेण तुह देव ! दिट्ठिसवियारदंसणओ ॥४४॥

---

तदा तेन विद्यावादि-ज्योतिषिका आनीता नरेन्द्रपुरः । जल्पन्ति च वैद्या उद्भटसन्निपातोऽयं जातः ॥ ३१ ॥
अपवरकमध्ये कुरुत नरेन्द्रं निर्वातस्थाने । पिधाय द्वाराणि विधत्त प्रच्छादनप्रयत्नम् ॥ ३२ ॥
पिबतु तथावर्तजलं करोतु ततो लङ्घनानि नरनाथः । यथाचिरेणापि जायते निरुजशरीरः पटुककरणः ॥ ३३ ॥
जल्पन्ति वातिकाः पुनगृहीतो राजा महाग्रहेण यतः । रोदिति गायति प्रहसति पश्यति करालया दृष्ट्या ॥ ३४ ॥
रचयित्वा मह्यां मण्डलमुद्भटं भूतनाशनं यन्त्रम् । आलिख्य कणवीरकुसुमनिकरेण पूजयित्वा ॥ ३५ ॥
पुगफल-पत्र-कर्णिका-दीपिकाप्रमुख पूजोपकरणम् । प्रत्येकं चतुष्षष्ठि कृत्वा तथा योगिनीपीठम् ॥ ३६ ॥
अवतार्य दह्यमानगुग्गलोच्छलितधूमगन्धे । मण्डले उपवेश्य नरनाथं परममन्त्रैः ॥ ३७ ॥
सर्षपमाषाक्षतपरिपूरितमुष्टिविहितघातैः । आस्फालितस्सन् प्रगुणीभविष्यति न सन्देहः ॥ ३८ ॥
ज्योतिषिका अपि खल्वेवं वदन्ति शान्त्या शाम्य दोषोऽयम् । ग्रहपूजनं च श्रेयं द्वादशीदानं च सुप्रशस्तम् ॥ ३९ ॥
अत्रान्तरे प्राप्तो रतिकेलि राजपादनमनार्थम् । दृष्ट्वा तथावस्थं नरेश्वरं प्रणम्य भणति ॥ ४० ॥
किं देव ! तव दुःखं मम कथय करोमि तस्य प्रतिकारम् । एवमुक्तोऽपि न यावत्किमपि जल्पति ततस्तेन ॥ ४१ ॥
ज्ञातं निपुणत्वेन रोहिणिरमण्यैष नरनाथः । अपहृतमना यथा मुञ्चत्युष्णातिदीर्घोच्छ्वासान् ॥ ४२ ॥
ततो भणितं नूनं प्रभो ! तव मनः कामिन्यापहृतम् । ततो मम कथय तच्छीघ्रं येनात्रैवानयामि ॥ ४३ ॥
तन्निश्रुत्य नरेन्द्रेन जल्पितं कथं त्वयेमं ज्ञातम् ? । भणितं च तेन तव देव ! दृष्टिसविकारदर्शनतः ॥ ४४ ॥

**वंकभणियाणि कत्तो कत्तो अद्धच्छिपेच्छियाइं च । ऊससियं पि मुणिज्जइ छइल्लजणसंकुले गामे ॥४५॥**

**सोऊण तयं तो भणइ नरवई हिययनिव्विसेसस्स । तुज्झ कहिज्जइ सव्वं पि गुज्झमेयं जओ भणियं ॥४६॥**

**जणणीए जणयस्स व भइणीए भाउणो वि भज्जाए । अवि होज्ज अकहणीयं न उ सुहिणो नेहसारस्स ॥४७॥**

**जह रोहिणीए हरियं मज्झ मणं तयणु भणइ रइकेली । रत्ता व विरत्ता व त्ति तीए किं लक्खियं हिययं ? ॥४८॥**

**जओ भणियं-**

**चलइ तहेव वियंभइ महुरं आलवइ भंजए अंगं । केसकलावं विहुणइ पुलइज्जइ डसइ अहरं च ॥४९॥**

**तोडेइ अंगुलीओ तहेव पयडेइ नाभिकमलं च । सवियार-सहरिसुप्फुल्ललोयणा विहसरी नियइ ॥५०॥**

**पीडइ नियथणहारं परिसिढिलियबंधणं फुसइ नीविं । चुंवेइ डिंभवयणं वम्महसरसल्लिया महिला ॥५१॥**

**जेण समं संबंधो गिण्हइ नामं पुणो पुणो तस्स । पूएइ तस्स मित्तं जायइ एवंविहा रत्ता ॥५२॥**

**जत्थ न उज्जग्गिरओ जत्थ न ईसाविसूरणं माणो । सब्भावचाडुयं जत्थ नत्थि नेहो तहिं नत्थि ॥५३॥**

**अवियंभिय-नीससियं अलियपसुत्तं च सीसदुक्खं च । निद्दालस व्व वयणं विरत्तभावाण जुवईणं ॥५४॥**

**तो नरवइणा भणियं न विचारो लक्खिओ मए तीए । तेणुत्तं लज्जाए वि अवियारा हुंति महिलाओ ॥५५॥**

**अवरं च तुज्झ देसे उप्पज्जइ जमिह सुंदरं रयणं । तं होइ तुज्झ अंतेउरम्मि ता खिवसु तं रमणिं ॥५६॥**

**तो भणइ महीनाहो एयं पि करेमि किंतु लज्जेमि । पुरओ पउरजणाणं ता किं पि निहालसु उवायं ॥५७॥**

---

वक्रभणितानि कुतः कुतोऽर्धाक्षिप्रेक्षितानि च । उच्छ्वसितमपि मुण्यते छैलजनसङ्कुले ग्रामे ॥ ४५ ॥

श्रुत्वा तकं ततो भणति नरपति र्हृदयनिर्विशेषस्य । तव कथ्यते सर्वमपि गुप्तमेतद्यतो भणितम् ॥ ४६ ॥

जनन्या जनकस्य वा भगिन्या भर्तुरपि भार्यायाः । अपि भवेदकथनीयं न तु सख्युः स्नेहसारस्य ॥ ४७ ॥

यथा रोहिण्या हृतं मम मनस्तदनु भणति रतिकेली । रक्ता वा विरक्ता वेति तस्याः किं लक्षितं हृदयम् ॥ ४८ ॥

यतो भणितम् -

चलति तथैव विजृम्भति मधुरमालापति भनक्त्यङ्गम् । केशकलापं विधुनाति पुलकयति दशत्यधरं च ॥ ४९ ॥

त्रोटयत्यङ्गुल्यस्तथैव प्रकटयति नाभिकमलं च । सविकार-सहर्षोत्फुल्ललोचना विहसन्ती पश्यति ॥ ५० ॥

पीडयति निजस्तनहारं परिशिथीलबन्धनां स्पृशति नीविम् । चुम्बति डिम्भवदनं कामशरशल्यिता महिला ॥ ५१ ॥

येन समं सम्बन्धो गृह्णाति नाम पुनःपुनस्तस्य । पूजयति तस्य मित्रं जायतैवंविधा रक्ता ॥ ५२ ॥

यत्र नोज्जागरो यत्र नैर्ष्याखेदनं मानः । स्वभावचाटूकं यत्र नास्ति स्नेहस्तत्रनास्ति ॥ ५३ ॥

अविजृम्भित-निश्वसितमलिकप्रसुप्तं च शीर्षदुःखं च । निद्रालसेव वदनं विरक्तभावानां युवतीनाम् ॥ ५४ ॥

ततो नरपतिना भणितं न विकारो लक्षितो मया तस्याः । तेनोक्तं लज्जयाप्यविकारा भवन्ति महिलाः ॥ ५५ ॥

अपरं च तव देशे उत्पद्यते यदिह सुन्दरं रत्नम् । तद्भवति तवान्तःपुरे ततः क्षिप तां रमणिम् ॥ ५६ ॥

ततो भणति महीनाथ एतदपि करोमि किन्तु लज्जेम । पुरतः पौरजनानां ततः किमपि निभालयोपायम् ॥ ५७ ॥

**भणइ तओ रइकेली तीए पई देव ! दूरदेसस्स । पाहुणओ संजाओ गम्मउ ता तत्थ वि निसाए ॥५८॥**

**लद्धो वरो उवाओ मित्त ! तए इय पसंसिऊण तयं । तेण सह संकहाहिं दिणसेसं गमइ दुक्खेण ॥५९॥**

**तत्तो घोरंधारे जाए रइकेलिणा समं राया । अंधारपडयपावरणजायअद्देस्सरूवो य ॥६०॥**

**करकलियरिउवियारणरुहिरछडारुणकरालकरवालो । वंचित्तु अंगरक्खाइपरियणं झत्ति नीहरिओ ॥६१॥**

**पत्तो य तीए मंदिरदुवारदेसम्मि तयणु सासंको । सणियं सणियं चोरु व्व पविसए तीए भवणम्मि ॥६२॥**

**तो पविसंतं दट्ठूण नरवइं तक्करो त्ति कलिऊण । मज्जारो कंदेउं पारद्धो गरुयसद्देणं ॥६३॥**

**सोउं मज्जारसरं संभंता सालही नियइ जाव । तो तीए इमो नाओ नंदनरिंदो न चोरु त्ति ॥६४॥**

**एयस्स इहाऽऽगमणं न सुंदरं जमिह एस सासंको । न हु तक्करत्तमेयस्स घडइ ता होहिही जारो ॥६५॥**

**न हु जुज्जइ इयरस्स वि आगमणं एगयस्स परभवणं । रयणीय किं पुणो एरिसस्स ? ता सुंदरं न इमं ॥६६॥**

**किं हक्कामि इयाणिं पि ? अहव किं कुणइ ? ताव पेच्छामि । जइ मह जणणीसीलं खंडिस्सइ तो निवारिस्सं ॥६७॥**

**इय चिंतिउण मोणेण संठिया सालही अह नरिंदं । दट्ठूण रोहिणी तयणु एरिसं चिंतिउं लग्गा ॥६८॥**

**नूणं नंदनरिंदो समेइ मह सीलखंडणनिमित्तं । ता इण्हि कह सीलं पालेयव्वं ? न याणामि ॥६९॥**

**इय एवं चिंतंतीए तीए गंतूण नंदनरनाहो । सासंकं उवविट्ठो रोहिणिपल्लंकपज्जंते ॥७०॥**

---

भणति ततो रतिकेली तस्याः पति र्देव ! दूरदेशस्य । प्राघूर्णकः सञ्जातो गम्यतां तावत्तत्रापि निशि ॥ ५८ ॥

लब्धो वर उपायो मित्र ! त्वयेति प्रशंस्य तकम् । तेन सह सङ्कथाभि र्दिनशेषं गमयति दुःखेन ॥ ५९ ॥

ततो घोरान्धकारे जाते रतिकेलिना समं राजा । अन्धकारपटप्रावरणजातादृश्यरुपश्च ॥ ६० ॥

करकलितरिपुविदारणरुधिरच्छटारुणकरालकरवालः । वञ्चयित्वाङ्गरक्षादिपरिजनं शीघ्रं निःसृतः ॥ ६१ ॥

प्राप्तश्च तस्याः मन्दिरद्वारदेशे तदनु साशङ्कः । शनैः शनैश्चौरइव प्रविशति तस्या भवने ॥ ६२ ॥

ततः प्रविशन्तं दृष्ट्वा नरपतिं तस्कर इति कलयित्वा । मार्जारः क्रन्दितुं प्रारब्धो गुरुकशब्देन ॥ ६३ ॥

श्रुत्वा मार्जारस्वरं सम्भ्रान्ता सारिका पश्यति यावत् । ततस्तयायं ज्ञातो नन्दनरेन्द्रो न चौर इति ॥ ६४ ॥

एतस्येहाऽऽगमनं न सुन्दरं यदिहैष साशङ्कः । न खलु तस्करत्वमेतस्य घटति ततो भविष्यति जारः ॥ ६५ ॥

न खलु युज्यत इतरस्याप्यागमनमैककस्य परभवने । रजन्यां किं पुनरीदृशस्य ? तावत्सुन्दरं नेदम् ॥ ६६ ॥

किमाकार्यामीदानीमपि ? अथवा किं करोति ? तावत्पश्यामि । यदि मम जननीशीलं खण्डिष्यति तदा निवारयष्यामि ॥६७॥

इति चिन्तयित्वा मौनेन संस्थिता सारिकाथ नरेन्द्रम् । दृष्ट्वा रोहिणी तदन्विदृशं चिन्तयितुं लग्ना ॥ ६८ ॥

नूनं नन्दनरेन्द्रः समैति मम शीलखण्डननिमित्तम् । तदिदानीं कथं शीलं पालितव्यं ? न जानामि ॥ ६९ ॥

इत्येवं चिन्तन्त्या तया गत्वा नन्दनरनाथः । साशङ्कमुपविष्टो रोहिणिपल्यङ्कपर्यन्ते ॥ ७० ॥

**तो रोहिणी समुट्ठिय झड त्ति महिमंडलम्मि उवविट्ठा । भणिया नंदनरिंदेण महुरसद्देण सा एवं ।।७१।।**

**हरिणच्छि ! हरियहियओ तुमए हं तुह सयासमल्लीणो । अहवा वि मयणतवियस्स मज्झ सरणं तुमं चेव ।।७२।।**

**तं पुण समुट्ठिऊणं उवविट्ठा निट्ठुरं महीवट्ठे । ता न हु जुज्जइ एवं पत्ते इयरे वि पाहुणए ।।७३।।**

**किं पुण सयमेव समागयम्मि राएऽणुरत्तचित्तम्मि । जुज्जइ गउरवकरणं आसण-संभासणाईहिं ।।७४।।**

**ता काऊण पसायं सुंदरि ! आरुहसु एत्थ पल्लंके । निव्ववसु ममं मयणग्गितावियं संगमजलेण ।।७५।।**

**सोऊण तयं वज्जरइ रोहिणी राय ! तुम्ह सरिसाण । एयारिसं न जुज्जइ उत्तमवंसप्पसूयाण ।।७६।।**

**अवरस्स वि अनयपरस्स सामि ! सिक्खं सया तुमं देसि । तुज्झ पुणो को दाही सिक्खमनीइं कुणंतस्स ? ।।७७।।**

**जइ नरवई वि मेल्लइ मज्जायं साहुनीइनिउणो वि । ता एयारिसकज्जुज्जयाणमियराण को दोसो ? ।।७८।।**

**उक्तं च-**

**युक्तमुन्मुक्तकण्ठेन वने हा हेति रोदितुम् । विद्वानपि जनो यत्र मार्गमुत्सृत्य गच्छति ।।७९।।**

**अवरं च असेसस्स वि जणस्स जणओ व्व होइ नरनाहो । ता चिंतिउं न जुज्जइ किं पुण एयारिसं वोत्तुं ? ।।८०।।**

**बहुपूय-असुइ-वस-मंस-रुहिरपरिपूरियाण महिलाण । कज्जे किं कुणसि नरिंद ! असरिसं नियकुलकलंकं ? ।।८१।।**

**होही सुहमइतुच्छं अयसो पुण तिहुयणम्मि वित्थरिही । जह अज्ज वि निसुणिज्जइ सीयाहरणे दसासस्स ।।८२।।**

**अवरं च तरंगिणिजलतरंगचंचलतरम्मि तारुन्ने । पडुपवणपहयपोइणिजललवचवलम्मि पियपेम्मे ।।८३।।**

---

ततो रोहिणी समुत्थाय झटिति महीमण्डलेउपविष्टा । भणिता नन्दनरेन्द्रेण मधुरशब्देन सैवम् ।। ७१ ।।

हरिणाक्षि ! हृतहृदयस्त्वयाहं तव सकाशमालीनः । अथवापि मदनतप्तस्य मम शरणं त्वं चैव ।। ७२ ।।

त्वं पुनः समुत्थायोपविष्टा निष्ठुरे महीपृष्ठे । ततो न खलु युज्यत एवं प्राप्त इतरेऽपि प्राघूर्णके ।। ७३ ।।

किं पुनः स्वयमेव समागते राज्ञि अनुरक्तचित्ते । युज्यते गौरवकरणमासन-सम्भाषणादिभिः ।। ७४ ।।

ततः कृत्वा प्रसादं सुन्दरि ! आरोहात्र पल्यङ्कम् । निर्वापय माम् मदनाग्नितापितं संगमजलेन ।। ७५ ।।

श्रुत्वा तकं कथयति रोहिणी राजन् ! तव सदृशानाम् । एतादृशं न युज्यते उत्तमवंशप्रसूतानाम् ।। ७६ ।।

अपरस्याप्यनयपरस्य स्वामिन् । शिक्षां सदा त्वं दासि । तुभ्यं पुनः को दास्यति शिक्षामनीतिं कुर्वतः ? ।। ७७ ।।

यदि नरपतिरपि मुञ्चति मर्यादां साधुनीतिनिपुणोऽपि । तावदेतादृशकार्योद्यतानामितरेषां को दोषः ? ।। ७८ ।।

अपरं चाशेषस्यापि जनस्य जनक इव भवति नरनाथः । ततश्चिन्तयितुं न युज्यते किं पुनरेतादृशं वक्तुम् ? ।। ८० ।।

बहुपूताशूचि-वशा-मांस-रुधिरपरिपूरितानां महिलानाम् । कार्ये किं करोषि नरेन्द्र ! असदृशं निजकुलकलङ्कम् ।।८१।।

भविष्यति सुखमतितुच्छमयशः पुनस्त्रिभुवने विस्तरिष्यति । यथाद्यापि निश्रूयते सीताहरणे दशास्यस्य ।। ८२ ।।

अपरं च तरङ्गिणिजलतरङ्गचञ्चलतरे तारुण्ये । पटुपवनप्रहतपोयणिजललवचपले प्रियप्रेम्णि ।। ८३ ।।

**नवजलयपडलविलसिरतडिल्लयातरलजीवियव्वम्मि । एयारिसं न जुज्जइ नरिंद ! काउं सुपुरिसाण ॥८४॥**

**रागज्झवसाएणं थेवस्स वि विरइयस्स कम्मस्स । जायइ गरुयविवागो नरिंद ! नरयम्मि जीवाणं ॥८५॥**

**इहइं पि हु जं कह वि हु कीरइ असमंजसं कुलीणेण । तं तस्स डहइ हियय़ं जम्हा एयारिसं भणियं ॥८६॥**

**कीरंति जाइं जोव्वणमएण अवियारिऊण कज्जाइं । वयपरिणामे भरियाइं ताइं हियए खडुक्कंति ॥८७॥**

**ता सव्वहा वि एरिसअकज्जचिंतं पि देव ! परिहरसु । खणदिट्ठ-नट्ठरूवे असारसंसारपरिणामे ॥८८॥**

**संजायचोरसंको पुणो पुणो गुरुसरेण मज्जारो । अक्कंदइ तो सा वि हु सालहिया जंपए एवं ॥८९॥**

**किमाक्रन्दसि मार्जार ? नन्दो राजा न तस्करः । अमृते विषमुत्पन्नं यतो रक्षा भयं ततः ॥९०॥**

**सोऊण रोहिणीए सुभासियं सालहीसिलोयं च । संवेगअंसुजलभरियलोयणो चिंतए राया ॥९१॥**

**पेच्छ जहा एयाणं अमुणियतत्ताण एरिसविवेओ । मह पुण मुणियसुयस्स वि चरियं एयारिसं पावं ॥९२॥**

**अहह ! महापावो हं जं असरिससुद्धसीलकलियाए । काउमकज्जमिमीए समागओ गिहममज्जाओ ॥९३॥**

**एसा वरं वराई सालहिया नाहमहमपरिणामो । जा एरिसं वियाणइ कज्जा-ऽकज्जाइं जीवाणं ॥९४॥**

**इय चिंतिऊण सहसा समुट्ठिओ रोहिणीए कमकमलं । महिमिलियभालवट्टो पणमइ रोमंचिओ राया ॥९५॥**

**पभणइ य महामोहंधयारकूवम्मि निवडिओ अहयं । नियवयणवरत्ताए तए सुसीले ! समुद्धरिओ ॥९६॥**

**जोव्वणमयमत्तेणं दुव्वयणं किं पि जं मए भणियं । तं मह महापसायं काऊणं खमसु सव्वं पि ॥९७॥**

---

नवजलदपटलविलसत्तडिल्लतातरलजीवितव्ये । एतादृशं न युज्यते नरेन्द्र ! कर्तुं सुपुरुषाणाम् ॥ ८४ ॥

रागाध्यवसायेन स्तोकस्यापि विरचितस्य कर्मणः । जायते गुरुकविपाको नरेन्द्र ! नरके जीवानाम् ॥ ८५ ॥

इहापि खलु यत्कथमपि खलु क्रियतेऽसमञ्जसं कुलिनेन । तत्तस्य दहति हृदयं यस्मादेतादृशं भणितम् ॥ ८६ ॥

क्रियन्ते यानि यौवनमदेनाविचार्य कार्याणि । वयःपरिणामे भृतानि तानि हृदये शल्यन्ति ॥ ८७ ॥

तावत्सर्वथाप्येदृशमकार्यचित्तमपि देव ! परिहर । क्षणदृष्ट-नष्टरुपेऽसारसंसारपरिणामे ॥ ८८ ॥

सञ्जातचौरशङ्कः पुनः पुन गुरुस्वरेण मार्जारः । आक्रन्दति ततः सापि खलु सारिका जल्पत्येवम् ॥ ८९ ॥

श्रुत्वा रोहिण्या सुभाषितं सारिकश्लोकं च । संवेगाश्रुजलभृतलोचनश्चिन्तयति राजा ॥ ९१ ॥

पश्य यथैतेषाममुणिततत्वानामीदृशविवेकः । मम पुन र्मुणितश्रुतस्यापि चरितमेतादृशं पापम् ॥ ९२ ॥

अहाहा ! महापापोऽहं यदसदृशशुद्धशीलकलितायाः । कर्तुमकार्यमेतस्याः समागतो गृहममर्यादः ॥ ९३ ॥

एषा वरं वराकी सारिका नाहमधमपरिणामः । येदृशं विजानाति कार्याऽकार्याणि जीवानाम् ॥ ९४ ॥

इति चिन्तयित्वा सहसा समुत्थितो रोहिण्याः क्रमकमलम् । महिमिलितभालपट्टः प्रभणति रोमाञ्चितो राजा ॥ ९५ ॥

प्रभणति च महामोहान्धकारकूपे निपतितोऽहम् । निजवचनवरत्रया त्वया सुशीले ! समुद्धरितः ॥ ९६ ॥

यौवनमदमत्तेन दुर्वचनं किमपि मया भणितम् । तन्मम महाप्रसादं कृत्वा क्षमस्व सर्वमपि ॥ ९७ ॥

इय खामिऊण राया नमिउं पयपंकयं पुणो तीए । रइकेलिणा समेओ संपत्तो नियय‌भवणम्मि ॥९८॥
परिभाविंतो संवेगसारवयणाणि तीए हिययम्मि । आसाइऊण निद्दं सुहं पबुद्धो पभायम्मि ॥९९॥
तत्तो य रोहिणीए सीलाइगुणेहि रंजिओ राया । रइकेलिणा समाणं तीए माहप्पजणणत्थं ॥१००॥
कुणइ पवंचं जह किर भो भो सामंत-मंतिणो ! अज्ज । रयणीए पच्चक्खं का वि हु मं देवया भणइ ॥१०१॥
भो भो नरिंद ! निसुणसु रोगाओ इमाओ मुच्चसे सिग्घं । रोहिणिमहासईए अभिमंतियसलिलपाणेण ॥१०२॥
तेहुत्तं जाणामो देव, तयं रोहिणिं जणपसिद्धं । सेट्ठिधणावहभज्जं सीलालंकाररमणीयं ॥१०३॥
तो ते भणंति सव्वे पेसिज्जउ तीए आणणनिमित्तं । सुंदरिमहल्लियमिमं कल्लाणे को विरोहो ? त्ति ॥१०४॥
तत्तो य सपरिवारा पेसविया सुंदरी नरिंदेण । पत्ताए तीए गेहे सविणयपणयं समाणीया ॥१०५॥
कोसंभवत्थविरइयनीरंगि ईसिदिस्समुहकमला । संझाणुरायछाइयससिबिंबा गयणलच्छि व्व ॥१०६॥
अब्भुट्ठिया नरिंदेण मंति-सांत-सुहडसंकिन्नं । रायत्थाणं सयलं पि किमवि विम्हावयंतेण ॥१०७॥
वज्जिदनील-मरगय-मुत्ताहल-पउमरायजडियम्मि । सिंहासणे निवेसिय सलाहिया पउरपच्चक्खं ॥१०८॥
निस्सेसमहिलतिलए ! निरुवमसद्धम्मकम्मसुहनिलए ! । मुत्ताहलहारुज्जलसीललयारोहवरमलए ! ॥१०९॥
तुम्हारिसाण सीलप्पभावओ दिणयरो कुणइ दिवसं । वरिसंति जलहरा वि हु हारावलिविमलधाराहिं ॥११०॥
रोगावणयणकज्जे मज्झ तुमं देवयाए उवइट्ठा । ता मं तुमं महासइ ! पायसु सलिलं सहत्थेण ॥१११॥

---

इति क्षामयित्वा राजा नत्वा पदपङ्कजं पुनस्तस्याः । रतिकेलिना समेतः संप्राप्तो निजकभवने ॥ ९८ ॥
परिभावयन् संवेगसारवचनानि तस्या हृदये । आसाद्य निद्रां सुखं प्रबुद्धः प्रभाते ॥ ९९ ॥
ततश्च रोहिण्याः शीलादिगुणै रञ्जितो राजा । रतिकेलिना समानं तस्या माहात्म्यजाननार्थम् ॥ १०० ॥
करोति प्रपञ्चं यथा किल भो भो सामन्त-मन्त्रिणः । अद्य रजन्यां कापि खलु मां देवता भणति ॥ १०१ ॥
भो भो नरेन्द्र ! निशृणु रोगादस्मान्मुञ्चसि शीघ्रम् । रोहिणिमहासत्याभिमन्त्रितसलिलपानेन ॥ १०२ ॥
तैरुक्तं जानीमो देव, तकां रोहिणिं जनप्रसिद्धाम् । श्रेष्ठिधनावहभार्यां शीलालङ्काररमणीयाम् ॥ १०३ ॥
तदा ते भणन्ति सर्वे प्रेष्यतां तस्या आनयननिमित्तम् । सुन्दरिमहत्तरामिमां कल्याणे को विरोध इति ॥ १०४ ॥
ततश्च सपरिवारा प्रैषयिता सुन्दरी नरेन्द्रेण । प्राप्तायास्तस्या गृहे सविनयप्रणयं समानीता ॥ १०५ ॥
कौसुम्भवस्त्रविरचितनीरंगीषद्दृश्यमुखकमला । सन्ध्यानुरागाच्छादितशशिबिम्बा गगनलक्ष्मीरिव ॥ १०६ ॥
अभ्युत्थिता नरेन्द्रण मन्त्रि-सामन्त-सुभट-सङ्कीणाम् । राजास्थानं सकलमपि किमपि विस्मापयता ॥ १०७ ॥
वज्रेन्द्रनील-मरकत-मुक्ताफल-पद्मरागखचिते । सिंहासने निवेश्य श्लाघिता पौरप्रत्यक्षम् ॥ १०८ ॥
निःशेषमहिलातिलके ! निरुपमसद्धर्मकर्मशुभनिलये ! मुक्ताफलहारोज्वलशीललतारोहवरमलये ! ॥ १०९ ॥
युष्मादृशानां शीलप्रभावाद्दिनकरः करोति दिवसम् । वर्षन्ति जलधरा अपि खलु हारावलिविमलधाराभिः ॥ ११० ॥
रोगापनयनकार्ये मम त्वं देवतयोपदिष्टा । ततो मां त्वं महासति ! पायय सलिलं स्वहस्तेन ॥ १११ ॥

तो तीए तहा विहिए जाओ निरुओ निवो पडुसरीरो । तत्तो कयसम्माणा अणुगम्मंती नरिंदेण ॥११२॥
बंदियणपढिज्जंती गिज्जंती नयररमणिनियरेण । सलहिज्जंती पुरथेरियाहि पत्ता नियगेहं ॥११३॥
नंदनरिंदाईओ पउरजणो पणमिउं पडिनियत्तो । एत्तो य तीए भत्ता विढत्तबहुवित्तसंजुत्तो ॥११४॥
संपत्तो तरिऊणं मयरकरालं तरंगिणीनाहं । सोऊण तीए चरियं पमोयपरिपूरिओ तयणु ॥११५॥
जायाहियाणुराओ रमइ तओ तं मणुन्नभोगेहिं । कालक्कमेण जाओ धणसारो नाम तीए सुओ ॥११६॥
अह अन्नया य दट्ठूण गरुयवेरग्गकारणं किं पि । सा साहुणीसयासे पव्वइया विहियतव-चरणा ॥११७॥
मरिऊण समुप्पन्ना विमाणवासम्मि अमररूवेण । तत्तो चुया समाणी कमेण पाविहिइ सिद्धिसुहं ॥११८॥

॥ रोहिण्याख्यानकं समाप्तम् ॥१५॥

इदानीं मनोरमाख्यानकस्यावसरः, तच्च नमस्कारफलवर्णने सुदर्शनाख्यानके भणिष्यत इति क्रमागतं सुभद्राख्यानकमारभ्यते । तच्चेदम्-

अंगाजणवयचूडामणि व्व पायारपरिगया आसि । चंपा नामेण पुरी सिरीए सिंगारगेह व्व ॥१॥
तत्थऽत्थि विजियसत्तू जियसत्तू नरवई नयनरिंदो । जिणसासणाणुरत्तो जिणदत्तो नाम सेट्ठी वि ॥२॥
तस्सऽत्थि पवरदुहिया दुहियाण दुहाण दलणदुल्ललिया । ललियकर-चरणकमला कमलालंकियतणुलया य ॥३॥
सच्छासया सुभद्दा नामेण मणुन्नसीलकुलभवणं । जिणचलणकमलसेवापरायणा रायहंसि व्व ॥४॥

---

तदा तया तथा विहिते जातो निरुजो नृपः पटुशरीरः । ततः कृतसन्मानाऽनुगम्यमाना नरेन्द्रेण ॥ ११२ ॥
बन्दिजनपठ्यमाना गीयमाना नगररमणिनिकरेण । श्लाघ्यमाना पुरस्थविराभिः प्राप्ता निजकगृहम् ॥ ११३ ॥
नन्दनरेन्द्रादयः पौरजनः प्रणम्य प्रतिनिवृत्तः । इतश्च तस्या भर्ता अर्जितबहुवित्तसंयुक्तः ॥ ११४ ॥
संप्राप्तस्तीर्त्वा मकरकरालं तरङ्गिणीनाथम् । श्रुत्वा तस्या श्चरितं प्रमोदपरिपूरितस्तदनु ॥ ११५ ॥
जायाहृदयानुरागो रमते ततस्तां मनोज्ञभोगैः । कालक्रमेण जातो धनसारो नाम तस्यां सुतः ॥ ११६ ॥
अथान्यदा च दृष्ट्वा गुरुकवैराग्यकारणं किमपि । सा साध्वीसकाशे प्रव्रजिता विविधतपश्चरणा ॥ ११७ ॥
मृत्वा समुत्पन्ना विमानवासेऽमररुपेण । ततश्च्युता सती क्रमेण प्राप्स्यति सिद्धिसुखम् ॥ ११८ ॥

॥ रोहिण्याख्यानकं समाप्तम् ॥ १५ ॥

## सुभद्राख्यानकम्- ॥ १६ ॥

अङ्गाजनपदचूडामणिरिव प्राकारपरिगतासीत् । चम्पा नाम्ना पूरी श्रियाः शृङ्गारगेहमिव ॥ १ ॥
तत्रास्ति विजितशत्रु र्जितशत्रु र्नरपति र्नयनरेन्द्रः । जिनशासनानुरक्तो जिनदत्तो नाम श्रेष्ठ्यपि ॥ २ ॥
तस्यास्ति प्रवरदुहिता दुःखितानां दुःखानां दलनदुर्लालिता । ललितकरचरणकमला कमलालङ्कृततनुलता च ॥ ३ ॥
स्वच्छाशया सुभद्रा नाम्ना मनोज्ञशीलकुलभवनम् । जिनचरणकमलसेवापरायणा राजहंसीव ॥ ४ ॥

**सा अन्नया कयाई कीलंती नियगिहम्मि सच्छंदं । दिट्ठा तच्चन्नियभत्तसेट्ठिसुयबुद्धदासेण ॥५॥**

**तं दट्ठूण विचिंतइ तच्चन्नियसावओ निययचित्ते । एयाए अहो ! रूवं मोहइ भुवणत्तयजणं पि ॥६॥**

**ता किं एसा पायालकन्नया ? पणइणी अह भवस्स ? । किं वा वम्महदइया ? उआहु अमरंगणा का वि ? ॥७॥**

**एवं विचिंतयंतो विद्धो वम्महसरेण हिययम्मि । तव्वरणत्थं पेसइ नियपुरिसे नियगिहे गंतुं ॥८॥**

**काउं जिणदत्तो वि हु पडिवत्तिं ताण पुच्छए कज्जं । सिट्ठं च तेहिं सव्वं भणियं तो सेट्ठिणा एवं ॥९॥**

**तम्मि कुल-रूव-जोव्वण-लावन्नाई समग्गमवि अत्थि । होज्ज परमवरधम्मत्तणेण नेहो न एयाण ॥१०॥**

**अवरोप्परं पि कलहो होही सयधम्मसंथवेण सया । ता नियधूयं न हु देमि तेहिं तो बुद्धदासस्स ॥११॥**

**गंतुं गिहम्मि कहियं तं सोउं सो वि चिंतए हियए । मायाए सावयत्तं सिक्खेमि अहं इमीए कए ॥१२॥**

**साहुसमीवे गंतुं तयणु इमो पणमिऊणिमं भणइ । मह कहह निययधम्मं भयवं ! भवभमणभीयस्स ॥१३॥**

**तो साहूहिं समग्गो कहिओ जिणनाहदेसिओ धम्मो । सो वि तयं पडिवज्जइ भवोहभीओ व्व कवडेणं ॥१४॥**

**तस्साणुदिणं जिणनाहधम्मसवणेण भावियमणस्स । सम्मं चिय परिणमिओ मणम्मि जिणदेसिओ धम्मो ॥१५॥**

**तो वंदिउं मुणिंदे पभणइ भयवं ! सुणेह मह वयणं । पडिवन्नो जिणधम्मो आसि मए कन्नयाकज्जे ॥१६॥**

**इण्हिं सो च्चिय धम्मो परिणमिओ मज्झ सुद्धभावेण । सब्भावो संजाओ कवडं चिय पुव्वपुन्नेहिं ॥१७॥**

**ता अन्नं पि हु भयवं ! कहेह तो मुणिवरेहिं सव्वं पि । बारसविहे वि सावयधम्मे सम्मं स सिक्खविओ ॥१८॥**

---

सान्यदाकदाचित्क्रीडन्ती निजगृहे स्वच्छन्दम् । दृष्टा तच्चणिकभक्तश्रेष्ठिसुतबुद्धदासेन ॥ ५ ॥

तां दृष्ट्वा विचिन्तयति तच्चनिकश्रावको निजकचिते । एतस्या अहो ! रुपं मोहयति भुवनत्रयजनमपि ॥ ६ ॥

ततः किमेषा पातालकन्या ? प्रणयिन्यथ भवस्य ? । किं वा मन्मथदयिता ? उदाहु अमराङ्गणा कापि ? ॥ ७ ॥

एवं विचिन्तयन् विद्धः मन्मथशरेण हृदये । तद्वरणार्थं प्रेषति निजपुरुषान्निजगृहे गत्वा ॥ ८ ॥

कृत्वा जिनदत्तोऽपि खलु प्रतिपत्तिं तेषां पृच्छति कार्यम् । शिष्टं च तैः सर्वं भणितं ततः श्रेष्ठिनैवम् ॥ ९ ॥

तस्मिन् कुल-रुप-यौवन-लावण्यादयः समग्रमप्यस्ति । भवेत् परमपरधर्मत्वेन स्नेहो नानयोः ॥ १० ॥

अपरापरमपि कलहो भविष्यति स्वधर्मसंस्थापनेन सदा । ततो निजदुहितरं न खलु ददामि तैस्ततो बुद्धदासाय ॥११॥

गत्वा गृहे कथितं तत् श्रुत्वा सोऽपि चिन्तयति हृदये । मायया श्रावकत्वं शिक्षेऽहमेतस्याः कृते ॥ १२ ॥

साधुसमीपे गत्वा तदन्वयं प्रणम्येदं भणति । मम कथयत निजकधर्मं भगवन् ! भवभ्रमणभीतस्य ॥ १३ ॥

ततः साधुभिः समग्रः कथितो जिननाथदेशितो धर्मः । सोऽपि तकं प्रतिपद्यते भवौघभीत इव कपटेन ॥ १४ ॥

तस्यानुदिनं जिननाथधर्मश्रवणेन भावितमनसः । समग्रमेव परिणमितो मनसि जिनदेशितो धर्मः ॥ १५ ॥

ततो वन्दित्वा मुनीन्द्रान् प्रभणति ! शृणुत मम वचनम् । प्रतिपन्नो जिनधर्म आसीन्मया कन्याकार्ये ॥ १६ ॥

इदानीं स चैव धर्मः परिणमितो मम शुद्धभावेन । सद्भावःसञ्जातः कपटमेव पूर्वपुण्यैः ॥ १७ ॥

ततोऽन्यमपि खलु भगवन् ! कथयत ततो मुनिवरैः सर्वमपि । द्वादशविधानपि श्रावकधर्मान् सम्यक् स शिक्षयितः ॥१८॥

**जाओ विसिट्ठसड्ढो गाढं जिणसासणम्मि अणुरत्तो । जिणपूयण-गुरुवंदण-सज्झाय-ज्झाणउज्जुत्तो ॥१९॥**
**एवंविहसावयगुणसंपन्नो जाव ता सयं चेव । दिन्ना जिणदत्तेणं नियधूया बुद्धदासस्स ॥२०॥**
**महईए विभूईए परिणीया तेण हिट्ठहियएण । तो उवभुंजइ एसो विसयसुहं तीए संजुत्तो ॥२१॥**
**अह अन्नया कयाई भणिओ जामाउएण जिणदत्तो । मोक्कलसु नियं धूयं नेमि जहा नियगेहम्मि ॥२२॥**
**तो जंपइ जिणदत्तो तत्थ गयाए इमाए तुह सयणा । दाहिस्संति कलंकं विप्पडिवत्तीए धम्मस्स ॥२३॥**
**तो आह बुद्धदासो ईमीए भिन्नं गिहं करिस्सामि । तो जिणदत्तेण सुया सम्माणेऊण पट्ठविया ॥२४॥**
**नीया य नियभवणम्मि तेण नवनेहनिब्भरमणेण । दिन्नं भिन्नं भवणं तीए तओ बुद्धदासेण ॥२५॥**
**तयणु सुभद्दाभवणे मुणिणो निच्चं पि भत्त-पाणट्ठा । पविसंति वहंति पुणो पओसमियराणि तीए तओ ॥२६॥**
**अक्खंति बुद्धदासस्स भाउजायाइयाणि मिलिऊण । तुह दइया दुस्सीला चिट्ठइ जम्हा जईहिं समं ॥२७॥**
**निसुणित्तु तओ नियकन्नकडुयवयणाणि भणिउमाढत्तो । मा एरिसं पयंपह संभवइ न एयमेईए ॥२८॥**
**अवि नहयलाओ निवडइ रविरहरयणं कहं पि दिव्ववसा । तह वि सुभद्दा सीलस्स खंडणं कुणई न कया वि ॥२९॥**
**अवि उप्पज्जइ गयणंगणम्मि वियसंतकमलवणसंडं । तह वि सुभद्दा सीलस्स खंडणं कुणइ न कया वि ॥३०॥**
**अवि कहवि जए जायइ पुत्तो वंझाए विहिनिओगेण । तह वि सुभद्दा सीलस्स खंडणं कुणइ न कया वि ॥३१॥**
**अवि कह वि उवरि वच्चइ वसुहा गयणं वि जाइ पायालं । तह वि सुभद्दा सीलस्स खंडणं कुणइ न कया वि ॥३२॥**

---

जातो विशिष्टश्राद्धो गाढं जिनशासनेऽनुरक्तः । जिनपूजन-गुरुवन्दन-स्वाध्याय-ध्यानोद्युक्तः ॥ १९ ॥
एवंविधश्रावकगुणसंपन्नो यावत्तावत्स्वयं चैव । दत्ता जिनदत्तेन निजदुहिता बुद्धदासस्य ॥ २० ॥
महत्या विभूत्या परिणीता तेन हृष्टहृदयेन । तत उपभुनक्ति एष विषयसुखं तया संयुक्तः ॥ २१ ॥
अथान्यदा कदाचिद्भणितो जामात्रा जिनदत्तः । मुञ्च निजदुहितरं नयामि यथा निजकगृहम् ॥ २२ ॥
ततो जल्पति जिनदत्तस्तत्र गताया एतस्यास्तवस्वजनाः । दापयिष्यन्ति कलङ्कं विप्रत्तिपत्या धर्मस्य ॥ २३ ॥
तत आह बुद्धदास एतस्या भिन्नं गृहं करिष्यामि । ततो जिनदत्तेन सुता सन्मान्य प्रस्थापिता ॥ २४ ॥
नीता च निजभवने तेन नवस्नेहनिर्भरमनसा । दत्तं भिन्नं भवनं तस्यै ततो बुद्धदासेन ॥ २५ ॥
तदनु सुभद्राभवने मुनयो नित्यमपि भक्त-पानार्थाः । प्रविशन्ति वहन्ति पुनः प्रद्वेषमितराणि तस्यास्ततः ॥ २६ ॥
आख्यन्ति बुद्धदासस्य भ्रातृजायादिकानि मिलित्वा । तव दयिता दुःशीला तिष्ठति यस्माद्यतिभिः समम् ॥ २७ ॥
निश्रुत्य ततो निजकर्णकटुकवचनानि भणितुमारब्धः । मेदृशं प्रजल्पत सम्भवति नैतदेतस्याः ॥ २८ ॥
अपि नभस्तलान्निपतति रविरथरत्नं कथमपि दिव्यवसात् । तथापि सुभद्रा शीलस्य खण्डनं न करोति कदापि ॥२९॥
अप्युत्पद्यते गगनाङ्गणे विकसत्कमलवनखण्डम् । तथापि सुभद्रा शीलस्य खण्डनं करोति न कदापि ॥ ३० ॥
अपि कथमपि जगति जायते पुत्रो वन्ध्याया विधिनियोगेन । तथापि सुभद्रा शीलस्य खण्डनं करोति न कदापि ॥३१॥
अपि कथमप्युपरि गच्छति वसुधा गगनमपि याति पातालम् । तथापि सुभद्रा शीलस्य खण्डनं करोति न कदापि ॥३२॥

**तत्तो विलक्खवयणाणि ताणि जायाणि विहियमोणाणि । अह अन्नया सुभद्दाभवणम्मि समागओ साहू ॥३३॥**
**निप्पडिकम्मसरीरो दुक्करएकल्लपडिमपडिवन्नो । दिट्ठं तीए पविट्ठं तन्नयणे अणुयतणकणुयं ॥३४॥**
**चिंतइ य जहा एसो निप्पडिकम्मो मुणी महासत्तो । मा विणसउ ता एयस्स नयणमेएण कणुएण ॥३५॥**
**इय चिंतिउं सुभद्दाए झत्ति लहुयत्तयाए साहुस्स । दिंतीए तीए भिक्खं कणुयं जीहाए संगहियं ॥३६॥**
**तत्तो य सुभद्दाभालरुइरसिंदूरविरइओ तिलओ । संकंतो साहुनिडालमंडले दोहिं वि न नाओ ॥३७॥**
**दट्ठूण साहुभाले तिलयं उवलद्धछलपवेसाओ । तीए नणंदा-सासुय-भाउज्जायाओ मिलियाओ ॥३८॥**
**अक्खंति बुद्धदासस्स पेच्छ नियभारियासुसीलत्तं । सेवडयनिडालम्मिपेच्छिय तिलयस्स पडिबिंबं ॥३९॥**
**तो जाव बुद्धदासो जोयइ ता तं तहट्ठियं दट्ठुं । संजायपच्चाओ सो झत्ति विरत्तो कलत्तम्मि ॥४०॥**
**तन्नाऊण सुभद्दाए चिंतियं पेच्छ केरिसं जायं ? जायं मज्झ कलंकं मुणिणो वि महाणुभावस्स ॥४१॥**
**विसयमहाविसमोहियमणाण गिहवासबंधबद्धाण । जायंति कलंकाइं जियाण जं तं किम्च्छरियं ? ॥४२॥**
**ईसा-विसाय-मय-मोह-माणमहियाण निहयबुद्धीण । जायंति कलंकाइं जियाण जं तं किमच्छरियं ? ॥४३॥**
**जं मज्झ विसयलालसमणाए गिहवासमहिवसंतीए । जाओ एस कलंको मणयं पि न मे इमं दुक्खं ॥४४॥**
**जं पुण मयंकमणिनिम्मलस्स जिणसासणस्स मालिन्नं । मह कज्जे संजायं तं दूमइ माणसे मज्झ ॥४५॥**
**ता जइ जिणिंदसासणमालिन्न नो कहं पि अवणेमि । तो मज्झ मणसमाही न होज्ज मरणे वि नियमेण ॥४६॥**

---

ततो विलक्षवदनानि तानि जातानि विहितमौनानि । अथान्यदा सुभद्राभवने समागतः साधुः ॥ ३३ ॥
निष्प्रतिकर्मशरीरो दुष्करैकलप्रतिमाप्रतिपन्नः । दृष्टं तया प्रविष्टं तन्नयनेऽणुकतृणकणुकम् ॥ ३४ ॥
चिन्तयति च यथैष निष्प्रतिकर्मो मुनि र्महासत्त्वः । मा विनश्यतु तावदेतस्य नयनमेतेन कणुकेन ॥ ३५ ॥
इति चिन्तयित्वा सुभद्रया शीघ्रं लघुकत्वेन साधोः । दत्तया तया भिक्षां कणुकं जीव्ह्या सङ्गृहीतम् ॥ ३६ ॥
ततश्च सुभद्राभालरुचिरसिन्दूरविरचितस्तिलकः । सङ्क्रान्तः साधुनिडालमण्डले द्वाभ्यामपि न ज्ञातः ॥ ३७ ॥
दृष्ट्वा साधुभाले तिलकमुपलब्धच्छलप्रवेशाः । तस्या ननान्द-श्वसु-भ्रातृजायाः मिलिताः ॥ ३८ ॥
आख्यन्ति बुद्धदासस्य पश्य निजभार्यासुशीलत्वम् । श्वेतपटकनिडाले दृष्ट्वा तिलकस्य प्रतिबिम्बम् ॥ ३९ ॥
ततो यावद्बुद्धदासः पश्यति तावत्तत्तथास्थितं दृष्ट्वा । सञ्जातप्रत्ययः स शीघ्रं विरक्तः कलत्रे ॥ ४० ॥
तज्ज्ञात्वा सुभद्रया चिन्तितं पश्य कीदृशं जातम् ? । जातं मम कलङ्कं मुनेरपि महानुभावस्य ॥ ४१ ॥
विषयमहाविषमोहितमनसां गृहवाससम्बन्धबद्धानाम् । जायन्ते कलङ्कानि जीवानां यत्तत् किमाश्चर्यम् ? ॥ ४२ ॥
ईर्ष्या-विषाद-मद-मोह-मानमहितानां निहतबुद्धीनाम् । जायन्ते कलङ्कानि जीवानां यत्तत् किमाश्चर्यम् ? ॥ ४३ ॥
यन्मम विषयलालसमनसा गृहवासमधिवसन्त्याः । जात एष कलङ्को मनागपि न मे इदं दुःखम् ॥ ४४ ॥
यत्पुन मृगाङ्कमणिनिर्मलस्य जिनशासनस्य मालिन्यम् । मम कार्ये सञ्जातं तद् दुनोति मानसे मम ॥ ४५ ॥
ततो यदि जिनेन्द्रशासनमालिन्यं न कथमप्यपनयामि । तावन्मम मनसमाधिर्न भवेन्मरणेऽपि नियमेन ॥ ४६ ॥

इय चिंतिऊण अत्थमिय दिणयरे भवणजिणवरिंदाण । रइउं पकिट्ठपूयं पमज्जिऊणं महीवीढं ॥४७॥
तयणु सुभद्दा गिण्हइ महापइन्नं न जाव मालिन्नं । अवणेमि पवयणाओ न ताव पारेमि उस्सग्गं ॥४८॥
जो जिणसासणभत्तो सो अमरो होउ मज्झ पच्चक्खो । अह न वि होही तो मे काउस्सग्गे वि सन्नासो ॥४९॥
इय जा काउस्सग्गेण संठिया सा खणंतरं ताव । उज्जोयंतो भवणं समागओ सुरवरो एक्को ॥५०॥
चलचवलकुंडलधरो निम्मलघोलंतमुत्तियकलावो । वरमउड-कडय-केऊर-कंकणाभरणदिप्पंतो ॥५१॥
दिट्ठो य सुभद्दाए तो भणिया तेण साविए ! कहसु । किं संभरिओ अहयं ? भणइ सुभद्दा तओ एवं ॥५२॥
जिणसासणमालिन्नं अवणेहि तओ य हरिसिओ अमरो । जंपइ सुंदरि ! इण्हि खेयं मणयं पि मा कुणसु ॥५३॥
संपइ पुरीए चउरो पिहिऊणं गोउरे अहिट्ठिस्सं । तं मोत्तुं न हु अन्नो होही उग्घाडणसमत्थो ॥५४॥
गयणंगणम्मि ठाउं पभणिस्सं जा महासई का वि । सा उग्घाडउ चालणिकयसलिलेणं दुवाराइं ॥५५॥
उग्घाडिस्ससि तं चेव ताइं इय जंपिउं तओ तियसो । सोयामणिपुंजो इव झड त्ति अद्दंसणीहुओ ॥५६॥
तयणन्तरं सुभद्दा उस्सग्गं पारिऊण हिट्ठमणा । निग्गमइ निसं जाए पभायसमए पुरीलोओ ॥५७॥
उग्घाडइ जाव समुग्घडन्ति ता कह वि नो कवाडाइं । फोडंतस्स वि फुट्टंति न उण वज्जं व लोयस्स ॥५८॥
ता सहसा उच्छलिओ रउद्दहाहारवो पुरजणस्स । आरसइ एक्ककालं चउप्पयाणं समूहो वि ॥५९॥
तारिसरूवं नाऊण नरवई तयणु आउलीहूओ । चिंतइ एयं नणु दिव्वविलसियं किं पि संभविही ॥६०॥

---

इति चिन्तयित्वास्तमिते दिनकरे भवनजिनवरेन्द्राणाम् । रचयित्वा प्रकृष्टपूजां प्रमृज्य महीपीठम् ॥ ४७ ॥
तदनु सुभद्रा गृह्णाति महाप्रतिज्ञां न यावन्मालिन्यम् । अपनयामि प्रवचनस्य न तावत् पारयामि उत्सर्गम् ॥ ४८ ॥
यो जिनशासनभक्तः सोऽमरो भवतु मम प्रत्यक्षः । अथ नापि भविष्यति ततो मे कार्योत्सर्गेऽपि सन्यासः ॥ ४९ ॥
इति यावत्कार्योत्सर्गेण संस्थिता सा क्षणान्तरं तावद् । उद्योतयन्भवनं समागतः सुरवर एकः ॥ ५० ॥
चलचपलकुण्डलधरो निर्मलघुर्णन्मौक्तिककलापः । वरमुकुट-कटक-केयूर-कङ्कणाभरणदीप्यन् ॥ ५१ ॥
दृष्टश्च सुभद्रया ततो भणिता तेन श्राविके ! कथय । किं स्मृतोऽहं ? भणति सुभद्रा तत एवम् ॥ ५२ ॥
जिनशासनमालिन्यमपनय ततश्च हर्षितोऽमरः । जल्पति सुन्दरि ! इदानीं खेदं मनागपि मा कुरु ॥ ५३ ॥
संप्रति पूर्याश्चत्वारः विधाय गोपूरानधिस्थाष्यामि । त्वां मुक्त्वा न खल्वन्यो भविष्यत्युद्धाटनसमर्थः ॥ ५४ ॥
गगनाङ्गणे स्थित्वा प्रभणिष्यामि या महासती कापि । सोद्धाटयतु चलनिकृतसलिलेन द्वाराणि ॥ ५५ ॥
उद्धाटिष्यषि त्वं चैव तानीति जल्पित्वा ततस्त्रिदशः । सौदामिनिपुञ्ज इव झटित्यदर्शनीभूतः ॥ ५६ ॥
तदनन्तरं सुभद्रोत्सर्गं पारयित्वा हृष्टमना । निर्गमयति निशां जाते प्रभातसमये पुरीलोकः ॥ ५७ ॥
उद्धाटयति यावत्समुद्धटन्ति तावत्कथमपि न कपाटानि । स्फुटतोऽपि स्फुटन्ति न पुनर्वज्रमिव लोकस्य ॥ ५८ ॥
तावत्सहसोच्छलितो रौद्रहाहारवः पुरजनस्य । आरसत्येककालं चतुष्पदानां समूहोऽपि ॥ ५९ ॥
तादृशरुपं ज्ञात्वा नरपतिस्तदनु आकुलीभूतः । चिन्तयत्येतन्ननु दिव्यविलसितं किमपि सम्भविष्यति ॥ ६० ॥

**तत्तो य पुहइपालो परिहित्ता उल्लसाडयं सेयं । धूवकडच्छुयहत्थो होउं पउरेहिं परियरिओ ॥६१॥**

**विन्नवइ विणयपुव्वं विहियपणामो सुकोमलगिराहिं । काउं महापसायं निसुणउ विन्नत्तियं मज्झ ॥६२॥**

**देवस्स दाणवस्स व भूयस्य व किन्नरस्स कस्स वि य । जस्स मए अवरद्धं खमउ समग्गं पि सो मज्झ ॥६३॥**

**तत्तो गयणे ठाऊण तेण अमरेण भणियमेयं भो ! जा का वि इह पुरीए महासइत्तं समुव्वहइ ॥६४॥**

**सा रमणी चालणियापक्खित्तजलेण तिन्नि वाराओ । अच्छोडिउं कवाडे उग्घाडउ निव्वियप्पं ति ॥६५॥**

**तं निसुणिऊण अहमहमिगाए सव्वाओ पुरपुरंधीओ । राया-ऽमच्च-महायणभज्जाबहुयाओ वहुयाओ ॥६६॥**

**कयन्हाण-मंगलाओ महासईगव्वमुव्वहंतीओ । चालणिजलपक्खिवणे विग्गुत्ताओ समग्गाओ ॥६७॥**

**विग्गुत्ताओ जा सव्वनयरिनारीओ रायपज्जतं । ताव सुभद्दा सासुयपभिईण पुरो भणइ एवं ॥६८॥**

**अणुजाणसु अंब ! ममं अहमवि एयं जहा परिक्खेमि । हसिऊण तओ सव्वाओ ताओ एवं पयंपंति ॥६९॥**

**जाण कवाडाण कए विग्गुत्ताओ महासईओ वि । उग्घाडसि ताणि तुमं नूणं जा समणपरिभुत्ता ॥७०॥**

**ताण निवारंतीण वि संगहिया तीए चालणी पवरा । तीए जलं पक्खित्तं परिगलइ न बिंदुमित्तं पि ॥७१॥**

**जायाणि कसिणवयणाणि ताणि सव्वाणि तो सुभद्दा वि । नियकरयलकयचालिणिसलिला चलिया निवसयासे ॥७२॥**

**भूवालो वि सुभद्दं दट्ठुं करकलियचालिणीसलिलं । अब्भुट्ठिओ सपउरो संचलिओ सम्मुहो तीए ॥७३॥**

**धरविलुलियसिरकमलो पणमित्तु महासईचरणकमलं । पभणइ माइ ! महासइ ! महापसायं करेऊण ॥७४॥**

---

ततश्च पृथिवीपाल: परिधायार्द्रसाटकं श्वेतम् । धूपकडच्छकहस्तो भूत्वा पौरै: परिवारित: ॥ ६१ ॥

विज्ञापयति विनयपूर्वं विहितप्रणाम: सुकोमलगीर्भि: । कृत्वा महाप्रसादं निशृणोतु विज्ञप्तिं मम ॥ ६२ ॥

देवस्य दानवस्य वा भूतस्य वा किन्नरस्य कस्यापि च । यस्य मयापराद्धं क्षमतां समग्रमपि स मम ॥ ६३ ॥

ततो गगने स्थित्वा तेनामरेण भणितमेतद्भो: ! । या कापीह पूर्यां महासतीत्वं समुद्वहति ॥ ६४ ॥

सा रमणी चालनिका प्रक्षिप्तजलेन त्रयो वारा: । आच्छोट्य कपाटानुद्घाटयतु निर्विकल्पमिति ॥ ६५ ॥

तन्निश्रुत्याहमहमिकया सर्वा: पुरपुरन्ध्र्य: । राजाऽमात्य-महाजनभार्यावधूका बहव:वध्व: ॥ ६६ ॥

कृतस्नान-मङ्गला महासतीगर्वमुद्वहन्त्य: । चालनीजलप्रक्षेपने विगुप्ता: समग्रा: ॥ ६७ ॥

विगुप्ता यावत्सर्वनगरीनार्या राजपर्यन्तम् । तावत्सुभद्रा श्वसूप्रभृतीनां पुरो भणत्येवम् ॥ ६८ ॥

अणुजानीह्यम्ब ! मामहमप्येतद्यथा परीक्षे । हसित्वा तत: सर्वास्ता एव् प्रजल्पन्ति ॥ ६९ ॥

येषां कपाटानां कृते विगुप्ता महासत्योऽपि । उद्घाट्यसि तानि त्वं नूनं या श्रमणपरिभुक्ता ॥ ७० ॥

तासां निवारयन्तीनामपि सङ्गृहीता तया चालनी प्रवरा । तस्यां जलं प्रक्षिप्तं परिगलति न बिन्दुमात्रमपि ॥ ७१ ॥

जातानि कृष्णवदनानि तानि सर्वाणि तत: सुभद्रापि । निजकरतलकृतचालनीसलिला चलिता नृपसकाशे ॥ ७२ ॥

भूपालोऽपि सुभद्रां दृष्ट्वा करकलितचालनीसलिलम् । अभ्युत्थित: सपौर: सञ्चलित: संमुखस्तस्या: ॥ ७३ ॥

धराविलुलितशिर:कमल: प्रणम्य महासती चरणकमलम् । प्रभणति मात ! महासति ! महाप्रसादं कृत्वा ॥ ७४ ॥

**उग्घाडेसु कवाडे पुरीपओलीण ता सुभद्दा वि । पुव्वदुवारं पत्ता अणुगम्मंती नरिंदेण ॥७५॥**
**एत्थंतरे महासइकोउयसक्खित्तमाणसा गयणे । संपत्ता सुर-किन्नर-विज्जाहर-असुरसंघा य ॥७६॥**
**तयणंतरं सुभद्दाए तिन्नि वाराओ चालणिजलेण । अच्छोडिए कवाडे काऊणं जिणनमोक्कारं ॥७७॥**
**उग्घाडिए कवाडे झड त्ति चिक्कारगहिरनिग्घोसे । उच्छलिए जयसद्दे सद्धिं सुरदुंदुहिसरेण ॥७८॥**
**मुक्का य कुसुमवुट्ठी सुरेहिं परिमलभमंतभमरउला । जयउ सुभद्दासीलं ति जंपिउं तीए सिरउवरे ॥७९॥**
**तो भणइ पुहइपालो धन्ना सि तुमं महासईतिलए । जीए सीलेणेवं अमरा वि कुणंति सन्निज्झं ॥८०॥**
**तं जयउ जए सीलं जस्स पभावेण तवइ तरणी वि । वरिसइ य निययसमयम्मि जलहरो अमयधाराहिं ॥८१॥**
**तयणंतरं सुभद्दा भूवइपज्जंतपउरपरियरिया । गंतूण समुग्घाडइ दाहिण-पच्छिमपओलीओ ॥८२॥**
**तत्तो उत्तरदारं जलेण अभिसिंचिउं भणइ एवं । उग्घाडउ सा एयं जा वहइ महासईगव्वं ॥८३॥**
**अज्ज वि चंपानयरीए सा तह च्चेव चिट्ठइ पओली । तयणु सुभद्दा जिणनाहमंदिरं पि समुच्चलिया ॥८४॥**
**सलहिज्जंती सुरवरगणेहिं विज्जाहरेहिं थुव्वंती । बंदीहिं पढिज्जंती गिज्जंती अमररमणीहिं ॥८५॥**
**पणमिज्जंती नायरजणेहिं जिणपवयणं पभावंती । जिणमंदिरम्मि पत्ता थुणिऊण जिणेसरं तत्थ ॥८६॥**
**तत्तो गंतु वसहीए साहुणो वंदिऊण भत्तीए । संचलिया नियभवणे धरणियले निहियनियनयणा ॥८७॥**
**नच्चिरविलासिणीसुं परिवज्जिरगहिरतूरनियरेसुं । गिज्जंतचच्चरीसुं संपत्ता नियभवणम्मि ॥८८॥**

---

उद्घाट्य कपाटान् पुरप्रतोलीनां तावत्सुभद्रापि । पूर्वद्वारं प्राप्तानुगच्छन्ती नरेन्द्रेण ॥ ७५ ॥
अत्रान्तरे महासतीकौतुकाक्षिप्तमानसा गगने । संप्राप्ताः सुर-किन्नर-विद्याधरासुरसङ्घाश्च ॥ ७६ ॥
तदनन्तरं सुभद्रया त्रयो वाराश्चालनीजलेन । आच्छोटिते कपाटे कृत्वा जिननमस्कारम् ॥ ७७ ॥
उद्घाटिते कपाटे झटिति चित्कारगम्भीरनिर्घोषे । उच्छलिते जयशब्दे सार्द्धं सुरदुन्दुभिस्वरेण ॥ ७८ ॥
मुक्ता च कुसुमवृष्टिः सुरैः परिमलभ्रमद्भ्रमरकुला । जयतु सुभद्राशीलमिति जल्पित्वा तस्याः शिरोपरि ॥ ७९ ॥
ततो भणति पृथिवीपालो धन्यासि त्वं महासतीतिलके ! । यस्याः शीलेनैवममरा अपि कुर्वन्ति सान्निध्यम् ॥ ८० ॥
तज्जयतु जगति शीलं यस्य प्रभावेन तपति तरणिरपि । वर्षति च नियतसमये जलधरोऽमृतधाराभिः ॥ ८१ ॥
तदनन्तरं सुभद्रा भूपतिपर्यन्तपौरपरिकरिता । गत्वा समुद्घाट्यति दक्षिण-पश्चिमप्रतोल्यौ ॥ ८२ ॥
तत उत्तरद्वारं जलेनाभिषिञ्च्य भणत्येवम् । उद्घाटयतु सैतद्या वहति महासतीगर्वम् ॥ ८३ ॥
अद्यापि चम्पानगर्यां सा तथा चैव तिष्ठति प्रतोली । तदनु सुभद्रा जिननाथमन्दिरं प्रति समुच्चलिता ॥ ८४ ॥
श्लाध्यमाना सुरवरगणै विद्याधरैः स्तूयमाना । बन्दिभिः पठ्यमाना गीयमानामररमणीभिः ॥ ८५ ॥
प्रणम्यमाना नागरजनै र्जिनप्रवचनं प्रभावयन्ती । जिनमन्दिरे प्राप्ता स्तुत्वा जिनेश्वरं तत्र ॥ ८६ ॥
ततो गत्वा वसत्यां साधून् वन्दित्वा भक्त्या । सञ्चलिता निजभवने धरणितले निहितनिजनयना ॥ ८७ ॥
नृत्यद्विलासिनिषु परिवाद्यद्गम्भीरतूर्यनिकरेषु । गीयमानाचर्चरिषु सम्प्राप्ता निजभवने ॥ ८८ ॥

तो पणमिऊण राया तग्गुणरंजियमणो गओ सगिहं । सीलेण सुभद्दाए दइओ वि अईव अणुरत्तो ॥८९॥

इय सा सीलपहावा सलाहणिज्जा सयाण लोयाण । भोत्तूण विसयसोक्खं उववन्ना तियसलोगम्मि ॥९०॥

॥ सुभद्राख्यानकं समाप्तम् ॥१६॥

जह सीलरयणमेयाहिं पालियं जायमुभयलोयहियं । तह अन्नस्स वि जायइ तम्हा परिपालियव्वमिणं ॥१॥

दुष्टापकारि मदनारि मलापहारि सद्वारि तीक्ष्णतरवारि मघारिभेदे ।

धर्मोपकारि गुणधारि विपत्तिवारि, संसारिजीवविसराः ! परिपात शीलम् ॥१॥

॥ इति श्रीमदाम्रदेवसूरिविरचितवृत्तावाख्यानकमणिकोशे शीलमाहात्म्यप्रख्यापनो नाम तृतीयोऽधिकारः समाप्तः ॥३॥

---

ततः प्रणम्य राजा तद्गुणरञ्जितमना गतः स्वगृहम् । शीलेन सुभद्राया दयितोऽप्यतीवानुरक्तः ॥ ८९ ॥

इति सा शीलप्रभावाच्छ्लाघनीया शतानां लोकानाम् । भुक्त्वा विषयसौख्यमुत्पन्ना त्रिदशलोके ॥ ९० ॥

॥ सुभद्राख्यानकं समाप्तम् ॥ १६ ॥

यथा शीलरत्नमेताभिः पालितं जातमुभयलोकहितम् । तथान्यस्यापि जायते तस्मात्परिपालितव्यमिदम् ॥१॥

● ● ●

## [ ४. तपोमाहात्म्यवर्णनाधिकारः । ]

व्याख्यातं शीलम् । अधुना क्रमप्राप्तं तपो व्याख्यायत इति प्रतिपादयन्नाह –

जहसत्ति तवं कुज्जा सुहजणणं सयलकम्मनिद्दलणं ।
वीर-विसल्ला-सउरी-वीरमई-रुप्पिणि-महु व्व ॥ ६ ॥

व्याख्या – 'यथाशक्ति' शक्त्यनतिक्रमेण 'तपः' अनशनादि 'कुर्याद्' विदध्यात् 'सुखजनकं' शर्मकारकं 'सकलकर्मनिर्दलनं' समस्तकर्मविनाशकम् । दृष्टान्तानाह-वीरश्च-चरमतीर्थाधिपतिः विशल्या च- द्रोणराजपुत्रिका शौरिश्च-वसुदेवः वीरमतिश्च दवदन्तिजीवः प्राग्भवे मम्मणराजपत्नी रुक्मिणी च – वासुदेवकलत्रं मधुश्च-रुक्मिणपुत्रः प्रद्युम्नपूर्वभवजीवः ते वीर-विशल्या-शौरि-वीरमतिरुक्मिणी-मधवः तद्वद् इत्यक्षरार्थः ॥ ९ ॥ भावार्थस्त्वाख्यानकगम्यः । तानि चामूनि । तत्रापि क्रमप्राप्तं वीराख्यानकमाख्यायते । तच्च यथा –

श्रीमन्महावीरो नन्दिवर्धनाय समस्तमपि राज्यं समर्प्य प्रव्रज्यां प्रतिपद्य पञ्चसमितिसमितस्त्रिगुप्तिगुप्तः समतृण-मणि-लेष्टुकाञ्चनः पञ्चमहाव्रतगुरुभारधुराधरणधौरेयोऽष्टादशशीलाङ्गसहस्त्रालङ्कृतविग्रहो निस्सङ्ग-विहारेण विहरमाणः अनुकूल-प्रतिकूलान् दिव्यादीनुपसर्गान् क्षुदादिपरीषहांश्चाव्यथितमना अधिसहमानः षष्ठा-ऽष्टमादि यावत् षण्मासान्ता विचित्रं तपः कृतवान् । तदनु च शुक्लध्यानानलेन निर्दह्य निःशेषं कर्मकान्तारं मोक्षं कर्म ( ? ) प्राप्तवान् । तथा सर्वं ग्रामचिन्तकप्रमुखं सप्तविंशतिप्रमाणभवसम्बद्धं [ चरितं ] मूलावश्यकवीर-चरितादवसेयमिति ॥

॥ सङ्क्षिप्ततरं वीरचरिताख्यानकं समाप्तम् ॥१७ ॥

इदानीं विसल्लाख्यानकमारभ्यते । तच्चेदम्-

पुव्वविदेहे पुंडरिगिणि त्ति डिंडीरपंडुपासाया । जिण-चक्किरिद्धिजुत्ता परिभवइ पुरिं सुराणं पि ॥१॥

रमणीनयणाणंदो राया तत्थऽत्थि तिहुयणाणंदो । सोहग्गजयपडायाऽणंगसरा तस्स वरधूया ॥२॥

दिट्ठा य पुन्नवसुणा भिच्चेणं तस्स चेव नरवइणो । सव्वालंकियदेहा अत्थाणे जणयपासम्मि ॥३॥

तो तीए धवललोयणसरसल्लियमाणसेण सहस त्ति । ओवडिय भडसमक्खं भुयदंडेहिं समुक्खित्ता ॥४॥

एत्थंतरम्मि सुहडा पडिभडउड्डुमरसमरसोंडीरा । करवाल-कुंत-मोग्गर-मुसुंढि-उड्डामरकरग्गा ॥५॥

आबद्धभिउडिभासुरभालयला नहयलेण उप्पइउं । दट्ठुं पलायमाणं हक्कित्तु हढेण ओहडिओ ॥६॥

उम्मुक्कपिक्कहक्को वाहुडिओ सुहडसम्मुहो सो उ । भामियकरालकरवालमंडलो सीसधरियफरो ॥७॥

अन्नोन्नं संजाओ महाहवो मुक्कहक्कहुंकारो । अवरोप्पररिउपहरणसंघट्टुट्ठंतजलणकणो ॥८॥

जाणित्तु सुत्तसेन्नं दुज्जेयं संभरेइ पन्नत्तिं । तीए समप्पिय बालं पलाइउं सो कहिं पि गओ ॥९॥

पन्नत्तीए पीवरपओहरी बालिया अरन्नम्मि । खित्ता वराह-रू रू -रोज्झजणियघोरारवरउद्दे ॥१०॥

सुहडेहिं तओ कंदर-कराल-गिरि-सिहर-सरिय-धरणीसु । निउणं निरिक्खमाणेहिं बालिया कह वि न हु दिट्ठा ॥११॥

आगंतूणं तो रायपायपुरओ कहंति ते नाह ! । जल-थल-नहयलमज्झे निरूविया कह वि न हु दिट्ठा ॥१२॥

तं निसुणिउं नरिंदो अक्कंदइ सोयसल्लियसरीरो । हा वच्छे ! तुह विरहे नयरं नरयं विसेसइ ॥१३॥

---

पूर्वविदेहे पुण्डरिगिणीति डिण्डीरपाण्डुप्रासादा । जिन-चक्र्यर्द्धियुक्ता परिभवति पुरिं सुराणामपि ॥ १ ॥

रमणीनयनान्दो राजा तत्रास्ति त्रिभुवनानन्दः । सौभाग्यजयपताकाऽनङ्गस्वरा तस्य वरदुहिता ॥ २ ॥

दृष्टा च पुनर्वसुना भृत्येन तस्य चैव नरपतेः । सर्वालङ्कृतदेहाऽऽस्थाने जनकपार्श्वे ॥ ३ ॥

तदा तस्या धवललोचनशरशल्यितमानसेन सहसेति । अवपतितो भटसमक्षं भुजदण्डैः समुत्क्षिप्ता ॥ ४ ॥

अत्रान्तरे सुभटाः प्रतिभटोड्डुभरसमरसौण्डिरा । करवाल-कुन्त-मुद्गर-मुसुण्ढि-उड्डामरकराग्राः ॥ ५ ॥

आबद्धभृकुटिभासुरभालतला नभस्तलेनोत्पत्य । दृष्ट्वा पलायमानमाकार्य बलादाक्रान्तः ॥ ६ ॥

उन्मुक्तपक्वमृत्कारो व्याघुटितः सुभटसम्मुखः स तु । भ्रामितकरालकरवालमण्डलः शीर्षधृतफलकः ॥ ७ ॥

अन्योन्यं सञ्जातो महाहवो मुक्तहक्काहुङ्कारः । अपरापररिपुप्रहरणसंघट्टोत्तिष्ठज्जलणकणः ॥ ८ ॥

ज्ञात्वा शत्रुसैन्यं दुर्जयं स्मरति प्रज्ञप्तिम् । तस्याः समर्प्य बालां पलायित्वा स कुत्रापि गतः ॥ ९ ॥

प्रज्ञप्त्या पीवरपयोधरी बालिकाऽरण्ये । क्षिप्ता वराह-रुरु-रोझजनितघोरारवरौद्रे ॥ १० ॥

सुभटैस्ततः कन्दर-कराल-गिरिशिखर-सरिद्धरणीषु । निपूणं निरीक्षमाणै र्बालिका कथमपि न खलु दृष्टा ॥ ११ ॥

आगत्य ततो राजपादपुरतः कथयन्ति ते नाथ ! । जल-स्थल-नभस्तलमध्ये निरुपिता कथमपि न खलु दृष्टा ॥ १२ ॥

तन्निश्रुत्य नरेन्द्र आक्रन्दति शोकशल्यितशरीरः । हा वत्से ! तव विरहे नगरं नरकं विशेषयति ॥ १३ ॥

**अह सा अणंगसरवालिया वि नियसयणविरहिया रन्ने ॥ रोयइ रोयावंती कलुणसरेणं पसुगणं पि ॥१४॥**

**हा ताय ! ताय ! तायसु आगंतूणं महाडईमज्झे । तं पि हु मं मंभीससु नियदुहियावच्छले ! माए ! ॥१५॥**

**हा भाय ! भाय ! भीयं भइणिं भयभरवम्मि रन्नम्मि । रक्ख रुरु-सीह-संबर-सद्दूलारवरउद्दम्मि ॥१६॥**

**संभरिऊणं सयणे पुणो पुणो विलविउं विचिंतेइ । इह मज्झ अणाहाए सरणं ता होउ जिणनाहो ॥१७॥**

**अणवरयभवपरंपरसमुवज्जियदुरियरासिनिद्दलणं । ता किं पि अहमिहेव य करेमि घोरं तवच्चरणं ॥१८॥**

**इय चिंतिऊण नियमइ हत्थसयाओ परेण परिभमणं । तस्सब्भंतरनिवडियफल-मूलेहिं कयाहारा ॥१९॥**

**इय निव्वेयपहाणं संवेयगुणेण संगयं गरुयं । कुणइ तवं सुद्धमणा वित्तीसंखेवरूवमिणं ॥२०॥**

**एवंविहतिव्वतवेण वाससहसत्तयं गमेऊण । कयभत्तपरिच्चाया परियत्तंती नमोक्कारं ॥२१॥**

**एत्थंतरम्मि सोदासखेयरो मेरुसिहरजिणनाहे । वंदित्तु तो नियत्तो समागओ तम्मि उद्देसे ॥२२॥**

**तम्मि समयम्मि सामलकरालजमरायबाहुदंडेण । अइधोरकालरत्तीरमणीसिरवेणिदंडेण ॥२३॥**

**विहिसुत्तहारनिम्मियमहिमंडलगुरुपमाणदंडेण । पेच्छइ गसिज्जमाणं बालं अयगरभुयंगेणं ॥२४॥**

**तं पिच्छिऊण उच्छलियकोवआबद्धभिउडिभासुरिओ । आयड्ढियकरवालो दारइ जा अयगरं ताव ॥२५॥**

**करुणारसभरमंथरगिराए बालाए वारिओ खयरो । तवसोसियस्स गयजीवियस्स अथिरस्स रूवस्स ॥२६॥**

**बहुदिवसछुहापरिपीडिएण पत्तस्स( ऽ )सारदेहस्स । उरगेणं मज्झ कए इमिणा किं मारिएणं ति ॥२७॥**

---

अथ साऽनङ्गशरबालिकापि निजस्वजनविरहिताऽरण्ये । रोदिति रोदयन्ती करुणस्वरेण पशुगणमपि ॥ १४ ॥

हा तात ! तात ! त्रायस्वागत्य महाटवीमध्ये । त्वमपि खलु मां मां भाषस्व निजदुहितृवत्सले ! मात ! ॥ १५ ॥

हा भ्रात ! भ्रात ! भीतां भगिनिं भयभैरवेऽरण्ये । रक्ष रुरु-सिंह-शाबर-शार्दुलारवरौद्रे ॥ १६ ॥

स्मृत्वा स्वजनान् पुनः पुनर्विलप्य विचिन्तयति । इह ममानाथायाः शरणं तावद्भवतु जिननाथः ॥ १७ ॥

अनवरतभवपरम्परसमुपार्जितदूरितराशिनिर्दलनम् । तावत् किमपि अहमिहैव च करोमि घोरं तपश्चरणम् ॥ १८ ॥

इति चिन्तयित्वा नियमति हस्तशतात्परेण परिभ्रमणम् । तस्याभ्यन्तरनिपतितफलमूलैः कृताहारा ॥ १९ ॥

इति निर्वेदप्रधानं संवेगगुणेन सङ्गतं गुरुकम् । करोति तपः शुद्धमना वृत्तिसंक्षेपरुपमिदम् ॥ २० ॥

एवंविधतीव्रतपसा वर्षसहस्त्रत्रयं गमयित्वा । कृतभक्तपरित्यागा परिवर्तन्ती नमस्कारम् ॥ २१ ॥

अत्रान्तरे सोदासखेचरो मेरुशिखरजिननाथान् । वन्दित्वा ततो निवृत्तः समागतस्तस्मिन्नुद्देशे ॥ २२ ॥

तस्मिन् समये श्यामलकरालयमराजबाहुदण्डेन । अतिघोरकालरात्रिरमणिशिरोवेणिदण्डेन ॥ २३ ॥

विधिसूत्रधारनिर्मितमहिमण्डलगुरुप्रमाणदण्डेन । पश्यति ग्रस्यमानां बालामजगरभुजङ्गेण ॥ २४ ॥

तां दृष्ट्वोच्छलितकोपाबद्धभृकुटिभासुरितः । आकृष्टकरवालो दारयति यावदजगरं तावत् ॥ २५ ॥

करुणारसभरमन्थरगिरा बालया वारितः खेचरः । तपःशोषितस्य गतजीवितस्यास्थिरस्य रुपस्य ॥ २६ ॥

बहुदिवसक्षुधापरिपीडितेन प्राप्तस्यासारदेहस्य । उरगेणं मम कृते अनेन किं मारितेनेति ॥ २७ ॥

**कहियव्वं मह पिउणो तुह कन्ना अणसणट्ठियाऽरन्ने । अक्खंडियसीलगुणा गिलिया उरगेण सुद्धमणा ॥२८॥**

**गंतु रन्नो खयरेण साहिओ तीए वइयरो सव्वो । राया वि कत्थ कत्थ ? त्ति जंपिरो तत्थ संपत्तो ॥२९॥**

**अन्नत्थ कहिं गिलिऊण बालियं अयगरो गओ ताव । राया वि सोयसल्लियहियओ तत्तो पडिनियत्तो ॥३०॥**

**बाला मरिउं देवी संजाया पढमदेवलोगम्मि । विहियतवो पुन्नवसू वि तव्विमाणे सुरो जाओ ॥३१॥**

**तत्तो चुया समाणा कोउगमंगलपुरे समुप्पन्ना । सिरिदोणमेहरन्नो सुया विसल्ल त्ति नामेण ॥३२॥**

**पुव्वभवचिन्नदुक्करतवचरणपभावलद्धमहिमाए । तम्मज्जणसलिलेण वि देसे रोगा पणस्संति ॥३३॥**

**॥ विसल्लाख्यानकं समाप्तम् ॥१८॥**

## इदानीं शौर्याख्यानकमारभ्यते । तच्चेदम्-

**मगहामहीमहेलालीलाकमलम्मि सालिगाममम्मि । गोयमगोत्तो विप्पो रुइरंगोऽणंगरूवोवि ॥१॥**

**तप्पणइणीए गब्भागयम्मि पुत्तम्मि छट्ठमासम्मि । पंचत्तं संपत्तो जणओ जणणी वि जायम्मि ॥२॥**

**असुभोदएण सद्धिं विद्धिं सो जाइ सव्वजणवेसो । तप्पिइकयाणुगमण व्व निग्गया सयलधणरिद्धी ॥३॥**

**जाओ य अट्ठवरिसो खवखुरपुडसरिसचरणनहनियरो । करहकमसरिसचरणो खंजो अइसरलजंघजुओ ॥४॥**

**निस्सरियनाभिसुंढो कठोरअइगरुयजढरपिठरो य । निम्मंसपयडकीकसवच्छयलो विसमभुयजुयलो ॥५॥**

**लंबंतविसमओट्ठो खोसलदसणो[१]ऽतिवंकवयणो उ । अइचिबिडवंकघोणो तह चिपिडप्फरलनयणजुओ ॥६॥**

---

कथयितव्यं मम पितुस्तव कन्याऽनशनस्थिताऽरण्ये । अखण्डितशीलगुणा गलितोरगेण शुद्धमनाः ॥ २८ ॥

गत्वा राज्ञः खेचरेण कथितस्तस्या व्यतिकरः सर्वः । राजापि कुत्र कुत्रेति ? जल्पंस्तत्र संप्राप्तः ॥ २९ ॥

अन्यत्र कुत्र गलित्वा बालिकामजगरो गतस्तावद् । राजापि शोकशल्यितहृदयस्ततः प्रतिनिर्वृत्तः ॥ ३० ॥

बाला मृत्वा देवी सञ्जाता प्रथमदेवलोके । विहिततपः पूनर्वसुरपि तद्विमाने सुरोजातः ॥ ३१ ॥

ततश्च्युता सती कौतुकमङ्गलपुरे समुत्पन्ना । श्रीद्रोणमेघराज्ञः सुता विशल्येति नाम्ना ॥ ३२ ॥

पूर्वभवचीर्णदुष्करतपश्चरणप्रभावलब्धमहिमायाः । तन्मज्जनसलिलेनापि देशे रोगाः प्रणश्यन्ति ॥ ३३ ॥

॥ विशल्याख्यानकं समाप्तम् ॥ १८ ॥

### शौर्याख्यानकम् -

मगधामहीमहिलालीलाकमले शालिग्रामे । गौतमगोत्रो विप्रो रुचिराङ्गोऽनङ्गरुपोऽपि ॥ १ ॥

तत्प्रणयिन्या गर्भागते पुत्रे षष्ठमासे । पञ्चत्वं संप्राप्तो जनको जनन्यपि जाते ॥ २ ॥

अशुभोदयेन सार्धं वृद्धिं सो याति सर्वजन्यद्वेष्यः । तत्पितृकृतानुगमन इव निर्गता सकलधनर्द्धिः ॥ ३ ॥

जातश्चाष्टवर्षः खरक्षुरपुटसदृशचरणनखनिकरः । करभक्रमसदृशचरणः खञ्जोऽतिसरलजङ्घयुतः ॥ ४ ॥

निःसृतनाभिसुण्ढः कठोरातिगुरुकजठरपिठरश्च । निर्मांसप्रकटकीकशवक्षःस्थलो विषमभुजयुगलः ॥ ५ ॥

लम्बद्विषमौष्ठौ दन्तुरदशनोऽतिवक्रवदनस्तु । अतिचिपिटवक्रघ्राणस्तथा चिपिटकाणनयनयुगः ॥ ६ ॥

---

१. दन्तुरदशनः ।

टप्परकन्नो चउक्कोणमुंडओ कविलविरललहुकेसो । दुग्गंधो धूमसिहासामलगत्तो खलंतसरो ॥७॥
कुहियमुहगलियलालाविलित्तवच्छयललग्गमच्छीहिं । भक्खिज्जंतो भिक्खं परिब्भमंतो महीवीढे ॥८॥
अह संपत्तो मगहापुरम्मि माउलयपासमल्लीणो । तस्स परिणावणत्थं माउलएणं सधूयाओ ॥९॥
सत्त वि य पभणियाओ भणंति मरणे वि न य इमं अम्हे । परिणेमो अवरा वि हु थीओ थुक्कंति तं दट्ठुं ॥१०॥
तत्तो दुरंतदोहग्गदुक्खदूमियमणो स गंतूण । वेभारसेलसिहरं आरूढो जाव मरणत्थं ॥११॥
ता दिट्ठो एगेणं तवस्सिणा देसणाए पडिबुद्धो । पव्वाविऊण विहियं नामं से नंदिसेणो त्ति ॥१२॥
समहिज्जियएक्कारसअंगो संगहियसयलसुत्तत्थो । संजाओ गीयत्थो विहरइ समसत्तु-मित्तगणो ॥१३॥
छट्ठ-ऽट्ठम-दसम-दुवालसेहिं मास-ऽद्धमासखमणेहिं[१] । कणगावलि-रयणावलितवेहिं परिसोसियसरीरो ॥१४॥
अममो विसुद्धलेसो उवसग्ग-परीसहाण य अभीरु । वाउ व्व अपडिबद्धो निक्कंपो मंदरगिरि व्व ॥१५॥
सीहो व्व भयविमुक्को सोडीरो कुञ्जरो व्व मयमुक्को । चंदो व्व सोममुत्ती तवतेएणं दिणमणि व्व ॥१६॥
गयणमिव निरुवलेवो संखो व्व निरंजणो वियारेहिं । धरणिं पिव सव्वसहो महासमुद्दो व्व गंभीरो ॥१७॥
लाभम्मि अलाभम्मि य जीविय मरणे सुहे य दुक्खे य । सव्वत्थ वि समभावो समो य माणाऽवमाणेसु ॥१८॥
कुणइ गुरूण सयासे अभिग्गहं दसविहे वि समणाणं । वेयावच्चे गिण्हइ छट्ठपइण्णं लहुतवे वि ॥१९॥

---

टप्परकर्णश्चतुष्कोणमुण्डकः कपिलविरललघुकेशः । दुर्गन्धो धूम्रशिखाश्यामलगात्रः स्खलत्स्वरः ॥ ७ ॥
क्वथितमुखगलितलालाविलिप्तवक्षःस्थललग्नमक्षिकाभिः । भक्ष्यमाणो भिक्षां परिभ्रमन्महीपीठे ॥ ८ ॥
अथ सम्प्राप्तो मगधापुरे मातुलकपार्श्वमालीनः । तस्य परिणायनार्थं मातुलेन स्वदुहितरः ॥ ९ ॥
सप्तापि च प्रभणिता भणन्ति मरणेऽपि न चेमं वयम् । परिणयामोऽपरा अपि खलु स्त्रियो निष्ठुवन्ति तं दृष्ट्वा ॥ १० ॥
ततो दुरन्तदौर्भाग्यदुःखदूमितमनाः स गत्वा । वैभारशैलशिखरमारुढो यावन्मरणार्थम् ॥ ११ ॥
तावद् दृष्ट एकेन-तपस्विना देशनया प्रतिबुद्धः । प्रव्राज्य विहितं नाम तस्य नन्दिषेण इति ॥ १२ ॥
समधीतैकादशाङ्गः सङ्गृहीतसकलसूत्रार्थः । सञ्जातो गीतार्थो विहरति समशत्रु-मित्रगणः ॥ १३ ॥
षष्ठाष्टमदशमद्वादशै र्मासार्द्धमासक्षपणैः । कनकावलि-रत्नावलितपोभिः परिशोषितशरीरः ॥ १४ ॥
अममो विशुद्धलेश्य उपसर्ग-परीषहेभ्यश्चाभीरुः । वायुरिवाप्रतिबद्धो निष्कम्पो मन्दरगिरिरिव ॥ १५ ॥
सिंह इव भयविमुक्तः सौण्डिरः कुञ्जर इव मदमुक्तः । चन्द्र इव सौम्यमूर्तिस्तपस्तेजसा दिनमणिरिव ॥ १६ ॥
गगनमिव निरुपलेपः शङ्ख इव निरञ्जनो विकारैः । धरणिमिव सर्वंसहो महासमुद्र इव गम्भीरः ॥ १७ ॥
लाभेऽलाभे च जीविते मरणे सुखे च दुःखे च । सर्वत्रापि समभावः समश्च मानापमानेषु ॥ १८ ॥
करोति गुरुणां सकाशेऽभिग्रहं दशविधानपि श्रमणानाम् । वैयावृत्यं गृह्णाति षष्टप्रतिज्ञां लघुतपस्यपि ॥ १९ ॥

---

१. ०खवगोहिं-रं० ।

**इय जाव नियपइन्नं परिपालइ सो अखंडपरिणामो । बहुवाससहस्सेहिं गएहिं तो तस्स तवनिहिणो ॥२०॥**

**सोहम्मसहामज्झे वेयावच्चम्मि तस्स निच्चलयं । सुंथणइ अमरनाहो अहो ! कयत्थो मुणी एस ॥२१॥**

**वेयावच्चमि थिरो नो सद्दहियं सुरेहिं तं दोहिं । काऊण साहुवेसं एगो बाहिं ठिओ ताण ॥२२॥**

**वसहीए गओ बीओ गिम्हे खरतरणिताविओ स मुणी । छट्ठतवचरणपारणनिमित्तमुक्खिवइ जा पढमं ॥२३॥**

**नवकोडिसुद्धकवलं ता वाहरियं सुरेण जइ कोइ । अत्थि मुणी इह गच्छे गिलाणपडियरणकयनियमो ॥२४॥**

**पडिजागरउ गिलाणं विसमावत्थं इमं निसामेउं । तो नंदिसेणासाहू समुट्ठिओ उज्झिउं कवलं ॥२५॥**

**केणोसहेण कज्जं ? कहिं कहिं सो ? त्ति तं पयंपंतो । सुरसाहुणा वि भणियं पाउक्खालेण[१] अभिभूओ ॥२६॥**

**सो चिट्ठइ अडवीए तं पुण निल्लज्ज ! एत्थ निच्चिंतो । भोत्तुं महुराहारं सुयसि सुहेणं अहोरत्तं ॥२७॥**

**वेयावच्चकरो हं ति नाममेत्तेण विहियसंतोसो । तो भणइ नंदिसेणो न पमायाओ मए नायं ॥२८॥**

**पणमिय पुणो पुणो वि य खामइ तो अमरसाहुणं एसो । तक्खेत्त-कालदुल्लहलंभं बहुओसहसमूहं ॥२९॥**

**आणाविओ जलं पि हु उण्हं तो सुरवरेण पइगेहं । विहिया अणेसणा से तह वि अदीणो सुरं छलिउं ॥३०॥**

**घेत्तूण तयं सव्वं संपत्तो तस्स साहुणो पासे । तो तं दट्ठुं स मुणी किर कुद्धो जंपए एवं ॥३१॥**

**चिट्ठामि अहमरन्ने रोगमहावेयणाए अकन्तो । तं पुण पाविट्ठ ! निकिट्ठ ! दुट्ठ ! चिट्ठसि सुहं सुत्तो ॥३२॥**

---

इति यावन्निजप्रतिज्ञां परिपालयति सोऽखण्डपरिणामः । बहुवर्षसहस्रैर्गतैस्ततस्तस्य तपोनिधेः ॥ २० ॥

सौधर्मसभामध्ये वैयावृत्त्ये तस्य निश्चलताम् । संस्तौति अमरनाथोऽहो ! कृतार्थो मुनिरेषः ॥ २१ ॥

वैयावृत्ये स्थिरो न श्रद्धितं सुराभ्यां तद्द्वाभ्याम् । कृत्वा साधुवेशमेको बहि स्थितस्तयोः ॥ २२ ॥

वसत्यां गतो द्वितीयो ग्रीष्मे खरतरणितापितः स मुनिः । षष्टतपश्चरणपारणनिमित्तमुत्क्षिपति यावत् प्रथमम् ॥ २३ ॥

नवकोटिशुद्धकवलं तावद्व्याहृतं सुरेण यदि कोऽपि । अस्ति मुनिरिह गच्छे ग्लानप्रतिचरणकृतनियमः ॥ २४ ॥

प्रतिजागर्तु ग्लानं विषमावस्थमिमं निशम्य । ततो नन्दिषेणसाधुः समुत्थित उज्झित्वा कवलम् ॥ २५ ॥

केनौषधेन कार्यं ? कुत्र कुत्र स ? इति तं प्रजल्पन् । सुरसाधुनापि भणितं पायुक्षालेनाभिभूतः ॥ २६ ॥

स तिष्ठत्यटव्यां त्वं पुन निलज्ज ! अत्र निश्चिन्तः । भुक्त्वा मधुराहारं स्वपिषि सुखेनाहोरात्रम् ॥ २७ ॥

वैयावृत्यकरोऽहमिति नाममात्रेण विहित संतोषः । ततो भणति नन्दिषेणो न प्रमादान्मया ज्ञातम् ॥ २८ ॥

प्रणम्य पुनः पुनरपि च क्षाम्यति ततोऽमरसाधुमेषः । तत्क्षेत्र-कालदुर्लभलम्भं बहवोषधसमूहम् ॥ २९ ॥

आनायितो जलमपि खलूष्णं ततः सुरवरेण प्रतिगृहम् । विहितानैषणा तस्य तथाप्यदीनः सुरं छलित्वा ॥ ३० ॥

गृहीत्वा तकं सर्वं संप्राप्तस्तस्य साधोः पार्श्वे । तदा तं दृष्ट्वा स मुनिः किल क्रुद्धो जल्पत्येवम् ॥ ३१ ॥

तिष्ठाम्यहमरण्ये रोगमहावेदनयाऽऽक्रान्तः । त्वं पुनः पापिष्ठ ! निष्कृष्ट ! दुष्ट ! तिष्ठसि सुखं सुप्तः ॥ ३२ ॥

---

१. पायुक्षालेन मलोत्सर्गरोगेण ।

**निब्भच्छिओ वि एरिसवयणेहिं पुणो पुणो वि खामेइ । अणुजाणाविय असुईविलित्तमंगं नियकरेहिं ॥३३॥**
**पक्खालिउं कओ सो साहू खंधम्मि नंदिसेणेण । खलियम्मि पए ताडइ सिरम्मि तं करपहारेहिं ॥३४॥**
**मुंचइ दुगंधमसुइं उवरिं सो नंदिसेणतवनिहिणो । जंपि किं कढिणकरेहि धरसि पाविट्ठ ! मह अंगं ॥३५॥**
**किं न वियाणसि पीडं परस्स निब्भग्गसेहर ! अणज्ज ? । इय निट्ठुरं भणंतस्स तस्स सो नंदिसेणमुणी ॥३६॥**
**चिंतइ कहं समाहिं करेमि सम्मं इमस्स ? मग्गम्मि । तो जं करेमि पीडे मिच्छामिह दुक्कडं तस्स ॥३७॥**
**इय चिंतिऊण भणियं भयवं ! मा कुणह नियमणे खेयं । गंतूण नियवसहिं करेमि नीरोगयं तुज्झ ॥३८॥**
**तत्तो सुरेहि विमलेण ओहिणा जाणिओ जहा एसो । तावुत्तिन्नसुवन्नं व निक्कलंको महासत्तो ॥३९॥**
**तो दो वि कडय-कुंडल-किरीड-केऊर-हारिदिप्पंतं । नियरूवं काऊणं नमिऊण तओ थुणंति मुणिं ॥४०॥**
**जय सुररायपसंसिय ! मुणिवेयावच्चकरणतल्लिच्छ ! । आबालकालपालियबंभव्वय ! मुणिवर ! नमो ते ॥४१॥**
**तं मोत्तुं को अन्नो पालइ एवंविहं नियपइन्नं ? । माणे वियंभमाणे जियाण इय तं मुणिं थोउं ॥४२॥**
**कहिउं नियवुत्तंतमसद्दहमाणा इयं तओ अमरा । नियठाणं संपत्ता तत्तो साहू वि नियवसहिं ॥४३॥**
**निम्ममच्चित्तो गंतुं गुरूण चरणारविंदयं नमिउं । अविरयवेयावच्च आलोयइ सुद्धपरिणामो ॥४४॥**
**तो बहुवाससहस्से वेयावच्चं करेवि समणाणं । विहियाणसणो अंते परियत्तइ जा नमोक्कारं ॥४५॥**
**तो असुहकम्मपरिणइवसेण तं नंदिसेणासाहुस्स । दोहग्गं संभरियं चित्ते जह सयलनारीण ॥४६॥**

---

निर्भत्सितोऽप्येदृशवचनैः पुनः पुनरपि क्षामयति । अनुज्ञाप्याशूचिविलिप्तमङ्गं निजकरैः ॥ ३३ ॥
प्रक्षाल्य कृतः स साधुः स्कन्धे नन्दिषेणेन । स्खलिते पदे ताडयति शिरसि तं करप्रहारैः ॥ ३४ ॥
मुञ्चति दुर्गन्धमशूचिमुपरि स नन्दिषेणतपोनिधेः । जल्पति किं कठिनकरै र्धरसि पापिष्ट ! ममाङ्गम् ॥ ३५ ॥
किं न विजानासि पीडां परस्य निर्भाग्यशेखर ! अनार्य ? । इति निष्ठुरं भणतस्तस्य स नन्दिषेणमुनिः ॥ ३६ ॥
चिन्तयति कथं समाधिः करोमि सम्यगेतस्य ? मार्गे । ततो यत्करोमि पीडां मिथ्यामीह दुष्कृतं तस्य ॥ ३७ ॥
इति चिन्तयित्वा भणितं भगवन् ! मा कुरुत निजमनसि खेदम् । गत्वा निजकवसतिं करोमि निरोगतां तव ॥ ३८ ॥
ततः सुराभ्यां विमलेनावधिना जानितो यथैषः । तापोत्तीर्णसुवर्णमिव निष्कलङ्को महासत्त्वः ॥ ३९ ॥
ततो द्वावपि कटक-कुण्डल-किरिट-केयूर-हारदीप्यमानम् । निजरुपं कृत्वा नत्वा ततः स्तुतो मुनिम् ॥ ४० ॥
जय सुरराजप्रशंसित ! मुनिवैयावृत्यकरणतत्पर ! । आबालकालपालितब्रह्मव्रत ! मुनिवर ! नमस्ते ॥ ४१ ॥
त्वां मुक्त्वा कोऽन्यः पालयत्येवंविधां निजप्रतिज्ञाम् ? । माने विजृम्भमाणे जीवानामिति तं मुनिं स्तुत्वा ॥ ४२ ॥
कथयितुं निजवृत्तान्तमश्रद्धमानाविदं ततोऽमरौ । निजस्थानं संप्राप्तौ ततः साधुरपि निजवसतिम् ॥ ४३ ॥
निर्ममचित्तो गत्वा गुरुणां चरणाविन्दकं नत्वा । अविरतवैयावृत्त्यमालोचयति शुद्धपरिणामः ॥ ४४ ॥
ततो बहुवर्षसहस्रान् वैयावृत्यं कृत्वा श्रमणानाम् । विहितानशनोऽते परिवर्त्तयति यावन्नमस्कारम् ॥ ४५ ॥
ततोऽशुभकर्मपरिणतिवशेन तन्नन्दिषेणसाधोः । दौर्भाग्यं स्मृतं चित्ते यथा सकलनारीणाम् ॥ ४६ ॥

**जाओ अहं अणिट्ठो दिट्ठो वि हु भाविओ न कस्सावि । तह जणणि-जणय-धण-रिद्धिनाससंभरणभावेण ॥४७॥**
**वारंताण वि साहूण तेण विहियं नियाणयं एयं । जइ मज्झ तवस्स फलं समत्थि ता अन्नजम्मम्मि ॥४८॥**
**होज्ज अहं तरुणीयणमणहरणो सयलसुंदरावयवो । नियसोहग्गविणिज्जियभुवणजणो जणमणाणंदो ॥४९॥**
**जह पउमरायरयणक्कएण गुंजाओ गयवरेण खरं । हरिणमएणिंगालं पीऊसरसेण जह गरलं ॥५०॥**
**वरघुसिणेण हलिद्दं कप्पद्दुमतरुवरेण एरंडं । तह तेण नियतवेणं सोहग्गं मग्गियं सारं ॥५१॥**
**तो मरिउं उप्पन्नो सत्तमकप्पम्मि भासुरो अमरो । तत्तो चुओ कुसट्टजणवयसोरियपुरे नयरे ॥५२॥**
**अंधगवन्हिनरेसरपियासुभद्दाए कुच्छिसंभूओ । उप्पन्नो कुमरत्तेण विहियवसुदेववरनामो ॥५३॥**
**दसमो य दसाराणं समुद्दविजएऽणवज्जरज्जसिरिं । पालंते सो सव्वंगसुंदरं जोव्वणं पत्तो ॥५४॥**
**सवणंतपत्तनयणो सारयहरिणंकबिंबसमवयणो । मंसल-पिहुवच्छयलो पुरग्गलादीहभुयजुयलो ॥५५॥**
**जत्तो जत्तो वच्चइ कुमरो वच्चंति तत्थ तत्थेव । निस्सेसरमणिनियरा परव्वसा तस्स रूवेण ॥५६॥**
**तस्संगमुस्सुयाओ नियपइपल्लंकविहियनिद्दाओ । रमणीओ समयणाओ सुविणे कुमरस्स संजोगं ॥५७॥**
**पाविय उस्सुमिणोऽयंति सुहय ! तुह विरहवेयणाविवसं । मं निव्वावसु नियअंगसंगमोसहपयाणेण ॥५८॥**
**तद्दंसणुस्सुयाओ पुच्छंति परोप्परं पुरंधीओ । कत्थऽच्छइ ? कत्थ गओ ? कत्थ सुओ सो हला सुहओ ? ॥५९॥**
**दट्ठूण पुणो कुमरं का वि कडक्खेहिं हणइ अह का वि । कुणइ नियअंगभंगं अंगावयवे पयासंती ॥६०॥**

---

जातोऽहमनिष्ठो दृष्टोऽपि खलु भावितो न कस्या अपि । तथा जननी-जनक-धनर्द्धिनाशस्मरणभावेन ॥ ४७ ॥
वार्यमाणानामपि साधूनां तेन विहितं निदानकमेतद् । यदि मम तपसः फलं समस्ति तावदन्यजन्मनि ॥ ४८ ॥
भवेयमहं तरुणीजनमनोहरणः सकलसुन्दरावयवः । निजसौभाग्यविनिर्जितभुवनजनो जनमनानन्दः ॥ ४९ ॥
यथा पद्मरागरत्नक्रयेण गुञ्जा गजवरेण खरम् । हरिणमदेनाङ्गारं पीयूषरसेन यथा गरलम् ॥ ५० ॥
वरघुसृणेन हरिद्रं कल्पद्रुमतरुवरेणैरण्डम् । तथा तेन निजतपसा सौभाग्यं मार्गितं सारम् ॥ ५१ ॥
ततो मृत्वोत्पन्नः सप्तमकल्पे भासुरोऽमरः । ततश्च्युतः कुशार्तजनपदशौर्यपूरे नगरे ॥ ५२ ॥
अन्धकवह्निनरेश्वरप्रियासुभद्रायाः कुक्षिसम्भूतः । उत्पन्नः कुमारत्वेन विहितवसुदेववरनामा ॥ ५३ ॥
दशमश्च दशार्हाणां समुद्रविजयेऽनवद्यराज्यश्रियम् । पालयति सः सर्वाङ्गसुन्दरं यौवनं प्राप्तः ॥ ५४ ॥
श्रवणान्तप्राप्तनयनः शारदहरिणाङ्कबिम्बसमवदनः । मांसल-पृथुवक्षःस्थलः पुरार्गलादीर्घभुजयुगलः ॥ ५५ ॥
यत्र यत्र व्रजति कुमारो व्रजन्ति तत्र तत्रैव । निःशेषरमणिनिकराः परवशास्तस्य रुपेण ॥ ५६ ॥
तत्सङ्गमोत्सुका निजपतिपल्यङ्कविहितनिद्राः । रमण्यः समदनाः स्वप्ने कुमारस्य संयोगम् ॥ ५७ ॥
सारथी चिन्तयति एष रणे भग्नः प्रायः कुलं लज्जयति लग्नः ।

मयि धूरि श्रान्ते भव मा कातरस्तव भटः एष सुसङ्गरसागरः ।

ततः कुमारं सारथी भणति महारथी ! हत हत वार्तांमैतां भण ।

एवं मयि युध्यमाने ! रणे शुध्यति तातो न पश्यति तेन विमनाः ॥ ७ ॥

---

१. मालइ रं० ।

**इम्व भणि निग्गउ जयसिरिमाणणु, गयघड भंजिवि जि ( म्व ) पंचाणणु ।**
**काइं असारइं इणि बलि भग्गइ, भरहिं सहुं वरि संगरि लग्गइ ।**
**सुहडि एक्कु सीहु वरि जोहिउ, हरिणसत्थु मं बहु उवरोहिउ ।**
**वरि हिल्लूर एक्क रयणायरि, मं छिल्लिरि अणुराउ दुहायरि ।**
**वरि नहु एक्कु हुयउ कप्पूरह, मं चंदणह सराउ असारह ।**
**तिसियइं अमयप्पुडु वरि परिपीयउ, जलघडि जम्मु वि खयह म नीयउ ।**
**जहिं बंदिणह सद्दु सुमणोहरु, जीसइ विलयसत्थु सुपओहरु ।**
**जहिं सुम्मइ वीणारवु मणहरु, धयमालाउलु जहिं थड्डु गुणहरु ।**
**तहिं रहवरु चोयहि, एम्व म जोयहि, निसिय खग्ग साहसजुयहं ।**
**बाहुबलिहि तणयह, वल्लह जणयह, पेक्ख परक्कमु मह भुयहं ॥८॥**
**एत्थंतरि जुज्झउ लग्गु बालु, भरहेसरिं सहु न पलयकालु ।**
**वरिसंतु निरंतरु नहि न ठाइ, सरधारहिं अहिणवु मेहु नाइ ।**
**भरहु वि आयड्ढियचावदंडु, बाणावलि मुंचइ बलपयंडु ।**

---

एवं भणित्वा निर्गतो जयश्रीमाननो गजघटां भनक्ति यथा पञ्चाननः ।
किमसाराण्यनया बले भज्यन्ते भरतेन सह वरंसङ्गरे लग्यते ।
सुभट एकःसिंहो वरं योद्धुं हरिणसार्थं मा बहूपरोधितम् ।
वरं तरङ्ग एको रत्नाकरे माऽसारे ऽनुरागो द्विधाकारी ।
वरमेकं हूतं कर्पूरस्य मा चन्दनस्य सरागमसारस्य ।
तृषितेनामृतपूटं वरं परिपीतं जलघटं यस्मिन्नपि क्षयं मा नीतम् ।
यत्र बन्दिनः शब्दं सुमनोहरं दृश्यते वनितासार्थं सुपयोधरम् ।
यत्र श्रूयते वीणारवो मनोहरो ध्वजमालाकुलं यत्र समूहं गुणधरम् ।
तत्र रथवरं चोदयैवं मा योजय निशीतखड्गसाहसयुतम् ।
बाहुबलेस्तनयस्य वल्लभस्य जनकस्य प्रेक्षस्व पराक्रमं मम भुजयोः ॥ ८ ॥
अत्रान्तरे योद्धुं लग्नो बालो भरतेश्वरेण सहेव प्रलयकालः ।
वर्षन् निरन्तरं नभसि न तिष्ठति शरधाराभिरभिनवो मेघो ज्ञायते ।
भरतोऽपि आकृष्ट चापदण्डो बाणावलिं मुञ्चति बलप्रचण्डः ।

**भरहेसरबाणह खलवि जाइ, खण[1] नहयलि खणि महिवीढि ठाई**
**खणि दीसइ करिवरि खण रहग्गि, खणि धणुहरि खणि भडनिसियखग्गि ।**
**खणि बाणि खणंतरि करिहि पुच्छि, खणि वियडि विलग्गइ रायवच्छि ।**
**जिम्व विज्जुपुंजु खणि दिट्ठनट्ठु, तिम्व भमइ रणंगमि गुणगरिट्ठु ।**
**न य छेपइ[2] भरहह सो सरेहिं, मुणिराउ व मयणह दुहयरेहिं ॥**
**नियधणुहरबाणिहिं, अगणियमाणिहिं, छाइउ सधउ सहउ[3] सरहु ।**
**जुज्झंतइं बालि, अइसुकुमालि, किउ विलक्खु संगरि भरहु ॥९॥**
**सो मंतिहिं वुत्तउ इम्व म तम्मु, एहु सव्वह सत्थह रणि अगम्मु ।**
**मणि चक्करयणु सरि सत्थरम्मु, एहु मारहि जइ पर मुयवि धम्मु ।**
**जं भरहिं निरुद्धउं जोगचक्कु, .................................. ।**
**तक्खणि मिलंतु जालावमालु, चउदिसिह फुरंत सिहिकणकरालु ।**
**करकमलि ठियउं तं चक्करयणु, पेक्खिवि कुमारु अक्खुहियवयणु ।**
**भरहेसरि वुच्चइ गुरुसिणेहिं, अज्ज वि जीवंतउ जाहि गेहि ।**

---

भरतेश्वरबाणस्य स्खलनं याति क्षणं नभस्तले क्षणं महीपीठे तिष्ठति ।
क्षणं दृश्यते करिवरे क्षणं रथाग्रे क्षणं धनुर्धरे क्षणं भयनिशीतखड्गे ।
क्षणं बाणे क्षणान्तरे करिणः पृच्छे क्षणं विकटे विलगति राजवत्से ।
यथा विद्युत्पुञ्जं क्षणे दृष्टनष्टं तथा भ्रमति रणाङ्गणे गुणगरिष्ठः ।
न च स्पृशति भरतस्य स शरैर्मुनिराज इव मदनस्य द्विधाकरैः ।
निजधनुर्धरबाणैरगणितमानैश्छादितं सगजं सहयं सरथम् ।
युध्यमाने बालेऽतिसुकुमाले कृतो विलक्षः सङ्गरे भरतः ।
स मन्त्रिभिरुक्त इत्थं मा ताम्यतु, एष सर्वस्य शस्त्रस्य रणेऽगम्यः ।
मनसि चक्ररत्नं स्मर शस्त्ररम्यम्, एष मारिष्यते यदि परं मुञ्च धर्मम् ।
यद्भरतेन निरुद्धं योगचक्रं, ................................ ।
तत्क्षणे मिलज्ज्वालावमालम्, चतुर्दिशि स्फुरच्छिखिकणकरालम् ।
करकमले स्थितं तच्चक्ररत्नं, प्रेक्षते कुमारोऽक्षोभितवदनः ।
भरतेश्वर उच्यते गुरुस्नेहेनाद्यापि जीवन्याहि गृहे ।

---

१. खण रं० । २. छिप्पइ रं० । ३. सहसउ रं० ।

इह एही भवणि म होउ मज्झ, जसकित्तिहि नासण बालवज्झ ।
पभणिउ कुमारि करिलीलगामि, भज्जंतिहि रणि लज्जियइ सामि ! ।।
अज्जलमुहछायह, तासु सुवायह, मुक्क चक्कु जं वहु करइ ।
धिसि रज्जह हुंतह एम्व गुणवंतह, पुत्तह पिय जहिं ववहरइ ।।१०।।
आयंतह चक्कह चत्ततासु हू धणुहहत्थु सम्मुहउ तासु ।
दढबाणिहिं पहउ महाभुएण, अच्छोडिउ खग्गि बलजुएण ।
तह वि हु आगच्छइ तिक्खधारु, कम्मह विवागु जिम्व दुन्निवारु ।
संखुद्धउ माणसि मोक्खकामु, गउ वेगिं गयणि ( सु ) जहत्थनामु ।
जहिं जहिं नासंतउ जाइ बालु, तहिं तहिं [१]जि जाइ जालाकरालु ।
बहिरंग जिणेविणु मुक्कखग्गु, एवंतरंगरिउ जिणह लग्गु ।
ते धन्न पुन्न रिसहेसजाय, समभावरुद्धमण-वयण-काय ।
मज्झ वि संपन्नउ समउ भावु, पुमासणि संठिउ समियपावु ।
चउसरणि पवन्नउ, महिहिं निसन्नउ, निंदिय गरहिय दुकियगइ ।
सुमरिय परमेसरु, मणि रिसहेसरु, थुणहुं लग्गु एम्व सुद्धमइ ।।११।।

---

इहैहि भवने मा जाश्च भवतु मम यशकीर्तयो र्नाशनो बालवधः ।
प्रभणितः कुमार करिलीलागामी भज्जद्वीरणे लज्जति स्वामिन् ! ।
उज्वलमुखच्छायस्य तस्य सुवाचो मुक्त्वा चक्रं यद्वधं करोति ।
धिग्राज्यं भवदेवं गुणवतः पुत्रस्य पिता यत्र व्यवहरति ।। १० ।।
आयातश्चक्रस्य त्यक्तस्य खलु धनुकहस्तः सम्मुखं तस्य ।
दृढबाणैः प्रहतं महाभुजेनाच्छोट्य खड्गं बलयुतेन ।
तथापि खल्वागच्छति तीक्ष्णधारं कर्मविपाकं यथा दुर्निवारम् ।
संक्षुब्धो मनसि मोक्षकामो गतो वेगेन गगने यथार्थनाम ।
यत्र यत्र नश्यन् याति बालस्तत्र तत्रैव याति ज्वालाकरालम् ।
बहिरङ्गं जीत्वा मुक्तखङ्ग एवमन्तरङ्गरिपुं जेतुं लग्नः ।
ते धन्याः पुण्या ऋषभेशजाताः समभावरुद्धमनोवचनकायाः ।
ममापि सम्पन्नः समभावः पद्मासने संस्थाय समितपापः ।
चतुःशरणानि प्रपन्नो महीं निषण्णो निन्दित्वा गर्हित्वा दुष्कृतगतिम् ।
स्मृत्वा परमेश्वरं मनसि ऋषभेश्वरं स्तोतु लग्न एवं शुद्धमतिः ।। ११ ।।

---

१. जि (अ.) एवार्थे ।

जय जय रिसहेसर ! भुवणसामि !, मयमद्दण ! मयगललीलगामि ! ।
जय केवलवसविन्नायभाव !, पणमंतसत्त निम्महियताव ! ।
जय तिहुयणभवणपयासदीव !, भवजलहिपडंतासासदीव ! ।
जय लोयपयासियनीइसार !, परिवालियनिरुवमरज्जभार ! ।
जय तिहुयणभवणुद्धरणखंभ !, संरक्खिय दुद्धरसुद्धबंभ ! ।
जय सव्वसत्तसंजणियसोक्ख !, अट्ठावयपव्वयभाविमोक्ख ! ।
जय भवजलनिहिसंपत्तपार !, दुव्वहनिव्वाहियनियमभार ! ।
जय जिणवर ! निज्जियजम्म-मरणु !, महु तुहुं गइ ( तुहुं मइ ) तुहुं [1]जि सरणु ! ॥
इय थुय रिसहेसरु, नयजोगेसरु, अनिलवेउ दुन्नयविमुहु ।
चक्काउहि दद्धउ, हियइ विसुद्धउ, पत्तउ स मरियसिद्धिसुहु ॥१२॥
अह रणि सीहरहाहिय नेहह, सुयइ मरणि कुमरह निलवेयह ।
बिहिं पुत्तहं मरणि विद्दाणउ । सोइवि वहु तक्खसिलऽहिराणउ ।
भरहिं सहु असमत्थियसंगरु, पत्तउ रणभुइं [2]वड्डियमच्छरु ।

---

जय जय ऋषभेश्वर ! भुवनस्वामिन् ! मदमर्दन ! मदगललीलागामिन् ! ।
जय केवलवशविज्ञातभाव ! प्रणमत्सत्त्वनिर्मथितताप ! ।
जय त्रिभुवनभवनप्रकाशदीप ! भवजलधिपतदाश्वासद्वीप ! ।
जय लोकप्रकाशितनीतिसार ! परिपालितनिरुपमराज्यभार ! ।
जय त्रिभुवनभवनोद्धरणस्तम्भ ! संरक्षितदुर्धरशुद्धब्रह्म ! ।
जय सर्वसत्त्वसञ्जनितसौख्य ! अष्टापदपर्वतभाविमोक्ष ! ।
जय भवजलनिधिसम्प्राप्तपार ! दुर्वहनिर्वाहितनियमभार ! ।
जय जिनवर ! निर्जितजन्म-मरण ! मम तव गतिः [तव मतिः] तवैव शरणम् ।
इति स्तुत्वा ऋषभेश्वरं नययोगेश्वरमनिलवेगो दुर्नयविमुखः ।
चक्रायुधेन दग्धो हृदि विशुद्धः प्राप्तः स मृत्वा सिद्धिसुखम् ॥ १२ ॥
अथ रणे सिंहरथाधिकस्नेहस्य श्रुणोति मरणं कुमारस्यानिलेवेगस्य ।
द्वयोः पुत्रयो र्मरणं विज्ञाय शोचति बहु तक्षशिलाधिराजः ।
भरतेन सहासमर्थितसङ्गरः प्राप्तो रणभूमिं वर्धितमत्सरः ।

---

१. जि (अ.) एवार्थे । २. वड्डिउ रं ।

भणिउ भरहु बाहुबलि राइं, बहुजणि किं मारियइं वराइं ।
भणि जिणि जुज्झि जुज्झउ भायर !, पडिवन्नइ भरहेसि ! म कायर ।
दिट्ठिजुज्झि ( जी ) यउ भरहाहिवु, वइजुज्झि वि जित्तउ चक्काहिवु ।
बाहुजुज्झि[१] भग्गइ भरहेसरि, पुणु पडिवन्नइ दंडिहिं संगरि ।
पेच्छिवि उद्धियदंडु कणिट्ठउ, आयह पासह अज्जु विणट्ठउ ॥
नियमणि खलभलियउ, अइसइं बलियउ, चिंतइ किं एहु चक्कवइ ? ।
पडिभट्ठपइन्नइं, रणरसिखिन्नइं, कियउं चक्कु करि भरहवइ ॥१३॥ रसि खि
अह चिंतिउ लहुयइं लल्लक्कइं, भंजउ भडमरट्टु सहु चक्कइं ।
किं फलु तुच्छह विसयहं कारणि, आयह भट्ठपइन्नह मारणि ? ।
धिसि ! धिसि ! अहो ! किं अमर णिएही ( ? ), नियकुलसंहारणि निन्नेही ।
आइं मह वल्लह सुय मारिय, लहुयसहोयर इणि नीसारिय ।
धिसि ! धिसि ! विसय अंगुसंतावह, धिसि ! धिसि ! विसय जि कारणु ( पावह ) ।
धिसि ! धिसि ! विसय हेउ संसारह, धिसि ! धिसि ! विसय नियाणु जि मारह ।

---

भणति भरतो बाहुबलि राजानं बहुजनानि किं मार्यन्ते वराकानि ।
भण येन युद्धेन युद्धं भ्रात ! प्रतिपद्यते भरतेश ! मा कातरः ।
दृष्टियुद्धेन जीतोभरताधिपो वाग्युद्धे ऽपि जीतश्चक्राधिपः ।
बाहुयुद्धे भज्जति भरतेश्वरे पुनः प्रतिपद्यते दण्डैः संगरम् ।
दृष्टवोद्विद्धदण्डं कनिष्ठमायातः पार्श्वस्याद्य विनष्टम् ।
निजमनसि क्षुब्धोऽतिशयेन बलिकश्चिन्तयति किमेष चक्रपतिः ? ।
प्रतिभ्रष्टप्रतिज्ञो रणरसखिन्नो न, कृत्वा चक्रं करे भरतपतिः ॥ १३ ॥
अथ चिन्तयित्वा लघुको ललकरोति[२] भङ्क्तुं भटमानं सह चक्रेण ।
किं फलं तुच्छस्य विषयस्य कारणम्, आयातो भ्रष्ट प्रतिज्ञस्य मारणम् ।
धिग्धिगहो ! किममरं[३] णिकै (?) र्निजकुलसंहारणं निस्नेहम् ।
अनेन मम वल्लभसुतो मारितो लघुसहोदरा अनेन निष्काषिताः ।
धिग्धिग्विषयोऽङ्गसन्तापकः धिग्धिग्विषयो यत्कारणं पापस्य ।
धिग्धिग्विषयो हेतुः संसारस्य धिग्धिग्विषयो निदानं यन्मारस्य ।

---

१. जुज्झिक्त उड्डाइय भरहेसरि रं । २. (दे.) 'ललकार' इति भाषायाम् । ३. 'अमरणिएहीं (?) पाठो सुष्ठु नावगम्यतेऽत्र ।

विसयासत्त न जिणु परियाणहिं, विसयासत्त न गुरुयणु माणहिं ।
विसयासत्त विडंबण पावहिं, एउ तिन्तेविणु वुत्तउं तावहिं ॥
अह [१]तुज्झु अतित्तह, विसयासत्तह, किंपि ज असरिउ तं सरउ ।
अहु तुहुं अहु मंडलु, अहु भूखंडलु, मुक्कउ टारु ससिंदूरउ ॥१४॥
कउ पंचहिं मुट्ठिहिं लोउ तेण, पुणरवि य[२] विचिंतिउ नियमणेण ।
उप्पन्ननाण महु लहुयभाय, किम्व नमणि करेवी मइं सवाय ? ।
उप्पन्ननाणि मइं तायपासि, जा[३]यवि पेक्खेवा गुणह रासि ।
ठिउ काउसग्गि संजमिय वाणि, मणि माणाहिट्ठिउ धम्मझाणि ।
तण-लयहि पवेढिउ अप्पमाणु, तसु [४]वरिसु जाव न यऽसणु न पाणु ।
रिसहेसरि पेसिय समयवाय, तहिं बंभी सुंदरि भणहिं भाय ! ।
हत्थिहि ओयरियह होइ नाणु, एउ भणइ ताउ सुरविहियमाणु ।
कहिं मज्झ हत्थि इह वणि पसत्थि ?, हुं नायउं एहु जि माणु हत्थि ॥
तो जिणवरु वंदउं, मुणि अभिनंदउ, सुहइ हुयइ परिणामि मणि ।
उप्पन्नइ केवलि, नासियकलिमलि, जिणह पासि गउ तम्मि खणि ॥१५॥

---

विषयासक्तो न जिनं परिजानाति, विषयासक्तो न गुरुजनं मानयति ।
विषयासक्तो विडम्बनां प्राप्नोति, एतच्चिन्तयित्वा वृत्तं तावत् ।
अथ तवातृप्तस्य विषयासक्तस्य किमपि यदस्मृतं तत्स्मर ।
अहो त्वमहो मण्डलमहो भुखण्डलं मुञ्चाश्वं सरज्जुम् ॥ १४ ॥
कृत्वा पञ्चमुष्ठिभिर्लोचं तेन पुनरपि च विचिन्त्य निजमनसा ।
उत्पन्नज्ञानानां मम लघुकभ्रातृणां कथं नमनं कर्तव्यं मया सपादम् ।
उत्पन्नज्ञानेन मया तातपार्श्वे गन्तव्यं प्रेक्षितव्या गुणानां राशयः ।
स्थित्वा कायोत्सर्गे संयम्य वाचां मनसि मानाधिष्ठितो धर्मध्याने ।
तृण-लताभिःप्रवेष्ट्याप्रमाणंतस्य वर्षं यावन्नाशनं न पानम् ।
ऋषभेश्वरेण प्रेषिते समयवाचा तत्र ब्राह्मीसुन्दरी भणतो भ्रात ! ।
हस्तिनोऽवतरतो भवति ज्ञानं एतद्भणति तातःसुरविहितमानः ।
क्व मम हस्तीह वने प्रशस्ते ? हुं ज्ञातमेष एव मानहस्ती ।
ततो जिनवरं वन्दित्वा मुनिवरमभिनन्दितुं शुभोभवति परिणामो मनसि ।
उत्पद्यते केवलं नाशितकलिमलं जिनस्य पार्श्वे गतस्तस्मिन् क्षणे ॥ १५ ॥

---

१. तुज्भक रं० । २. उ रं० । ३. जाइवि रं० । ४. वरिस रं० ।

भरहेसु वि भुंजइ एग छत्त, छक्खंडवसुह बहुरिद्धिपत्त ।
कइया वि हु निवु विलसिरअणंगु, सव्वालंकारविभूसियंगु ।
आयरिसगेहि गोयंकु वीरु, राढइं किर कइसउं महु सरीरु ? ।
एगंगुलि पेच्छइ ता मणुन्न, दुद्दंसण मुद्दारयणसुन्न ।
अवणेइ सव्व जी विगयमोहु, उच्चिणियपउम सरु जिम्व असोहु ।
चिंतइ सरूवि सव्वू असारु, मेल्लेवि धम्मगुणु निव्वियारु ।
सुहभावि मज्झिवि ठियउ घरहु, उप्पाडइ केवलुनाणु भरहु ।
देवयइं समप्पिय समणलिंगु, कयलोउ महिहिं विहरइ असंगु ॥
विहरिवि बहुवासइं, वज्जिउ हासइ, कम्मक्खयनिम्माणह ।
पडिवोहिय महियलु, नासियकलिमलु, भरहु गयउ निव्वाणह ॥१६॥

॥ भरताख्यानकं समाप्तम् ॥२३॥

इदानीमिलापुत्राख्यानकमारभ्यते । तद्यथा-

निरुवमनयरगुणेहिं पुहईए पत्तवद्धणत्तणओ । पत्तजहत्थभिहाणं अत्थि इलावद्धणं नयरं ॥१॥
तत्थेव य वत्थव्वो इब्भो भवणं महाविभूईए । सुद्धसहावो दक्खिन्नसायरो सुइसमायारो ॥२॥

---

भरतेशोऽपि भुनक्ति एकछत्रां षट्खण्डवसुधां बह्वर्द्धिप्राप्ताम् ।
कदापि खलु नृपो विलसदङ्गः सर्वालङ्कारविभूषिताङ्गः ।
आदर्शगृहे गोत्राङ्को वीरो विभूषयति किल कीदृशं मम शरीरम् ? ।
एकाङ्गुलीं पश्यति तावन्मनोज्ञां दुर्दर्शनां मुद्रारत्नशून्याम् ।
अपनयति सर्वं यथा विगतमोह उच्चिणितपद्मसर इवाशोभः ।
चिन्तयति स्वरुपं सर्वमसारं मोचयति धर्मगुणं निर्विकारम् ।
शुभभावेन मध्येऽपि स्थितो गृहे उत्पाद्यते केवलज्ञानं भरतः ।
देवतया समर्प्य श्रमणलिङ्गः कृतलोचो मह्यां विहरति असङ्गः ।
विहृत्य बहुवर्षाणि वर्जितो हास्येन कर्मक्षयनिर्मातः ।
प्रतिबोधित महितलो नाशितकलिमलो भरतो गतो निर्वाणम् ॥ १६ ॥

॥ भरताख्यानकं समाप्तम् ॥ २३ ॥

इलापुत्राख्यानकम् ।

निरुपमनगरगुणैः पृथिव्यां प्राप्तवर्धनत्वात् । प्राप्तयथार्थाभिधानमस्तीलावर्धनं नगरम् ॥ १ ॥
तत्रैव च वास्तव्य इभ्यो भवनं महाविभूतेः । शुद्धस्वभावो दाक्षिण्यसागरः शुचिसमाचारः ॥ २ ॥

रायाइपूयणिज्जो निच्चं नीसेसनिगमनिवहस्स । अग्गासणी गुणन्नू गुणिजणवग्गस्स गोरव्वो ॥३॥

एवं एयस्स महायणम्मि सव्वत्थ [1]सुत्थहियस्स । परमेगमवच्चदुहं जयम्मि जइ वा सुही नत्थि ॥४॥

मिउवयण-रूव-सोहग्गधारिणी धारिणी पिया तस्स । सइसुत्थिया वि नवरं, निरवच्चा पुत्तकामा य ॥५॥

तत्थ इलादेवीए, आययणं विज्जई जणपसिद्धं । तं च जणो कज्जत्थी पुत्ताइनिमित्तमच्चेइ ॥६॥

तं च पसिद्धिं सोउं देवीए तीए इब्भभज्जाए । पायवडियाए भणियं भयवइ ! जह तुह पसाएणं ॥७॥

मज्झ भविस्सइ पुत्तो ता तुह भवणे महाविभूईए । पइवरिसं कारिस्सं जत्ताइमहूसवं परमं ॥८॥

गोउलपमुहं वित्तिं वज्झारिस्सामि तुज्झ आययणे । किं वहुणा ? नामं पि हु सुयस्स तुह संतियं दाहं ॥९॥

तो तीए पभावेणं खओवसमणेणमंतरायस्स । पाउब्भूओ गब्भो तप्पभिई इब्भभज्जाए ॥१०॥

जाओ कालकमेणं वद्धावणयं पयट्टियं नयरे । वित्तम्मि सूइकम्मे संपत्ते बारसाहम्मि ॥११॥

जं जह भणियं तं तह सव्वं ओवाइयं विहेऊण । माणसु पाडिऊणं नामं दिन्नं इलापुत्तो ॥१२॥

गिरिकुंजसमल्लीणो सो चंपयपायवो व्व निरवाओ । वड्ढंतो अणुवरिसं संजाओ अट्ठवारिसिओ ॥१३॥

अम्मा-पियरेहिं तओ वियाणिऊणं कलागहणसमयं । न्हाओ कयबलिकम्मो धवलाहरणो धवलवेसो ॥१४॥

सुहदिवसे सुहमासे सुद्धे पक्खम्मि पंचमितिहीए । सुहजोगे सुमुहुत्ते गुरुवारे पुस्सनक्खत्ते ॥१५॥

सक्कारिऊण सम्माणिऊणमज्झावयं विसेसणं । महईए विभूईए लेहायरियस्स उवणीओ ॥१६॥

---

राजादिपूजनीयो नित्यं निःशेषनिगमनिवहस्य । अग्रासनि र्गुणज्ञो गुणिजनवर्गस्य गौरवः ॥ ३ ॥

एवमेतस्य महाजने सर्वत्र स्वच्छहृदयस्य । परमेकमपत्यदुःखं जगति यदि वा सुहृन् र्नास्ति ॥ ४ ॥

मृदुवदनरुपसौभाग्यधारिणी धारिणी प्रिया तस्य । सदासुस्थितापि नवरं निरपत्या पुत्रकामा च ॥ ५ ॥

तत्रेलादेव्या आयतनं विद्यते जनप्रसिद्धम् । तच्च जनः कार्यार्थी पुत्रादिनिमित्तमर्चयति ॥ ६ ॥

तां च प्रसिद्धिं श्रुत्वा देव्यास्तस्या इभ्यभार्यया । पादपतितया भणितं भगवति ! यदि तव प्रसादेन ॥ ७ ॥

मम भविष्यति पुत्रस्तदा तव भवने महाविभूत्या । प्रतिवर्षं कारयिष्यामि यात्रादिमहोत्सवं परमम् ॥ ८ ॥

गोकुलप्रमुखां वृत्तिं वर्धयिष्यामि तवायतने । किं बहुना ? नामापि खलु सुतस्य तव सत्कं दास्यामि ॥ ९ ॥

ततस्तस्याः प्रभावेन क्षयोपशमनेनान्तरायस्य । प्रादुर्भूतो गर्भस्तत्प्रभृतीभ्यभार्यायाः ॥ १० ॥

जातः कालक्रमेण वर्धापनकं प्रवर्तितं नगरे । वृत्ते सूतिकर्मे सम्प्राप्ते द्वादशाह्नि ॥ ११ ॥

यद्यथा भणितं तत्तथा सर्वमौपयाचितं विधाय । पादयोः पातयित्वा नाम दत्तमिलापुत्रः ॥ १२ ॥

गिरिकुञ्जसमालीनः स चम्पकपादप इव निरपायः । वर्धमानोऽनुवर्षं सञ्जातोऽष्टवार्षिकः ॥ १३ ॥

अम्मा-पितृभ्यां ततो विज्ञाय कलाग्रहणसमयम् । स्नातः कृतबलिकर्मो धवलाभरणो धवलवेशः ॥ १४ ॥

शुभदिवसे शुभमासे शुद्धे पक्षे पञ्चमीतिथौ । शुभयोगे सुमुहूर्ते गुरुवारे पुष्यनक्षत्रे ॥ १५ ॥

सत्कार्य सन्मान्याध्यापकं विशेषेण । महत्या विभूत्या लेखाचार्यस्योपनीतः ॥ १६ ॥

---

१. सुच्छ

**जओ भणियं-**

**सव्वगुणसंजुओ वि हु विज्जाए विणा सुओ वरं कन्ना । गब्भे वि वरं नासो वंझा भज्जा वरं होउ ॥१७॥**

**वागरण-छंद-ऽलंकार-कव्व-सिद्धंत-वेयनिउणाणं । सुकुलुप्पन्नो वि हु पामरो व्व जोयइ मुहं मुक्खो ॥१८॥**

**अपरं च-**

**अजात-मृत-मूर्खेभ्यो, मृता-ऽजातौ वरं सुतौ । तौ किञ्चिच्छोकदौ पित्रोर्मूर्खस्त्वत्यन्तशोकदः ॥१९॥**

**तत्तो सजोगयाए जणयपयत्ता तहाभिओगाओ । अज्झावयस्स पत्तो कलाकलावस्स पारम्मि ॥२०॥**

**भवियव्वयानियोगा पायं विसएसु न रमइ मणो से । अम्मा-पिऊहिं तत्तो खित्तो दुल्ललियगोट्ठीए ॥२१॥**

**एत्थंतरम्मि मन्ने जेउमसत्तस्स तिहुयणं सयलं । मयणस्स सहायत्तं काउं पत्तो सरयसमओ ॥२२॥**

**तथा हि-**

**वित्थिन्नसरोवरवियसियाइं कुमुयाइं निम्मलनिसासु । तारानियरसमिद्धिं गयणगयं जम्मि पहसंति ॥२३॥**

**वीसुं पि दिसासु सरोवराइं सुइसच्छसलिलकलियाइं । जम्मि उ सरयसिरीए दप्पणलीलं विडंबंति ॥२४॥**

**हंसेहिं संचरंतेहिं सोहियं गुरुनहंगणं जम्मि । सुविसुद्धोभयपक्खेहिं अह व गरुया वि सोहंति ॥२५॥**

**जत्थ य पहिया सुहसालिगोवियासरसगीयपडिबद्धा । सम्मग्गाओ भस्संति अहव एवंविहा विसया ॥२६॥**

**सरसघणकालिमाए कलियाइं वि दिसिवहूण वयणाइं ।सुहयस्स जस्स संगे वियाससहियाइं जायाइं ॥२७॥**

---

यतो भणितम् -

सर्वगुणसंयुक्तोऽपि खलु विद्यया विना सुतो वरं कन्या । गर्भेऽपि वरं नाशो वन्ध्या भार्या वंर भवतु ॥ १७ ॥

व्याकरण-छन्दालङ्कार-काव्य-सिद्धान्त-वेदनिपूणानाम् । सुकुलोत्पन्नोऽपि खलु पामर इव पश्यति मुखं मुर्खः ॥ १८ ॥

अपरं च -

अजात-मृत-मुर्खेभ्यो, मृता-ऽजातौ वरं सुतौ । तौ किञ्चिच्छोकदौ पित्रो मुर्खस्त्वत्यन्तशोकदः ॥ १९ ॥

ततः स्वयोग्यताया जनकप्रयत्नात्तथाभियोगात् । अध्यापकस्य प्राप्तः कलाकलापस्य पारे ॥ २० ॥

भवितव्यतानियोगात्प्रायं विषयेषु न रमते मनस्तस्य । माता-पितृभ्या ततः क्षिप्तो दुर्ललितगोष्ट्याम् ॥ २१ ॥

अत्रान्तरे मन्ये जेतुमसक्तस्य त्रिभुवनं सकलम् । मदनस्य सहायत्वं कर्तुं प्राप्तः शरदसमयः ॥ २२ ॥

तथाहि -

विस्तीर्णसरोवरविकसितानि कुमुदानि निर्मलनिशासु । तारानिकरसमृद्धिं गगनगतां यस्मिन् प्रहसन्ति ॥ २३ ॥

विश्वगपि दिक्षु सरोवराणि शुचिस्वच्छसलिलकलितानि । यस्मिंस्तु शरच्छ्रया दर्पणलीलां विडम्बयन्ति ॥ २४ ॥

हंसैः सञ्चरद्धिः शोभितं गुरुनभोङ्गणं यस्मिन् । सुविशुद्धोभयपक्षाभ्यामथ वा गुरुका अपि शोभन्ते ॥ २५ ॥

यत्र च पथिकाः शुभशालिगोपिकासरसगीतप्रतिबद्धाः । समग्रा भ्रश्यन्त्यथवैवंविधा विषयाः ॥ २६ ॥

सरसघनकालिमया कलितान्यपि दिग्वधूनां वदनानि । सुभगस्य यस्य सङ्गे विकाससहितानि जातानि ॥ २७ ॥

**हिमसंकासो चंदो सवियासो सहइ जत्थ सविसेसं । सव्वत्थ वि वित्थरिओ सारयसिरिकित्तिपडउ व्व ॥२८॥**
**धवलिज्जइ दिसिवलयं जत्थ य कासेहिं ससहरसिएहिं । अइसरला सुहपव्वा सुविसुद्धा कं न धवलंति ? ॥२९॥**
**अनिलंदोलिरविलसिरकासा आसाविलासिणीखंधे । सरयनरेसरचामरकलावलीलं विडंबंति ॥३०॥**
**पेच्छऽच्छरीयबहुवायसंजुयं जिणमयं जए जयइ । सिहिणो विमणा हंसा य सहरिसा जम्मि संजाया ॥३१॥**
**सुयपंतीए फलयं पि भक्खिउं सालिरक्खिया सालिं । देइ न जमदायारे कुणंतु किं रत्तवयणा वि ? ॥३२॥**
**उय सालिरक्खियाए सुदूरमुड्डाविऊण सुयसेणिं । खित्ता किविणघरेसुं कुणंतु किं वा सपक्खा वि ? ॥३३॥**
**सउणेहिं संसियाओ सस्सइ ओसह ( .......सह ) लाओ । सस्सेहिं समं सोहंति जम्मि सुहछेत्तसीमाओ ॥३४॥**
**जम्मि सुविसिट्ठपरिपुट्ठिलट्ठगोविंदतड्डियमुहाओ । गोट्ठंगणभूमीओ भमंतगोवीओ रेहंति ॥३५॥**
**खत्तेहिं समलिणेहिं घणेहिं संगे गया वि मलिणत्तं । सुइसंगे सुज्झंती सारयगयणं व गरुया वि ॥३६॥**
**पेच्छह पयडपयावो अहिययरं सरयसंगमे वि रवी । निव्वडियपयावगुणा कुणंतु जे किंपि तह वि मुहा ॥३७॥**
**विमलियनहम्मि सरयम्मि ससहरो अहह ! पेच्छ सकलंको । अहवा निम्मलसंगे वि नऽन्नहा जायइ सहावो ॥३८॥**
**इय एरिसम्मि सरए पकामकामम्मि सो इलापुत्तो । कइया वि कीलिउं काणणम्मि निज्जाइ सवयंसो ॥३९॥**
**तत्थ ललंतो लीलाए लंखियं लहुललामलायन्नं । सोहग्ग-रूव-सुंदेरमंदिरं मयणधरणिं व ॥४०॥**
**नवजोव्वणरमणीयं नडधूयं नियइ मयणसबरस्स । जेउं जयं व विहिणा विणिम्मियं निसियभल्लिं व ॥४१॥**

---

हिमसङ्काशश्चन्द्रः सविकाशः सहते यत्र सविशेषम् । सर्वत्रापि विस्तृतः शरदश्रीकीर्तिपट इव ॥ २८ ॥
धवलायते दिग्वलयं यत्र च काशैः शशधरसितैः । अतिसरलाः शुभपर्वाः सुविशुद्धः कं न धवलन्ति ? ॥ २९ ॥
अनिलान्दोलद्विलसत्काशा आशाविलासिनिस्कन्धे । शरदनरेश्वरचामरकलापलीलां विडम्बयन्ति ॥ ३० ॥
प्रेक्षस्वाश्चर्यबहुवादसंयुक्तं जिनमतं जगति जयति । शिखिनो विमना हंसाश्च सहर्षा यस्मिन् सञ्जाताः ॥ ३१ ॥
शुकपङ्क्त्या फलकमपि भक्षितुं शालिरक्षकाः शालिम् । ददति न यददारि कुर्वन्तु किं रक्तवदना अपि ? ॥ ३२ ॥
उत शालिरक्षिकाः सुदूरमुड्डापयित्वा शुकश्रेणीम् । क्षिप्ताः कृपणगृहेषु कुर्वन्तु किं वा सपक्षा अपि ? ॥ ३३ ॥
शकुनै शंसिता शस्यत्यौषधसफलाः । शस्यैः समं शोभन्ते यस्मिन् शुभक्षेत्रसीमानः ॥ ३४ ॥
यस्मिन् सुविशिष्टपरिपृष्टलष्टगोवृन्दविस्तृतमुखाः । गोष्टाङ्गणभूम्यो भ्रमद्गोप्यः शोभन्ते ॥ ३५ ॥
क्षत्रैः समलिनैः घनैः सङ्गे गता अपि मलिनत्वम् । शुचिसङ्गे शुध्यन्ति शारदगगनमिव गुरुका अपि ॥ ३६ ॥
पश्यथ प्रकटप्रतापोऽधिकतरं शरदसङ्गमेऽपि रविः । निष्पन्नप्रतापगुणाः कुर्वन्तु ये किमपि तथापि मुधा ॥ ३७ ॥
विमलितनभसि शरदि शशधरो ऽहह ! पश्य सकलङ्कः । अथवा निर्मलसङ्गेऽपि नान्यथा जायते स्वभावः ॥ ३८ ॥
इति एतादृशे शरदि प्रकामकामे स इलापुत्रः । कदापि क्रीडितुं कानने निर्याति सवयस्कः ॥ ३९ ॥
तत्र ललल्लीलया लङ्खिकां लघुललामलावण्याम् । सौभाग्य-रुप-सौन्दर्यमन्दिरां मदनगृहिणीव ॥ ४० ॥
नवयौवनरमणीयां नटदुहितरं पश्यति मदनशबरस्य । जेतुं जगदिव विधिना विनिर्मितां निशीतशल्यामिव ॥ ४१ ॥

**पावो पेच्छइ मह पणइणिं तिं कामेण जायकोवेण । समगं सव्वंगं पि हु विद्धो पंचहि वि बाणेहिं ॥४२॥**

**ताहे अयकीलयकीलिउ व्व थिमिउ व्व चित्तलिहिउ व्व । लेप्पयमउ व्व मुच्छागउ व्व पाहाणघडिउ व्व ॥४३॥**

**जा तयवत्थो चिट्ठइ तो तग्गयमणवियप्पकुसलेहिं । हरिस-विसायाउलमाणसेहिं मित्तेहिं संलत्तो ॥४४॥**

**उस्सूरं संजायं महई वेला समागयाणऽम्हं । ता गच्छामो गेहं कल्ले पुणरागमिस्सामो ॥४५॥**

**तं पि हु ता परिसंतो मा किमवि सरीरकारणं होही । अम्मा-पियरो दूरं तुह अवसेरिं करिस्संति ॥४६॥**

**वारं वारं भणिओ वि जाव तग्गयमणो न चिंतेइ । बाहाए धेत्तूणं बला वि नीओ जणयगेहं ॥४७॥**

**तत्थ वि हसइ वियंभइ पलवइ रोवइ निरिक्खए सुन्नं । तत्तथले पक्खित्तो मच्छो व्व रई न पाउणइ ॥४८॥**

**जा कट्ठदसं पत्तो ताव य जणयस्स से निवेइन्ति । सो वि निसामिय वज्जाहउ व्व जाओ विसन्नमणो ॥४९॥**

**साणुणयं सप्पणयं सुजुत्तजुत्तिक्खमं खमासारं । परिफुसिय मुहं मुहरं भणियं सुण वच्छ ! मह वयणं ॥५०॥**

**पढियस्स तस्स सुणियस्स तस्स निरुवमकलाकलावस्स । सुहगुरुउवएसस्स य अवसाणं एरिसं वच्छ ॥५१॥**

**किंच-**

**लज्जिज्जइ जेण जणो मइलिज्जइ नियकुलक्कमो जेण । कंठट्ठिए वि जीए कुणंति न कया वि तं सुयणा ॥५२॥**

**अन्नं च निवो नाही सो मह सव्वस्सनिग्गहं काही । पउरजणो वि हु भणिही अकज्जमिमिणा समायरियं ॥५३॥**

**ता संति रूव-जोव्वण-लायन्नपवाहसारणीओ व्व । कुलबालियाओ ताओ वच्छस्स कए वरिस्सामि ॥५४॥**

---

पापः पश्यति मम प्रणयिनीमिति कामेन जातकोपेन । समकं सर्वांगमपि खलु विद्धः पञ्चभिरपि बाणैः ॥ ४२ ॥

तदाऽयःकीलिकाकिलित इव, स्तिमित इव चित्रलिखित इव । लेप्यमय इव मूर्च्छागत इव पाषाणघटित इव ॥ ४३ ॥

यावत्तदवस्थस्तिष्ठति तावत्तद्गतमनोविकल्पकुशलैः । हर्षविषादाकुलमानसै र्मित्रैः संलप्तः ॥ ४४ ॥

उत्सूरं सञ्जातं महती वेला समागतानामस्माकम् । ततो गच्छामो गृहं कल्ये पुनरागमिष्यामः ॥ ४५ ॥

त्वमपि खलु तावत्परिश्रान्तो मा किमपि शरीरकारणं भविष्यति । माता-पितरौ दूरं तव चिन्तां करिष्यतः ॥ ४६ ॥

वारं वारं भणितोऽपि यावत्तद्गतमना न चिन्तयति । बाहुना गृहीत्वा बलादपि नीतो जनकगृहम् ॥ ४७ ॥

तत्रापि हसति विजृम्भति प्रलपति रोदिति निरीक्षते शून्यम् । तप्तस्थले प्रक्षिप्तो मत्स्य इव रतिं न प्राप्नोति ॥ ४८ ॥

यावत्कष्टदशां प्राप्तस्तावच्च जनकस्य तस्य निवेदयन्ति । सोऽपि निशम्य वज्राहत इव जातो विषण्णवदनः ॥ ४९ ॥

सानुनयं सप्रणयं सुयुक्तयुक्तिक्षमं क्षमासारम् । परिस्पृश्य मुखं मुखरं भणितं शृणु वत्स ! मम वचनम् ॥ ५० ॥

पठितस्य तस्य श्रुतस्य तस्य निरुपमकलाकलापस्य । सुगुरुपदेशस्य चावसानमीदृशं वत्स ! ॥ ५१ ॥

किंच -

लज्ज्यते येन जनो मलिन्यते निजकुलक्रमो येन । कण्ठस्थितायामपि यस्यां कुर्वन्ति न कदापि तं सुजनाः ॥ ५२ ॥

अन्यच्च नृपो ज्ञास्यति स मम सर्वस्वनिग्रहं करिष्यति । पौरजनोऽपि खलु भणिष्यत्यकार्यमनेन समाचरितम् ॥ ५३ ॥

ततः सन्ति रुप-यौवन-लावण्यप्रवाहसारण्य इव । कुलबालिकास्ता वत्सस्य कृते वरिष्यामि ॥ ५४ ॥

**ता नीयाए किमेयाए वच्छ ! रूवाइगुणजुयाए वि । सीयं पि पओ मायंगकूवए पियइ किं विप्पो ? ॥५५॥**

**भणियं च तेण अहमवि ताय ! वियाणामि जं तए भणियं । किंतु मह कम्मपरिणइवसेण विसमं तहिं पेम्मं ॥५६॥**

**जओ भणियं-**

**धारिज्जइ इंतो जलनिही वि कल्लोलभिन्नकुलसेलो । न हु पुव्वजम्मनिम्मियसुहा-ऽसुहो कम्मपरिणामो ॥५७॥**

**अवरं च-**

**ता लज्जा ता माणो ता इह-परलोयचिन्तणे बुद्धी । जा न विवेयजियहरा मयणस्स सरा पहुप्पंति ॥५८॥**

**ताव परो वि हसिज्जइ कीरइ माणं थिरत्तणं लज्जा । जा विसमे न पडिज्जइ अत्थाहे पेम्मकूवम्मि ॥५९॥**

**सुयनिच्छयं वियाणिय मग्गामि तयंपि किं वियप्पेण ? । मा मह सुयस्स जीवियसमस्स अच्चाहियं होही ॥६०॥**

**गंतूण मग्गिओ सो सुवन्नतुलियं पयच्छ नियधूयं । भणियं तेण महायस ! सुवन्नअक्खयनिही एसा ॥६१॥**

**ता जइ कज्जं मज्झं मिलेउ सो तुह सुओ किमन्नेण ? गोरवअरिहस्स गिहागयस्स साहेमि कज्जमिणं ॥६२॥**

**आगंतूणं जणएण लंखियाजणयभासियं कहियं । सो वि य निसामिऊणं मणे विसन्नो वियप्पेइ ॥६३॥**

**जणएण जणविरूद्धं अकज्जमवि ववसियं मह निमित्तं । तं पि न जायं तम्हा धिरत्थु विवरीयमयणस्स ॥६४॥**

**जओ-**

**साहीणं मोत्तूणं जं जं जणगरहणिज्जमहियं च । तं तं महइ वराओ दुरन्तहयमयणवसवत्ती ॥६५॥**

---

ततो नीचया किमनया वत्स ! रुपादिगुणयुतयापि । शीतमपि पयो मातङ्गकूपके पिबति किं विप्रः ? ॥ ५५ ॥

भणितं च तेनाहमपि तात ! विजानामि यत्त्वया भणितम् । किन्तु मम कर्मपरिणतिवशेन विषमं तत्र प्रेम ॥ ५६ ॥

यतो भणितम् -

धार्यत आयान् जलनिधिरपि कल्लोलभिन्नकुलशैलः । न खलु पूर्वजन्मनिर्मितशुभा-शुभः कर्मपरिणामः ॥ ५७ ॥

अपरं च -

तावल्लज्जा तावन्मानस्तावदिहपरलोकचिन्तने बुद्धिः । यावन्न विवेकजीवहरा मदनस्य शराः प्रभवन्ति ॥ ५८ ॥

तावत्परोऽपि हस्यते क्रियते मानं स्थिरत्वं लज्जा । यावद्विषमे न पत्यते अगाधे प्रेमकूपे ॥ ५९ ॥

सुतनिश्चयं विज्ञाय मार्गयामि तकामपि किं विकल्पेन ? । मा मम सुतस्य जीवितसमस्यात्याधिकं भविष्यति ॥ ६० ॥

गत्वा मार्गितः स सुवर्णतोलितां प्रयच्छ निजदुहितरम् । भणितं तेन महायश ! सुवर्णाक्षयनिधिरेषा ॥ ६१ ॥

ततो यदि कार्यं मम मिलतु स तव सुतः किमन्येन ? । गौरवार्हस्य गृहागतस्य कथयामि कार्यमिदम् ॥ ६२ ॥

आगत्य जनकेन लङ्खिकाजनकभाषितं कथितम् । सोऽपि च निशम्य मनसि विषण्णो विकल्पयति ॥ ६३ ॥

जनकेन जनविरुद्धमकार्यमपि व्यवसितं मम निमित्तम् । तदपि न जातं तस्माद् धिगस्तु विपरितमदनस्य ॥ ६४ ॥

यतः -

स्वाधीनं मुक्त्वा यद्यद् जनगर्हणीयमधिकं च । तत्तदिच्छति वराको दुरन्तहतमदनवशवर्ती ॥ ६५ ॥

भणियं च-

पेरिज्जंतो पुव्वक्किएहिं कम्मेहिं कहमवि वराओ । सुहमिच्छंतो दुल्लहजणाणुराए जणो पडइ ॥६६॥

अन्न च-

सच्छंदपयपहाविरदुल्लहलंभं जणं विमग्गंतो । आयासपएहिं भमंतहियय ! कइया वि भज्जिहिसि ॥६७॥

एगत्तो गुरुआणा अलंघणिज्जा कुलं च ससिविमलं । एत्तो य अपडियारो मणभवणं दहइ मयणग्गी ॥६८॥

ता कि वयामि देसं ? किं वा पाणे चयामि पावो हं ? । अहव मणवल्लहाए मिलामि जं होइ तं होउ ॥६९॥

जओ-

नासइ कुलाहिमाणो लज्जा परिगलइ पोरिसं पडइ । दूरे गुरूण सेवा नारीवसयाण भणियं च ॥७०॥

ताव फुरइ वेरग्गु चित्ति कुललज्ज वि तावहिं, ताव अकज्जह तणिय संक गुरुयणभउ तावहिं ।

ताविंदियइं वसाइं जसह सिरि हायइ तावहिं, रमणिहि मणमोहिणिहि वीसउ नरु होइ न जावहिं ॥७१॥

सुकयत्थु वियक्खणु सो सुहिउ, सुगइमग्गि सो संघडिउ । परमोहणमूलियसरिसियह जो बालियहं न पिडि पडिउ ॥७२॥

सो जणओ सा माया ते मित्ता तारिसो सयणवग्गो । एगपए च्चिय चत्तं अहह ! महामोहमाहप्पं ॥७३॥

इय सो मिलिओ नडपेडयस्स जाणियकलाकलाओ वि । चउवेयपारगो माहणो व्व मायंगगेहम्मि ॥७४॥

भणिओ समुच्छुगेणं सप्पणयं तेण लंखियाजणओ । देसु मम ताय ! धूयं, जमिमीए विणा न सक्केमि ॥७५॥

---

भणितं च -

प्रेर्यमाणः पूर्वकृतैः कर्मभिः कथमपि वराकः । सुखमिच्छन् दुर्लभजनानुरागे जनः पतति ॥ ६६ ॥

अन्यच्च -

स्वच्छन्दपदप्रभावदुर्लभलभ्यं जनं विमार्गयन् । आयासपदै र्भ्रमद्हृदय ! कदापि भङ्क्ष्यषि ॥ ६७ ॥

एकत्र गुर्वाज्ञाऽलङ्घनीया कुलं च शशिविमलम् । इतश्चाप्रतिकारो मनोभवनं दहति मदनाग्निः ॥ ६८ ॥

ततो किं व्रजामि देशं ? किं वा प्राणांस्त्यजामि पापोऽहम् ? । अथवा मनोवल्लभां मिलामि यद्भवति तद्भवतु ॥ ६९ ॥

यतः -

नश्यति कुलाभिमानो लज्जा परिगलति पौरुषं पतति । दूरे गुरुणां सेवा नारीवशगानां भणितं च ॥ ७० ॥

तावत्स्फुरति वैराग्यं चित्ते कुललज्जापि तावत् । तावदकार्यस्य तनुका शङ्का गुरुजनभयस्तावत् ॥ ७१ ॥

तावदिन्द्रीयाणि वशानि यशसः श्री र्हीयते तावत् । रमणिभि र्मनोमोहिनिभि र्वशं नरो भवति न यावत् ॥ ७२ ॥

सुकृतार्थो विचक्षणः स सुखी सुगतिमार्गे स संघटति । परमोहनमूलिकासदृश्या यो बालिकाया नाधीने पतितः ॥ ७३ ॥

स जनकः सा माता ते मित्रास्तादृशः स्वजनवर्गः । एकपद एव त्यक्तमहह ! महामोहमाहात्म्यम् ॥ ७३ ॥

इति स मिलितो नटपेटकस्य ज्ञातकलाकलापोऽपि । चतुर्वेदपारगो माहण इव मातङ्गगृहे ॥ ७४ ॥

भणित समुत्सुकेन सप्रणयं तेन लङ्खिकाजनकः । देहि मह्यं तात ! दुहितरं यदनया विना न शक्नोमि ॥ ७५ ॥

तेणुत्तं वच्छ ! तुमं असिक्खिओ सिक्खिया य मह धूया । अणूरूवो संजोओ[१] होइ ता सिक्ख विन्नाणं ।।७६।।
तो सो तह त्ति पडिवज्जिऊण तप्पभिइ सिक्खिउं लग्गो । अहवा वि किं न ववसइ ? किं न कुणइ लोहवसवत्ती ? ।।७७।।
तो सो मइपगरिसओ नच्चण-गंधव्वकरणपमुहासु । सव्वेसिमुवरिवत्ती संजाओ नाडयकलासु ।।७८।।
पुणरवि जणएणुत्तं सिक्खं पयडेसु विढवसु सुवन्नं । जेण महाभूईए करेमि वच्छस्स वीवाहं ।।७९।।
बिन्नायडम्मि नयरे नडपेच्छं मग्गिओ महाराया । निहओ य रंगभूमीए गरुयवंसो तयग्गम्मि ।।८०।।
फलिहम्मि उभयपासेसु कीलया तत्थ सो समारूढो । परिहियसछिद्ददारुमयपाउओ वंससिहरम्मि ।।८१।।
दाऊण खग्गखेडयविहत्थहत्थो विसिट्ठकरणाइं । पुरओमुहाइं पच्छामुहाइंपि हु सत्त सत्त तओ ।।८२।।
कीलेसु पाउयाओ खिविउं उद्धट्ठिओ निरुव्विग्गो । जा चिट्ठइ ता लोओ रंजियहियओ भणइ एवं ।।८३।।
अहह ! महच्छरियमहो ! इमस्स नीसेसनडसिरोमणिणो । जो एरिसम्मि दुग्गे आयासे कुणइ करणाणि ।।८४।।
ता जइ राया वियरइ पढमं किं पि हु इमस्स ता अम्हे । कुणिमो ईसरमेयं विभवपयाणेण किं बहुणा ? ।।८५।।
राया उ लंखियाए रूवाइगुणेहिं अक्खिवियहियओ । एईए उमो भत्ता पडिऊणं कहवि जइ मरइ ।।८६।।
ता एसा मम भज्जा पाणपिया हवइ इय विचिंततो । भणइ मए सच्चवियं न सम्ममेयस्स विन्नाणं ।।८७।।
ता पुणरवि मह दंसउ एयं चिय पत्थुयं सविन्नाणं । इय भणिए नरवइणा दक्खत्तणओ जणसमक्खं ।।८८।।

---

तेनोक्तं वत्स ! त्वमशिक्षितः शिक्षिता च मम दुहिता । अनुरुपः संयोगो न भवति तत शिक्षस्व विज्ञानम् ॥ ७६ ॥
तदा स तथेति प्रतिपद्य तत्प्रभृति शिक्षितुं लग्नः । अथवापि किं न व्यवसति ? किं न करोति लोभवशवर्त्ती ? ॥ ७७ ॥
ततः स मतिप्रकर्षान्नर्तन-गान्धर्वकरणप्रमुखासु । सर्वेषामुपरिवर्त्ती सञ्जातो नाटककलासु ॥ ७८ ॥
पुनरपि जनकेनोक्तं शिक्षां प्रकटयार्जय सुवर्णम् । येन महाभूत्या करोमि वत्सस्य विवाहम् ॥ ७९ ॥
बेन्नातटे नगरे नटप्रेक्ष्यं मार्गितो महाराजा । निहतश्च रङ्गभूम्यां गुरुकवंशस्तदग्रे ॥ ८० ॥
फलक उभयपार्श्वयोः कीलकास्तत्र स समारुढः । परिहितसच्छिद्रदारुमयपादुकः वंशशिखरे ॥ ८१ ॥
दत्वा खड्गखेटकविहस्तहस्तो विशिष्टकरणानि । पुरतोमुखानि पश्चान्मुखान्यपि खलु सप्त सप्त ततः ॥ ८२ ॥
कीलकेषु पादुके क्षिप्त्वोर्ध्वस्थितो निरुद्विग्नः । यावत्तिष्ठति तावल्लोको रञ्जितहृदयो भणत्येवम् ॥ ८३ ॥
अहह ! महाश्चर्यमहो ! अस्य निःशेषनटशिरोमणेः । य एतादृशे दुर्गे आयासे करोति करणानि ॥ ८४ ॥
ततो यदि राजा वितरति प्रथमं किमपि खल्वस्य तदा वयम् । कुर्म इश्वरमेनं विभवप्रदानेन किं बहुना ? ॥ ८५ ॥
राजा तु लङ्खिकाया रुपादिगुणैराक्षिप्तहृदयः । एतस्या अयं भर्ता पतित्वा कथमपि यदि म्रियेत ॥ ८६ ॥
तदैषा मम भार्या प्राणप्रिया भवतीति विचिन्तयन् । भणति मया दृष्टं न सम्यगेतस्य विज्ञानम् ॥ ८७ ॥
ततः पुनरपि मम दर्शयतु एवमेव प्रस्तुतं स्वविज्ञानम् । इति भणिते नरपतिना दक्षत्त्वेन जनसमक्षम् ॥ ८८ ॥

---

१. संजोगो रं० ।

किल सिक्खियस्स न हु किं पि दुक्करं तेण बद्धलक्खेण । लहुमेव वंससिहरे कयाणि पुण सत्त करणाणि ॥८९॥

जा पुणरवि मज्झत्थो नरनाहो नो पयंपए किं पि । पुणरुत्तमवुत्तेण वि कयाणि तावंति करणाणि ॥९०॥

एत्थंतरम्मि निवइम्मि तम्मि दिट्ठम्मि दाणनिरवेक्खे । अहह ! अजुत्तमजुत्तं जणेण हाहारवो विहिओ ॥९१॥

राया वि लंखियाए अणुरत्तो लक्खिओ वियड्ढेण । उवरिट्ठिएण तेण वि तह चेव इलाए पुत्तेण ॥९२॥

तो परिभावियमिमिणा नूणमिमो मज्झ मारणनिमित्तं । करणाणि कारवेई पुणरुत्तमिमीए रत्तमणो ॥९३॥

ता किं एसो लावन्नरूवकलिएसु नियकलत्तेसु । सायत्तेसु वि एईए नीयजाईए अणुरत्तो ? ॥९४॥

ता किं इमिणा ? जम्हा अहं पि एयारिसो जणो अहवा । पेच्छइ गिरिम्मि जलणं पजलंतं न उण पायतले ॥९५॥

तो मणयं संविग्गो वंसग्गगओ विवेयवसवत्ती । परिभाविउं पयत्तो सतत्तमेसो सवुद्धीए ॥९६॥

एयाए अहं रत्तो राया वि इमीए चेव वेलविओ । एयाए वि हु चित्तं चंचलचित्ताए दुग्गेज्झं ॥९७॥

तो पेच्छ मंदमइणा मए विमूढेण केरिसं विहियं ? पच्छायावपरद्धो स दूरमेवं विचिंतेइ ॥९८॥

भणियं च-

न तहा तवेइ तवणो न जलियजलणो न विज्जुनिग्घाओ । जं अवियारियकज्जं विसंवयंतं तवइ जंतुं ॥९९॥

हयमिह मह विन्नाणं हयमिणमो मज्झ मणुयमाहप्पं । जेण मए ससिविमले कुलम्मि मसिकुच्चओ दिन्नो ॥१००॥

अवगणिओ नियजणओ अवगणिओ तारिसो सयणवग्गो । अवहत्थिया पसत्था ते वि हु इहलोय-परलोया ॥१०१॥

---

किल शिक्षितस्य न खलु किमपि दुष्करं तेन बद्धलक्षेण । लघ्वेव वंशशिखरे कृतानि पुनः सप्त करणानि ॥ ८९ ॥

यावत्पुनरपि मध्यस्थो नरनाथो न प्रजल्पति किमपि । पुनरुक्तमनुक्तेनापि कृतानि तावन्ति करणानि ॥ ९० ॥

अत्रान्तरे नृपतौ तस्मिन् दृष्टे दाननिरपेक्षे । अहह ! अयुक्तमयुक्तं जनेन हाहारवो विहितः ॥ ९१ ॥

राजापि लङ्खिकायामनुरक्तो लक्षितो विदग्धेन । उपरिस्थितेन तेनापि तथा चैवेलायाः पुत्रेण ॥ ९२ ॥

ततः परिभावितमनेन नूनमयं मम मारणनिमित्तम् । करणानि कारयति पुनरुक्तमेतस्यां रक्तमनाः ॥ ९३ ॥

ततः किमेष लावण्यरुपकलितेषु निजकलत्रेषु । स्वायत्तेष्वपि एतस्यां नीचजात्यामनुरक्तः ? ॥ ९४ ॥

ततः किमनेन ? यस्मादहमप्येतादृशो जनोऽथवा । पश्यति गिरौ ज्वलनं प्रज्वलन्तं न पुनः पादतले ॥ ९५ ॥

ततो मनाक् संविग्नो वंशाग्रगतो विवेकवशवर्त्ती । परिभावयितुं प्रयतः स्वतत्त्वमेषः स्वबुध्या ॥ ९६ ॥

एतस्यामहं रक्तो राजापि एतया चैव वञ्चितः । एतस्या अपि खलु चित्तं चञ्चलचिताया दुर्ग्राह्यम् ॥ ९७ ॥

तत पश्य मन्दमतिना मया विभूढेन कीदृशं विहितम् ? । पश्चातापपीडितः स दूरमेवं विचिन्तयति ॥ ९८ ॥

भणितं च -

न तथा तपति तपनो न ज्वलित ज्वलनो न विद्युन्निर्घातः । यदविचारितकार्यं विसंवदन्तं तपति जन्तुः ॥ ९९ ॥

हतमिह मम विज्ञानं हतमिदं मम मनुष्यमाहात्म्यम् । येन मया शशिविमले कुले मषीकुर्चको दत्तः ॥ १०० ॥

अवगणितो निजजनकोऽवगणितस्तादृशः स्वजनवर्गः । अपहस्तिताः प्रशस्तास्तेऽपि खल्विहलोक-परलोकाः ॥ १०१ ॥

**जमिमीए मोहिएणं केणइ जम्मंतराणुराएणं । ववसियमेयमकज्जं वियाणमाणेण जमिहुत्तं ॥१०२॥**

**अहो ! संसारजालस्य विपरीतः क्रियाक्रमः । न परं जलजन्तूनां धीवरस्यापि बन्धनम् ॥१०३॥**

**परमेत्तो वि हु एयं महंतमच्छेरयं जमेसो वि । राया कलत्तजुत्तो दढमणुरत्तो इमीए वि ॥१०४॥**

**अत्राप्युक्तं केनचिद् यथा-**

**सर्वाभिरपि नैकोऽपि तृप्यत्येकाऽपि नाखिलैः । द्वितीयं द्वावपि द्विष्टः कष्टः स्त्रीपुंसमागमः ॥१०५॥**

**ता अलमिमिणा परिदेविएण निच्चं नमोत्थु विसयाणं । वज्जिय कज्जमकज्जं कुणंति वसगा जमेयाणं ॥१०६॥**

**भणियं च-**

**विसयविसमोहियाणं सुधम्ममंदायराण सत्ताणं । अमुणियसाराऽसाराण गलइ हत्थट्ठियं अमयं ॥१०७॥**

**विसया किंपागफलं विसया हालाहलं विसं परमं । विसया विसमं सल्लं विसया आसीविसभुयंगो ॥१०८॥**

**विसया उक्कडपासो विसया कंदुज्जुओ नरयमग्गो । इय मुणिय विसयसंगं धीरा वज्जंति दूरेणं ॥१०९॥**

**विसयासत्ता सत्ता विडंबणं तं जयम्मि पावंति । जं कहिउं पि न तीरइ धूलीवुक्कावणामहं व ॥११०॥**

**तो विसयविरत्तो हं संपइ विसएसु मज्झ पज्जत्तं । दिट्ठो मालवदेसो खद्धा मंडा मए इण्हिं ॥१११॥**

**इय वेरग्गागएणं नयरीमज्झं निरूवयंतेण । दिट्ठा धणइब्भगिहं धम्मधणा साहुणो के वि ॥११२॥**

**पंचसमिया तिगुत्ता संजमजुत्ता दढव्वया धीरा । सुपसंता पविसंता सुविसिट्ठा भत्त-पाणट्ठा ॥११३॥**

---

यदनया मोहितेन केनचिज्जन्मान्तरानुरागेण । व्यवसितमेतदकार्यं विजानता यदिहोक्तम् ॥ १०२ ॥

अहो ! संसारजालस्य विपरित: क्रियाक्रमः । न परं जलजन्तूनां धीवरस्यापि बन्धनम् ॥ १०३ ॥

परमितोऽपि खल्वेतन्महाश्चर्यं यदेषोऽपि । राजा कलत्रयुक्तो दृढमनुरक्त एतस्यामपि ॥ १०४ ॥

ततोऽलमनेन परिदेवितेन नित्यं नमोऽस्तु विषयेभ्यः । वर्जित्वा कार्यमकार्यं कुर्वन्ति वशगा यदेतेषाम् ॥ १०६ ॥

भणितं च -

विषयविषमोहितानां सुधर्ममन्दाचाराणां सत्त्वानाम् । अमुणितसारासाराणां गलति हस्तस्थितममृतम् ॥ १०७ ॥

विषयाः किम्पाकफलं विषया हलाहलं विषं परमम् । विषया विषमं शल्यं विषया आशीर्विषभुजङ्गः ॥ १०८ ॥

विषया उत्कटपाशो विषया कन्दुयुतो नरकमार्गः । इति ज्ञात्वा विषयसङ्गं धीरा वर्जयन्ति दूरेण ॥ १०९ ॥

विषयासक्ताः सत्त्वा विडम्बनां तां जगति प्राप्नुवन्ति । यत्कथयितुमपि न शक्यते धूलीमुष्टिप्रक्षेपमहरिव[१] ॥ ११० ॥

ततो विषयविरक्तोऽहं सम्प्रति विषयेषु मम पर्याप्तम् । दृष्टो मालवदेशः खादिता मण्डका मयेदानीम् ॥ १११ ॥

इति वैराग्यागतेन नगरीमध्ये निरुपयता । दृष्टा धनेभ्यगृहे धर्मधनाः साधवः केऽपि ॥ ११२ ॥

पञ्चसमितास्त्रिगुप्ताः संयमसंयुक्ता दृढव्रता धीराः । सुप्रशान्ताः प्रविशन्तः सुविशिष्टा भक्त-पानार्थाः ॥ ११३ ॥

---

१. जीस महोत्सव में धूल की मुट्ठी फेंकी जाती हैं ।

नवजोव्वणाहिं सिंगारियाहिं लायन्न-रूवकलियाहिं । पडिलाभिज्जंता धम्मियाहिं धणवइगिहवहूहिं ॥११४॥
दट्ठूणं मुणिवसभे दढमुल्लसिओ गुणाणुराएण । कयपुन्ना खलु एए विसयविरत्ता न उण अम्हे ॥११५॥
यि गुणिगुणाणुरागा खउवसमाओ चरित्तमोहस्स । उल्लसियविरियवसओ जाओ चारित्तपरिणामो ॥११६॥
अहियं विवाहबुद्धी हिययम्मि सयत्थचिंतणपरो य । ठियसकलत्तविराओ विसयविरत्तो सुथिरचित्तो ॥११७॥
अह सो महाणुभावो अपुव्वकरणेण वंसजट्ठीए । आरूढो तह चेव य गुरुईव खवगसेढीए ॥११८॥
सिवपुरदंसणमइणओ समणसमाहीए वट्टमाणस्स । लोया-ऽलोयपयासं संजायं केवलं नाणं ॥११९॥
एत्थंतरम्मि ओयरिय वंसभागाओ सो इलापुत्तो । रायाइजणसभाए धम्मं कहिउं समाढत्तो ॥१२०॥
भो भो भव्वा ! दुलहं लहिउं मणुयत्तमाइसामग्गिं । पडिवज्जह जिणधम्मं सम्मं सम्मत्तमायरह ॥१२१॥
विरमह विसएहिंतो सिग्घं सुहुमं पि दुच्चरिय जायं । वियडह सुगुरुसयासे माऽहमिव विडंबणं वयह ॥१२२॥
एत्थंतरम्मि भणियं रायाइसभाए विम्हियमणाए । भयवं कहमिव तुब्भे विडंबिया ? कहह निय चरियं ॥१२३॥
निसुणह एगग्गमणा इओ भवाओ अईयतइयभवे । अहमासि वसंतउरे छक्कम्मरओ दियप्पवरो ॥१२४॥
मह माहणी य भज्जा माहणकुलसंभवा पयइसोमा । दढमणुरत्तमणाइं परोप्परं तम्मि जम्मम्मि ॥१२५॥
समुदायकडा कम्मा समुदायफल त्ति इय सरंताइं । संविग्गमाणसाइं पव्वइयाइं गुरुसमीवे ॥१२६॥
रिउभावओ य भज्जा जाइमयं कुणइ तह मणे सुहुमो । सुगुरुसमीवे वऽम्हं नावगओ नेहपडिबंधो ॥१२७॥

---

नवयौवनाभि: श्रृङ्गारिताभि र्लावण्यरुपकलिताभि: । प्रतिलाभयन्तो धर्मिकाभि धर्नपतिगृहवधूभि: ॥ ११४ ॥
दृष्ट्वा मुनिवृषभान् दृढमुल्लसितो गुणानुरागेण । कृतपुण्या: खल्वेते विषयविरक्ता न पुनर्वयम् ॥ ११५ ॥
इति गुणीगुणानुरागात्क्षयोपशमाच्चारित्रमोहस्य । उल्लसितवीर्यवशतो जातश्चारित्रपरिणाम: ॥ ११६ ॥
अधिकं विवाहबुद्धि र्हृदये सदर्थचिन्तनपरश्च । स्थितसकलत्रविरागो विषयविरक्त: सुस्थिरचित्त: ॥ ११७ ॥
अथ स महानुभावोऽपूर्वकरणेन वंशयष्टीम् । आरुढस्तथा चैव च गुर्व्वीं क्षपकश्रेणीम् ॥ ११८ ॥
शिवपुरदर्शनमते: श्रमणसमाधौ वर्तमानस्य । लोकाऽलोक प्रकाशं सञ्जातं केवलं ज्ञानम् ॥ ११९ ॥
अत्रान्तरे अवतीर्य वंशभागात् स इलापुत्र: । राजादिजनसभायां धर्मं कथयितुं समारब्ध: ॥ १२० ॥
भो भो भव्या: ! दुर्लभां लब्ध्वा मनुष्यत्वादिसामग्रीम् । प्रतिपद्यध्वं जिनधर्मं सम्यक् सम्यक्त्वमाचरत ॥ १२१ ॥
विरमत विषयेभ्य: शीघ्रं सूक्ष्ममपि दुश्चरितं जातम् । प्रकटयथ सुगुरुसकाशे माऽहमिव विडम्बनं व्रजथ ॥ १२२ ॥
अत्रान्तरे भणितं राजादिसभायां विस्मितमनसा । भगवन् ! कथमिव यूयं विडम्बिता: ? कथयथ निजं चरितम् ॥ १२३ ॥
निश्रृणुतैकाग्रमनस इतो भवादतीततृतीयभवे । अहमासीद्वसन्तपुरे षट्कर्मरतो द्विजप्रवर: ॥ १२४ ॥
मम माहणी च भार्या माहणकुलसम्भवा प्रकृतिसौम्या । दृढमनुरक्तमनसौ परस्परं तस्मिन् जन्मनि ॥ १२५ ॥
समुदायकृतानि कर्माणि समुदायफलानीत्येवं स्मरन्तौ । संविग्नमानसौ प्रव्रजितौ गुरुसमीपे ॥ १२६ ॥
ऋजुभावाच्च भार्या जातिमदं करोति तथा मनसि सूक्ष्मम् । सुगुरुसमीपे वास्मद्द्वयां नावगत: स्नेहप्रतिबन्ध: ॥ १२७ ॥

तं सुहुममणालोइय तहेव पत्ताइं देवलोगम्मि । तत्तो इह जायाइं तुम्हाणं चेव पच्चक्खं ॥१२८॥

तो जाइमएणेसा संजाया निंदियाए जाईए । अहमवि तन्नेहेणं विडंबणं एवमणुपत्तो ॥१२९॥

तो भो महाणुभावा ! सुगुरुसमीवम्मि सल्लमुद्धरह । कुणह य विसयविरमणं जइ सम्मं महह सिवसोक्खं ॥१३०॥

इय निसुणिऊण राया तहाऽवरा लंखिया महादेवी । संजायकेवलाइं चउरो वि गयाइं मोक्खम्मि ॥१३१॥

॥ इलापुत्राख्यानकं समाप्तम् ॥२५॥

इय असुहो परिणामो जाओ दमगस्स दुगइनिमित्तं । भरह-इलापुत्ताणं सुहो य सिवसोक्ख संजणओ ॥१॥

तह अन्नाण वि जायइ दुग्गइ-सुगईण साहओ एसो । ता वज्जिऊणमसुहं सुहपरिणामं सया कुणह ॥२॥

यद्वत् शुभो लवणरूपरसो रसेषु, चिन्तामणिर्मणिषु यद्वदिह प्रशस्यः ।
तद्वच्च धर्मशुभकर्मणि शुद्धभावस्तस्मात् तमेव भजताशुभभावहानात् ॥१॥

॥ इति श्रीमदाम्रदेवसूरिविरचितवृत्तावाख्यानकमणिकोशे भावनोपवर्णनो नाम पञ्चमोऽधिकारः समाप्तः ॥५॥

---

तत्सूक्ष्ममनालोच्य तथैव प्राप्तौ देवलोके । तत इह जातौ युष्माकमेव प्रत्यक्षम् ॥ १२८ ॥

ततो जातिमदेनैषासञ्जाता निन्दितायां जात्याम् । अहमपि तत्स्नेहेन विडम्बनामेवमनुप्राप्तः ॥ १२९ ॥

ततो भो महानुभावाः ! सुगुरु समीपे शल्यमुद्धरत । कुरुत च विषयविरमणं यदि सम्यगिच्छत शिवसौख्यम् ॥ १३० ॥

इति निश्रुत्य राजा तथाऽपरा लङ्खिका महादेवी । सञ्जातकेवलाश्चत्वारोऽपि गता मोक्षे ॥ १३१ ॥

॥ इलापुत्राख्यानकं समाप्तम् ॥ २४ ॥

इत्यशुभः परिणामो जातो द्रमकस्य दुर्गतिनिमित्तम् । भरतेलापुत्रयोः शुभश्च शिवसौख्यसञ्जनकः ॥ १ ॥

तथान्येषामपि जायते दुर्गति-सुगत्योः साधक एषः । ततो वर्जयित्वाशुभं शुभपरिणामं सदा कुरुत ॥ २ ॥

• • •

## [ ६. सम्यक्त्वगुणवर्णनाधिकारः ।]

व्याख्यातो भावनारूपश्चतुर्थो धर्मभेदः । तद्व्याख्यानात् समर्थितश्चतुर्विधोऽपि दानादिधर्मः । अयं च सम्यक्त्वनिश्चलतायां सम्यक् फलदायी भवति । अतः सम्यकत्वस्वरुपमेवाह –

भवचारयवासहरं तह सम्मद्दंसणं सुगइमूलं ।
ता सेणिय-सुलसा इव सम्मत्ते निच्चला होह ॥ ११ ॥

व्याख्या - 'भवचारकवासहरं' संसारकारागारावस्थानविनाशनं 'तथा' इति समुच्चये 'सम्यगदर्शनं' समयक्त्वं 'सुगतिमूलं' सुदेवत्व-सुमानुषत्वादिसुखप्राप्तिबीजम् 'तस्मात्' कारणात् श्रेणिक-सुलसे इव सम्यक्त्वे 'निश्चलाः' स्थिरा भवत इत्यक्षरार्थः ॥ ११ ॥

भावार्थस्त्वाख्यानकाभ्यामवसेयः । ते चामू । तत्र श्रेणिकाख्यानकं सेडुवकाख्यानके कथयिष्यते ।

### सुलसाख्यानकं त्विदम्-

मगहामंडलअक्खंडमंडले आसि रायगिहनयरे । नयरेहिरो नरिंदो सेणियनामो ससोहो वि ॥१॥
तस्सऽत्थि पवरभूसो सुभद्दजाई सुदाणललियकरो । पउमालंकियदेहो रहिओ नागो व्व नागो त्ति ॥२॥
जीवा-ऽजीवाइविऊ परियाणियपुन्नपावपरिणामा । सिरिवीरचरणतामरसमहुयरी सीलकुलभवणा ॥३॥
तस्स सुलसाभिहाणा भज्जा वज्जियअवज्जसंसग्गी । चंदकरनियरनिम्मलनिच्छलसम्मत्तसंजुत्ता ॥४॥

---

सुलसाख्यानकम् - ॥ २५ ॥

मगधामण्डलाखण्डमण्डल आसीद्राजगृहनगरे । नयराजमाननरेन्द्रः श्रेणिकनाम सशोभोऽपि ॥ १ ॥
तस्यास्ति प्रवरभूषः सुभद्रजातिः सुदानललितकरः । पद्मालङ्कितदेहो रथिको नाग इव नाग इति ॥ २ ॥
जीवाजीवादिविदुः परिज्ञातपुण्यपापपरिणामः । श्रीवीरचरणतामरसमधुकरी शीलकुलभवना ॥ ३ ॥
तस्य सुलसाभिधाना भार्या वर्जितावद्यसंसर्गी । चन्द्रकरनिकरनिर्मलनिश्चलसम्यक्त्वसंयुक्ता ॥ ४ ॥

**अन्नोन्ननेहनिब्भरमणाण जिणथवणकरणपवणाण । अइकमइ ताण कालो विसयसुहं भुंजमाणाणं ॥५॥**

**एत्तो य विहरमाणो गामा-ऽऽगर-नगरमंडियं वसुहं । वसु-हरि-नरिंद-मुणिवरभत्तिब्भर[1]नमियकमकमलो ॥६॥**

**कमलोलकणयनिम्मियकमलोवरिनिहियरुइररुइचरणो । चरणरुइचारुमुणिवरमाणससंजणियगुरुहरिसो ॥७॥**

**हरिसोयामणिविप्फुरियतेयपब्भारनिहयतमजाओ । तमजाइरहियसन्नाणफलयखलियंगयप्पसरो ॥८॥**

**पसरंतचरणनहमणिमयूहविच्छुरियसयलमहिवलओ । वलओहकलियसुरवइसमूहथुव्वंतगुणनियरो ॥९॥**

**नियरोस-रायरिउघडसमरंगणविजयसयलसिद्धत्थो । सिद्धत्थसुओ सिरिवद्धमाणसामी समोसरिओ ॥१०॥**

**चंपाए परिसरम्मी असुरा-ऽमरनिम्मिए समोसरणे । सीहासणे [2]निविट्ठो धम्मकहं कहिउमाढत्तो ॥११॥**

**एत्थंतरे तिदंडय-गणित्तिया-भिसिय-छत्तछन्नालो । [3]अम्मडनामो सड्ढो तत्थ परिव्वायगो पत्तो ॥१२॥**

**काउं पयाहिणतियं पणमइ महिमंडले मिलियभालो । थोऊण जिणं भत्तीए तयणु खणमेक्कमुवविट्ठो ॥१३॥**

**तो पणमिउं पयट्टो रायगिहे पुरवरम्मि ता एसो । सुलसाए मह पउत्तिं साहसु जगबंधुणा भणिओ ॥१४॥**

**इच्छं ति पभणिऊणं उप्पइओ गवलसामले गयणे । रायगिहे संपत्तो चित्ते चिंतेइ तो एवं ॥१५॥**

**पेच्छ कह वीयराओ सुर-नरमज्झम्मि विहियसुपसंसो । केण गुणेणं सुलसाए ? तं परिक्खेमि गुणमहयं ॥१६॥**

**इय चिंतिऊण तत्तो संपत्तो तीए गेहमचिरेण । मग्गइ भोयणमेसो देइ न धम्मत्थमेसा वि ॥१७॥**

---

अन्योन्यस्नेहनिर्भरमनसो र्जिनस्तवनकरणप्रवणयोः । अतिक्रामति तयोः कालो विषयसुखं भुञ्जनयोः ॥ ५ ॥

इतश्च विहरन् ग्रामाऽऽकर-नगरमण्डितां वसुधाम् । वसु-हरि-नरेन्द्र-मुनिवरभक्तिनिर्भरनतक्रमकमलः ॥ ६ ॥

क्रमलोलकनकनिर्मितकमलोपरिनिहितरुचिररुचिचरणः । चरणरुचिचारुमुनिवरमानससञ्जनितगुरुहर्षः ॥ ७ ॥

हरिसौदामिनीविस्फुरिततेजःप्राग्भारनिहततमोजातः । तमोजातिरहितसज्ञानफलकस्खलिताङ्गदप्रसरः ॥ ८ ॥

प्रसरच्चरणनखमणिमयूरविच्छुरितसकलमहिवलयः । वलयौघकलितसुरपतिसमूहस्तुवद्गुणनिकरः ॥ ९ ॥

निजरोषरागरिपुघटसमराङ्गणविजयसकलसिद्धार्थः । सिद्धार्थसुतः श्रीवर्धमानस्वामी समवसृतः ॥ १० ॥

चम्पायाः परिसरे असुराऽमरनिर्मिते समवसरणे । सिंहासने निविष्ठो धर्मकथां कथयितुमारब्धः ॥ ११ ॥

अत्रान्तरे त्रिदंडक-[4]गणेत्रिका-भिसिया-छत्र-छन्नालः । अम्बडनाम श्राद्धस्तत्र परिव्राजकः प्राप्तः ॥ १२ ॥

कृत्वा प्रदक्षिणात्रिकं प्रणमति महिमण्डले मिलितभालः । स्तुत्वा जिनं भक्त्या तदनु क्षणमेकमुपविष्टः ॥ १३ ॥

ततः प्रणभ्य प्रवृतो राजगृहे पुरवरे तावदेषः । सुलसाया मम प्रवृत्तिं कथय जगबन्धुना भणितः ॥ १४ ॥

इच्छामीति प्रभण्योत्पतितो गवलश्यामले गगने । राजगृहे संप्राप्तश्चित्ते चिन्तयति तदैवम् ॥ १५ ॥

पश्य कथं वीतरागः सुर-नरमध्ये विहितसुप्रशंसः । केन गुणेन सुलसायाः ? तं परीक्षे गुणमहान्तम् ॥ १६ ॥

इति चिन्तयित्वा ततः सम्प्राप्तस्तस्या गृहमचिरेण । मार्गयति भोजनमेष ददाति न धर्मार्थमेषापि ॥ १७ ॥

---

१. ब्भरनिब्भरनमिय रं० । २. निसन्नो रं० । ३. ओम्बड० रं० । ४. गणेत्तिया - रुद्राक्षमाला (दे.), भिसिय - आसनविशेषः (दे.), छन्नाल - तिपाई संन्यासियोका एक उपकरण (दे.)

तो नयरपरिसरम्मी पुव्वपओलीदुवारदेसम्मि । विरयइ विरिंचिरूवं चउवयणं पंकयनिविट्ठं ॥१८॥
सियबंभसुत्त-सावित्ति-हंस-जड-मउड-अक्खमालाहिं । परिकलियं धम्मकहासमुज्जयं जाणिउं तत्तो ॥१९॥
आगच्छइ पउरजणो तो सुलसा सहियणेण आहूया । दंभो त्ति पभणिऊणं न गया तव्वंदणट्ठाए ॥२०॥
तत्तो स बीयदिवसे दाहिणदेसे विउव्वए कण्हं । गय-संख-चक्क-सारंग-गरूड-लच्छीहिं परिकलियं ॥२१॥
तेण वि न रंजिया सा तो तइयदिणम्मि पच्छिमदिसाए । कुणइ सिरिकंठरूवं नयणत्तय-भूइभासुरयं ॥२२॥
आबद्धजडामउडं चंदकलालंकियं वसहसोहं । अद्धंगगउरि-डमरुय-खट्टंगगणेण संजुत्तं ॥२३॥
तत्थ वि न गया सुलसा तो उत्तरगोउरे विणिम्मविउं । वररयण-कणय-कलहोयकलियपायारतियसहियं ॥२४॥
तियसहियसमवसरणं कंकेल्लितलम्मि चउसरीरो सो । सिंहासणे निविट्ठो अट्ठमहापाडिहेरजुओ ॥२५॥
तो जिणनाहं नाउं नयरजणो नरवरिंदपज्जन्तो । तव्वंदणवडियाए विणिग्गओ नो गया सुलसा ॥२६॥
तो अंबडेण एसा भणाविया जिणवरस्स नमणत्थं । सुलसाए तओ भणियं नएस सिरिवीरजिणनाहो ॥२७॥
तेण वि भणाविया सा पणुवीसइमो इमो जिणो मुद्धे ! । सा आह न हुंति जिणा पणुवीसं भरहखेत्तम्मि ॥२८॥
किंतु कयकूडकवडो कोइ इमो सासणं विडंबेइ । तो अम्मडो वि चिंतइ थिरसम्मत्ता अहह ! एसा ॥२९॥
उप्पन्नविमलकेवलनाणीभयवं पि जं पसंसेइ । सा सुलसा जयउ जए निच्चलसम्मत्तवररयणा ॥३०॥
जं खोभिउं न सक्को सक्को वि हु सासणाओ सुरसहिओ । सा सुलसा जयउ जए निच्चलसम्मत्तवररयणा ॥३१॥

---

तदा नगरपरिसरे पूर्वप्रतोलीद्वारदेशे । विरचयति विरञ्चिरुपं चतुर्वदनं पङ्कजनिविष्टम् ॥ १८ ॥
श्वेतब्रह्मसूत्र-सावित्रि-हंस-जटा-मुकुटाक्षमालाभिः । परिकलितं धर्मकथासमुद्यतं ज्ञात्वा ततः ॥ १९ ॥
आगच्छति पौरजनस्ततः सुलसा सखिजनेनाहूता । दम्भ इति प्रभण्य न गता तद्वन्दनार्थाय ॥ २० ॥
ततः स द्वितीयदिवसे दक्षिणदिशि विकुर्वति कृष्णम् । गदा-शङ्ख-चक्र-सारङ्ग-गरुड-लक्ष्मीभिः परिकलितम् ॥ २१ ॥
तेनापि न रञ्जिता सा ततस्तृतीयदिने पश्चिमदिशि । करोति श्रीकण्ठरुपं नयनत्रय-भूतिभासुरकम् ॥ २२ ॥
आबद्धजटामुकुटं चन्द्रकलालङ्कितं वृषभशोभम् । अर्द्धाङ्गगौरी-डमरुक-खट्वाङ्गगणेन सङ्युक्तम् ॥ २३ ॥
तत्रापि न गता सुलसा तत उत्तरगोपूरे विनिर्माय । वररत्न-कनक-कलधौतकलितप्राकारत्रिकसहितम् ॥ २४ ॥
त्रिदशाधिपसमवसरणं कङ्केलितले चतुःशरीरः सः । सिंहासने निविष्टोऽष्टमहाप्रातिहार्ययुतः ॥ २५ ॥
तदा जिननाथं ज्ञात्वा नगरजनो नरवरेन्द्रपर्यन्तः । तद्वन्दनप्रत्ययाद् विनिर्गतो नो गता सुलसा ॥ २६ ॥
ततोऽम्बर्डेनैषा भाणिता जिनवरस्य नमनार्थम् । सुलसया ततो भणितं नैष श्रीवीरजिननाथः ॥ २७ ॥
तेन वि भाणिता सा पञ्चविंशतितमोऽयं जिनो मुग्धे ! । साऽऽह न भवन्ति जिनाः पञ्चविंशति र्भरतक्षेत्रे ॥ २८ ॥
किन्तु कृतकूटकपटः कोऽयं शासनं विडम्बयति । ततोऽम्बडोऽपि चिन्तयति स्थिरसम्यक्त्वाऽहह ! एषा ॥ २९ ॥
उत्पन्नविमलकेवलज्ञानी भगवानपि यां प्रशंसति । सा सुलसा जयतु जगति निश्चलसम्यक्त्ववररत्ना ॥ ३० ॥
यां क्षोभितुं न शक्यः शक्रोऽपि खलु शासनात् सुरसहितः । सा सुलसा जयतु जगति निश्चलसम्यक्त्ववररत्ना ॥ ३१ ॥

**देवा वि हु सन्निज्झं कुणंति जीए गुणेहिं अक्खित्ता । सा सुलसा जयउ जए निच्चलसम्मत्तवररयणा ।।३२।।**

**इय संहरिउं सव्वं सुलसागेहम्मि अंबडो गंतुं । कुणइ निसीहियसद्दं सोउं अब्भुट्ठए सा वि ।।३३।।**

**भणइ य निसीहियाए सागयमह कुणइ उचियपडिवत्तिं । वंदावइ गिहचेइयबिंबे एसोऽभिवंदइ य ।।३४।।**

**सासय-असासयाइं वंदावइ चेइयाइं सो सुलसं । सा वि धरलुढियसीसा वंदइ उब्भिन्नरोमंचा ।।३५।।**

**पुणरवि य सो पयंपइ सकयत्था तं सि पुच्छए जीए । सिरिवद्धमाणसामी कुसलपउत्तिं समवसरणे ।।३६।।**

**निसुणित्तु तयं सुलसा भत्तिभरुब्भिन्नरुइररोमंचा । महिमंडलमिलियनिडालमंडला पणमइ जिणिंदं ।।३७।।**

**तो तेण पुणो भणिया भद्दे ! हर-हरि-हिरन्नगब्भाणं । वक्खाणे सह लोएण नाऽऽगया किं तुमं ? कहसु ।।३८।।**

**किं भद्द ! तुमं जंपसि अयाणमाणो व्व ? जंपए सुलसा । वीरं मोत्तुं न रमइ मज्झ मणो इयरदेवेसु ।।३९।।**

**तथा हि-**

**जो अइरावयगंडयलगलियमयरंदपरिमलग्घविओ । सो वियसियं पि न रमइ पिचुमंदं महुयरजुवाणो ।।४०।।**

**भरुयच्छकच्छवच्छुच्छलंतमयरंदगुंडियंगस्स । भमरस्स करीरवणे मणयं पि मणो न वीसमइ ।।४१।।**

**जो माणसम्मि वसिओ वियसियसयवत्तमासलामोए । सो किं फुल्लपलासे सविलासं छप्पओ छिवइ ? ।।४२।।**

**जो नासियधवगंगं गंगं धवलुज्जलं जलं लिहइ । गयसोहं सो हंसो किं सेसनईपयं पियइ ? ।।४३।।**

**जो कयसीयलतीरे नीरे तेवाए मज्जइ जहिच्छं । सो किं इयरे वियरे गओ गओ देइ दिट्ठिं पि ? ।।४४।।**

---

देवा अपि खलु सांनिध्यं कुर्वन्ति यस्या गुणैराक्षिप्ता । सा सुलसा जयतु जगति निश्चलसम्यक्त्ववररत्ना ॥ ३२ ॥

इति संहृत्य सर्वं सुलसागृहे ऽम्बडो गत्वा । करोति निषिधिकाशब्दं श्रुत्वाऽभ्युत्तिष्ठति सापि ॥ ३३ ॥

भणति च निषीधिकायाः स्वागतमथ करोत्युचितप्रतिपत्तिम् । वन्दापयति गृहचैत्यबिम्बानेषोऽभिवन्दते च ॥ ३४ ॥

शाश्वताऽशाश्वतानि वन्दापयति चैत्यानि स सुलसाम् । सापि धरालुठितशीर्षा वन्दते उद्भिन्नरोमाञ्चा ॥ ३५ ॥

पुनरपि च स प्रजल्पति सकृतार्था त्वमसि पृच्छति यस्याः । श्रीवर्धमानस्वामी कुशलप्रवृत्तिं समवसरणे ॥ ३६ ॥

निःश्रुत्य तकं सुलसा भक्तिभरोद्भिन्नरुचिररोमाञ्चा । महिमण्डलमिलितनिडालमण्डला प्रणमति जिनेन्द्रम् ॥ ३७ ॥

ततस्तेन पुन र्भणिता भद्रे ! हर-हरि-हिरण्यगर्भाणाम् । व्याख्याने सह लोकेन नागता किं त्वं ? कथय ॥ ३८ ॥

किं भद्र ! त्वं जल्पसि अज्ञायमान इव ? जल्पति सुलसा । वीरं मुक्त्वा न रमते मम मन इतरदेवेषु ॥ ३९ ॥

तथाहि -

य ऐरावतगण्डतलगलितमकरन्दपरिमलार्घ्यापितः । स विकसितमपि न रमते पिचुमन्दं मधुकरयुवा ॥ ४० ॥

भृगुकच्छकच्छवत्सोच्छलन्मकरन्दगुण्डिताङ्गस्य । भ्रमरस्य करीरवने मनागपि मनो न विश्राम्यति ॥ ४१ ॥

यो मानसे उषितो विकसितशतपत्रमांसलाभोगे । स किं फुल्लपलासान्सविलासं षट्पदः स्पृशति ? ॥ ४२ ॥

यो नाशितधवगङ्गं गङ्गं धवलोज्ज्वलं जलं लेढि । गतशोभं स हंसः किं शेषनदीपयः पिबति ? ॥ ४३ ॥

यः कृतशीतलतीरे नीरे रेवाया मज्जति यथेच्छम् । स किमितरे वितरे गतो गजो ददाति दृष्टिमपि ? ॥ ४४ ॥

जो घणलयसामलए मलए मयरंदवासिए वसिओ । सारंगो सारंगो सो किं इयरे धरे रमइ ? ॥४५॥

